।। कोबातीर्थमंडन श्री महावीरस्वामिने नमः ।।

।। अनंतलब्धिनिधान श्री गौतमस्वामिने नमः ।। ।। गणधर भगवंत श्री सुधर्मास्वामिने नमः ।।

।। योगनिष्ठ आचार्य श्रीमद् बुद्धिसागरसूरीश्वरेभ्यो नमः ।। ।। चारित्रचूडामणि आचार्य श्रीमद् कैलाससागरसूरीश्वरेभ्यो नमः ।।

# आचार्य श्री कैलाससागरसूरि ज्ञानमंदिर

## पुनितप्रेरणा व आशीर्वाद

## राष्ट्रसंत श्रुतोद्धारक आचार्यदेव श्रीमत् पद्मसागरसूरीश्वरजी म. सा.

### जैन मुद्रित ग्रंथ स्केनिंग प्रकल्प

ग्रंथांक : १

**श्री महावीर जैन आराधना केन्द्र**

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-श्री महावीर जैन आराधना केन्द्र
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-३८२००७ (गुजरात)
(079) 23276252, 23276204
फेक्स : 23276249
Websiet : www.kobatirth.org
Email : Kendra@kobatirth.org

**शहर शाखा**

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
शहर शाखा
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
त्रण बंगला, टोलकनगर
परिवार डाइनिंग हॉल की गली में
पालडी, अहमदाबाद – ३८०००७
(079) 26582355

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ श्रीशङ्खेश्वरपार्श्वनाथाय नमः ॥

श्रीसिद्धि-विनय-भद्र-जनक-विलास-ॐकार-जिनचन्द्र-सद्गुरुभ्यो नमः

आ. श्रीॐकारसूरिज्ञानमंदिर ग्रंथावली - ५१/१

श्रीमन्मलयगिरिसूरि विरचितविवरणयुत निर्युक्ति-भाष्यसमेतम्

# श्री व्यवहारसूत्रम् - भाग ६

## (उद्देशः - १०)

आगमप्रभाकर मुनिश्री पुण्यविजयजी सज्जीकृत सामग्रीसहायेन

संपादकः

आचार्य विजय मुनिचन्द्रसूरिः

सहायकः मुनि दिव्यरत्नविजयः

प्रकाशक

आचार्यश्री ॐकारसूरिज्ञानमंदिर, सुभाषचोक, गोपीपुरा, सूरत.

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ श्रीशङ्खेश्वरपार्श्वनाथाय नमः ॥

श्रीसिद्धि-विनय-भद्र-जनक-विलास-ॐकार-जिनचन्द्र-सद्गुरुभ्यो नमः

आ. श्रीॐकारसूरिज्ञानमंदिर ग्रंथावली - ५१/१

श्रीमन्मलयगिरिसूरि विरचितविवरणयुत निर्युक्ति-भाष्यसमेतम्

# श्री व्यवहारसूत्रम् - भाग ६

## ( उद्देशः - १० )

आगमप्रभाकर मुनिश्री पुण्यविजयजी सज्जीकृत सामग्रीसहायेन

संपादकः

आचार्य विजय मुनिचन्द्रसूरिः

सहायकः मुनि दिव्यरत्नविजयः

प्रकाशक

आचार्यश्री ॐकारसूरिज्ञानमंदिर, सुभाषचोक, गोपीपुरा, सूरत.

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



Vyavahara Sootram part - 6

Editor Ac. Munichandrasoori

प्रथम संस्करण
वि. सं. २०६६, ई. स. २०१०
नकल : २५०

## प्राप्तिस्थान

**आचार्य श्रीॐकारसूरिज्ञानमंदिर**
आचार्य श्रीॐकारसूरिआराधनाभवन
सुभाषचोक, गोपीपुरा, सूरत.
फोन : ९८२४१५२७२७
E-Mali : omkarsuri@rediffmail.com
mehta_sevantilal@yahoo.co.in

**आचार्य श्रीॐकारसूरिगुरुमंदिर**
वावपथकनी वाडी,
दशापोरवाड सोसायटी,
पालडी चाररस्ता, अमदावाद-७
फोन : (०७९) २६५८६२९३

**विजयभद्रचेरिटेबल ट्रस्ट**
पार्श्वभक्तिनगर, नेशनल हाईवे १४,
भीलडीयाजी जि. बनासकांठा. पीन-३८५५३५.
फोन : ०२७४४-२३३१२९, २३४१२९

मुद्रक :-
किरीट ग्राफिक्स २०९, आनंद शोपींग सेन्टर, रतनपोल, गोलवाड, अहमदाबाद-०१ फोन : ९८९८४९००९



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



# પ્રકાશનના લાભાર્થી

સુવિશાલગચ્છાધિપતિ આચાર્યદેવ શ્રીમદ્વિજય

રામચન્દ્ર - ભદ્રંકર - કુંદકુંદસૂરીશ્વરજી મહારાજાના શિષ્યરત્ન

વર્ધમાનતપોનિધિ ૧૦૦ + ૬૭ ઓળીના આરાધક

પૂ. ગણિવર્યશ્રી નયભદ્ર વિ.મ.સા.ની પ્રેરણાથી

શ્રી દેવકીનગર જૈન સંઘ બોરીવલી વેસ્ટ મુંબઈ.

શ્રી વર્ધમાનભક્તિ શ્વે.મૂ. ઈરાનીવાડી જૈન સંઘ કાંદીવલી, (વેસ્ટ) મુંબઈ.

શ્રી ધર્મવર્ધક શ્વે.મૂ.પૂ. જૈન સંઘ મધુપાર્ક

કાર્ટરરોડ નં. ૧ બોરીવલી ઇસ્ટ મુંબઈ આદિએ

જ્ઞાનદ્રવ્યમાંથી સુંદર લાભ લીધો છે.

અનુમોદના....અનુમોદના....અનુમોદના....



For Private And Personal

# પ્રકાશકીય

પૂ.આ.ભ. **શ્રીઅરવિંદસૂરિ** મ.સા. અને પૂ.આ.ભ.શ્રી **યશોવિજયસૂરિ** મ.સા.ના આશીર્વાદ અને માર્ગદર્શન પૂર્વક આ ગ્રંથમાળામાં નવા નવા ગ્રંથો પ્રગટ થતા રહે છે.

વ્યવહારસૂત્ર નિર્યુક્તિ-ભાષ્ય અને પૂ.આ.શ્રી મલયગિરિસૂરિ મ.સા.ની ટીકા સાથે ઘણાં વર્ષો બાદ પ્રગટ થઈ રહ્યું છે.

તાડપત્રીય વગેરે વિવિધ પ્રતો અને આગમપ્રભાકર મુનિશ્રી પુણ્યવિજયજી મ.સા.એ તૈયાર કરાવેલ સામગ્રીના આધારે પૂ.આ.ભ. શ્રીમુનિચન્દ્રસૂરિ મ.સા.એ સંશોધન-સંપાદન કાર્ય કર્યું છે.

વ્યવહારસૂત્ર છેદગ્રંથ છે. સાધુ-સાધ્વીજીના પ્રાયશ્ચિત્ત વગેરે વિષયો આમાં આવતા હોવાથી એનું વાંચન-પઠન અધિકારપ્રાપ્ત મુનિઓ જ ગુરુ આજ્ઞા મુજબ કરી શકે.

ગ્રંથ ઘણો વિશાળ હોવાથી એ છ ભાગોમાં બહાર પડે છે. વિહારમાં વાંચન કરતાં પૂ. મુનિ ભગવંતોની જરૂરિયાતને ધ્યાનમાં લઈ પ્રતાકારે પણ થોડી નકલો પ્રકાશિત થઈ રહી છે.

આ અતિ મહત્ત્વના ગ્રંથનું સારી રીતે સંશોધન થાય એ માટે સંપાદક આચાર્યશ્રીએ જુદા જુદા વિદ્વાન આચાર્ય ભગંવતો આદિને વિનંતી કરી હતી. સદ્‌ભાગ્યે વિવિધ વિદ્વાનોએ આ ગ્રંથને આત્મીયભાવે તપાસી આપ્યો છે. પૂ.આ.ભ.શ્રી રાજશેખરસૂરિ મ.સા. (પૂ. આ.ભ.શ્રી રામચન્દ્રસૂરિ મ.સા. સમુદાય), પૂ. આ.ભ.શ્રી કુલચન્દ્રસૂરિ મ.સા., પૂ.આ.શ્રી પુણ્યરત્નસૂરિ મ.સા., પૂ.આ.શ્રી યશોરત્નસૂરિ મ.સા.(પૂ. આ.શ્રી ભુવનભાનુસૂરિ મ.સા. સમુદાય), પં. મુક્તિચન્દ્ર વિ. ગણી., પં. મુનિચન્દ્ર વિ. ગણી (પૂ.આ.ભ.શ્રી કલાપૂર્ણસૂરિ મ.સા. સમુદાય) આદિએ ગ્રંથ સંશોધનમાં સહકાર આપ્યો છે. આમ અનેક વિદ્વાનોના સહકારથી સંશોધિત થતાં આ આગમગ્રંથને પ્રકાશન કરતાં અમે ગૌરવ અનુભવીએ છીએ.

અનેક સંઘોએ જ્ઞાનદ્રવ્યમાંથી પ્રકાશનનો લાભ લીધો છે. તે બધાના અમો આભારી છીએ.

લી. ટ્રસ્ટીગણ,

આ. ૐકારસૂરિ આરાધના ભવન.

# સંપાદકીય

વ્યવહારસૂત્ર(સટીક)ના આ છઠ્ઠા ભાગમાં વ્યવહારસૂત્રનો ૧૦મો ઉદ્દેશ એના ઉપરની નિર્યુક્તિ-ભાષ્ય ગાથા. ૩૮૧૦ થી ૪૬૭૫ અને તેના ઉપરની આ. શ્રી મલયગિરિસૂરિ મહારાજે રચેલી ટીકા વગેરે પ્રસિદ્ધ થઈ રહ્યા છે.

સંપાદન માટે ઉપયુક્ત હસ્તલિખિત પ્રતો વગેરેનો પરિચય અને ગ્રંથ-ગ્રંથકાર વિષેનો સંક્ષિપ્ત પરિચય વગેરે પ્રથમ ભાગના સંપાદકીયમાં આપવામાં આવ્યા છે. જિજ્ઞાસુઓએ ત્યાંથી જોઈ લેવા.

## વિશેષ

આગમપ્રકાશન સમિતિ બ્યાવર પ્રકાશિત "त्रिणि छेदसूत्राणि" માં વ્યવહારસૂત્ર અને હિંદીમાં અનુવાદ-વિવેચન પ્રગટ થયા છે. આમાં પૃ.૪૪૬માં ૧૦મા ઉદ્દેશના સૂત્ર૧૩ અને ૧૪ વચ્ચે એક સૂત્ર અધિક જોવામાં આવે છે તે આ પ્રમાણે છે.

"चत्तारि अंतेवासी पण्णत्ता, तं जहा- पव्वावणंतेवासी नामेगे, नो उवट्ठावणंते वासी १
उवट्ठवणंतेवासी नामेगे, नो पव्वावणंतेवासी २,



For Private And Personal

एगे पव्वावणंतेवासी वि उवट्ठावणंतेवासी वि ३,

एगे नो पव्वावणंतेवासी नो उवट्ठावणंतेवासी, धम्मंतेवासी ॥''

આ વિભાગમાં ગ્રંથના અંતે પરિશિષ્ટો આપવામાં આવ્યા છે.

## ઋણસ્વીકાર

પ્રસ્તુત વ્યવહારસૂત્રના સંશોધનમાં પાઠ શુદ્ધીકરણ વગેરેમાં જેઓએ આત્મીયભાવે સહાય કરી છે -

પૂ. આ. ભ. રાજશેખરસૂરિમ.સા., પૂ. આ.શ્રી કુલચન્દ્રસૂરિ મ.સા., આ. શ્રી પુણ્યરત્નસૂરિમ.સા. પૂ.આ.શ્રી. યશોરત્નસૂરિ મ.સા., પં. શ્રી મુક્તિચન્દ્રવિ. ગણી, પં. શ્રી મુનિચન્દ્રવિ. ગણી આદિના અમે ખૂબ ખૂબ ઋણી છીએ. આભાર.

લી.

પૂ. આ.ભ.શ્રી ભદ્રસૂરીશ્વરજી મ.સા.ના શિષ્યરત્ન

પૂ. મુનિરાજશ્રી **જિનચન્દ્રવિજય** મ.સા.ના વિનેય

આ. વિજય **મુનિચન્દ્રસૂરિ.**



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



## વિશેષ સૂચના

પોથી આકારે પ્રગટ થતાં આ ગ્રંથમાં પુસ્તક આકારના એક પેજનું મેટર બે પેજમાં લેવામાં આવ્યું છે. એટલે અનુક્રમણિકા વગેરેમાં પેજ નંબર બન્ને સંસ્કરણમાં સમાન રહે તે માટે પોથીમાં પેજ નંબર **A - B** એ પ્રમાણે આપ્યા છે.

એટલે પુસ્તકનું પેજ ૨= પોથીનું પેજ ૨**A** - ૨**B** સમજવું.

પરિશિષ્ટોમાં જ્યાં પંક્તિ નંબર દર્શાવ્યા છે. તે પોથીના **A - B** બાજુમાં સળંગ પંક્તિ નંબર ગણવાથી મળી રહેશે.

જેમ કે અવતરણસૂચિમાં 'तृस्त्रोऽवात्' પૃષ્ઠ ૬ પંક્તિ ૨માં છે તે પોથીમાં ૬**A** બાજુમાં છે 'શબ્દપ્રથા' પૃષ્ઠ ૬ પંક્તિ ૧૮માં બતાવેલ છે તે ૬**B** બાજુમાં છે.



For Private And Personal

# विषयानुक्रमः भाग-६

## उद्देश १०



| गाथा | विषयः | पेज |
|---|---|---|
| सूत्र १ | यवमध्यचन्द्रप्रतिमास्वरूपम् | १४८५-८७ |
| सूत्र २ | व्रजमध्यचन्द्रप्रतिमास्वरूपम् | १४८७-८८ |
| ३८११-१३ | **यवमध्य-वज्रमध्यस्वरूपम्** | १४८९-९० |
| ३८१४-२० | प्रतिमाधारणविधिः | १४९१-९२ |
| ३८२१-२३ | दिव्यादिउपसर्गस्वरूपम् | १४९३ |
| ३८२४ | आत्मसञ्चेतनीयस्वरूपम् | १४९३-९४ |
| ३८२५-२७ | उपसर्गसहने दृष्टान्तादिः | १४९४-९५ |
| ३८२८-३० | अनुलोम-प्रतिलोमउपसर्गाः | १४९५ |
| ३८३१-३६ | अज्ञातोञ्छस्वरूपम् | १४९६-९७ |
| ३८३७ | एकोपनीतस्वरूपम् | १४९८ |
| ३८३८-४१ | अन्यभिक्षाचराणामप्रीतित्यागः | १४९८-९९ |
| ३८४२ | सगर्भाहस्तेन भिक्षायां यतना | १४९९ |





For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir




| गाथा | विषयः | पेज |
|---|---|---|
| ३८४३-५५ | उम्बरातिक्रमणे दोषाः | १४९९-०२ |
| ३८५६-५९ | कारणे उम्बरातिक्रमणे यतना | १५०३ |
| सूत्र ३ | पञ्च व्यवहाराः | १५०४ |
| ३८६०-६२ | व्यवहारप्रकारादिः | १५०४-०५ |
| ३८६३-६४ | पूर्वस्य असति एव पाश्चात्येन व्यवहरणम् | १५०५-०६ |
| ३८६५-६६ | आज्ञाऽऽराधनादिस्वरूपम् | १५०६ |
| ३८६७-६८ | व्यवहर्त्तव्यस्वरूपम् | १५०७ |
| ३८६९ | आभवत्प्रायश्चित्तप्रकारादिः | १५०७ |
| ३८७०-८५ | क्षेत्रे आभवत्स्वरूपम् | १५०७-१२ |
| ३८८६-९५ | क्षेत्राभवने अपवादः | १५१२-१४ |
| ३८९६-९८ | असंस्तरणे मार्गणा | १५१४-१५ |
| ३८९९ | क्षेत्रिकाऽक्षेत्रिकाणां मार्गणा | १५१५ |
| ३९००-०२ | क्षेत्रानुज्ञापनाविधिः | १५१६ |
| ३९०३ | क्षेत्रानुज्ञापनायां यतना | १५१६ |
| ३९०४-०६ | वर्षाप्रायोग्योपधिग्रहणम् | १५१७ |




For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir




| गाथा | विषयः | पेज |
|---|---|---|
| ३९०७-०९ | प्राचीनार्वाचीनमर्यादा दृष्टान्तं च | १५१७-१८ |
| ३९१०-२० | पार्श्वस्थादीनां प्रकाराः | १५१८-२१ |
| ३९२१-२८ | क्षेत्रानुज्ञापनाया घोषणादिः | १५२१-२३ |
| ३९२९ | क्षेत्रप्रमाणम् | १५२३ |
| ३९३० | क्षेत्रव्यवहारः | १५२४ |
| ३९३१ | वृषभक्षेत्रप्रकारादिः | १५२४ |
| ३९३२-३६ | साधारणक्षेत्रे सीमाच्छेदः | १५२५ |
| ३९३७-४१ | श्रुतद्वारम् | १५२६-२७ |
| ३९३७-३९ | श्रुतोपसम्पत्प्रकारादिः | १५२६ |
| ३९४०-४२ | अभिधारणायाम् आभवनस्वरूपम् | १५२६-२७ |
| ३९४३ | षड् निर्मिश्राणि | १५२७ |
| ३९४४-४६ | मिश्रवल्ली | १५२८ |
| ३९४७-५१ | जीवति अभिधार्यमाणे व्यवहारः | १५२९-३० |
| ३९५२-५३ | कालगते अभिधार्यमाणे व्यवहारः | १५३०-३१ |
| ३९५४ | ज्ञान-दर्शनयोर्नव-नवभेदा | १५३१ |




For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir




| गाथा | विषयः | पेज |
|---|---|---|
| ३९५५-५६ | चारित्रार्थाभिधारणे विधिः | १५३१-३२ |
| ३९५७-५८ | प्राप्ते अभिधार्यमाणे विधिः | १५३२ |
| ३९६०-७१ | सुख-दुःखोपसम्पत्स्वरूपम् | १५३३-३६ |
| ३९७२-७८ | मार्गोपसम्पत् | १५३६-३८ |
| ३९७९-८४ | विनयोपसम्पत् | १५३८-४० |
| ३९८५-८८ | क्षेत्रादिषु आभवन्तिकव्यवहारः | १५४०-४१ |
| ३९८९-४००६ | **प्रायश्चित्तव्यवहारः** | १५४१-४६ |
| ३९९०-९२ | सचित्ताचित्त विषयकं प्रायश्चित्तम् | १५४१-४२ |
| ३९९३-९५ | क्षेत्रे काले च प्रायश्चित्तम् | १५४२-४३ |
| ३९९६-४००६ | भावविषयं प्रायश्चित्तम् | १५४३-४६ |
| ४००७ | पञ्चविधः व्यवहारः | १५४६ |
| ४००८-४०१० | **आगमव्यवहारः** | १५४६-४७ |
| ४००९९-४०१३ | प्रत्यक्षगमव्यवहारिणः | १५४६-४७ |
| ४०१४ | परोक्षागमव्यवहारिणः | १५४७-४८ |
| ४०१५-२१ | आगम व्याख्यानम् | १५४८-५० |




For Private And Personal

| गाथा | विषयः | पेज |
|---|---|---|
| ४०२२-२६ | वणिग्दृष्टान्तादिः | १५५०-५१ |
| ४०२७-२८ | श्रुतज्ञानिस्वरूपादिः | १५५१ |
| ४०२९-३२ | प्रायश्चित्तविधिः | १५५२-५३ |
| ४०३३-३४ | आलोचनायां गुणाः | १५५३-५४ |
| ४०३५-४० | सहसादिभावेन प्रतिसेवननिवेदनम् | १५५४-५५ |
| ४०४१-४९ | आगमविमर्श स्वरूपम् | १५५५-५७ |
| ४०५०-५९ | आलोचनार्हस्वरूपम् | १५५७-५९ |
| ४०६०-४१०४ | द्वात्रिंशत्स्थानस्वरूपम् | १५५९-७० |
| ४०६०-४१०४ | **अष्टप्रकारा गणिसम्पद्** | १५५९-७० |
| ४०६३-६६ | आचारसम्पद् - १ | १५६० |
| ४०६७-७० | श्रुतसम्पद् - २ | १५६१ |
| ४०७१-७४ | शरीरोपसम्पद् - ३ | १५६२ |
| ४०७५-७७ | वचनसम्पद् - ४ | १५६३ |
| ४०७८-८३ | वाचनासम्पद् - ५ | १५६४-६५ |
| ४०८४-९० | मतिसम्पद् - ६ | १५६५-६६ |

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir




| गाथा | विषयः | पेज |
|---|---|---|
| ४०९१-९५ | प्रयोगमतिसम्पद् - ७ | १५६७-६८ |
| ४०९६-४१०४ | संग्रहपरिज्ञासम्पद् - ८ | १५६८-७० |
| ४१०५-३६ | षट्त्रिंशत्स्थानानि | १५७०-७७ |
| ४१११ | विनयप्रतिपत्तिः | १५७१ |
| ४११२-१९ | आचारविनयः | १५७१-७३ |
| ४१२०-२२ | श्रुतविनयः | १५७३ |
| ४१२३-३५ | विक्षेपणाविनयः | १५७४-७७ |
| ४१३७-४२ | आगमव्यवहारिस्वरूपम् | १५७७-७९ |
| ४१४३-५१ | आगमव्यवहारीणामभावे प्रायश्चित्ताभावस्य शङ्का | १५७९-८१ |
| ४१५२-५९ | प्रायश्चित्ताभावशङ्काया निराकरणम् | १५८१-८३ |
| ४१५३ | प्रायश्चित्तनिर्यूहणम् पूर्वतः | १५८१ |
| ४१६१-६३ | अष्टविधं प्रायश्चित्तम् | १५८४ |
| ४१६४-७४ | निर्ग्रन्थपञ्चकादिषु प्रायश्चित्तसंख्या | १५८५-८७ |
| ४१७६-८३ | निरपेक्षप्रायश्चित्ते दोषाः | १५८७-८९ |
| ४१८४-९१ | सापेक्षप्रायश्चित्ते गुणाः | १५८९-९२ |




For Private And Personal

| गाथा | विषयः | पेज |
|---|---|---|
| ४१८८-९१ | सापेक्ष निरपेक्षयोर्दृष्टान्तौ | १५९१-९२ |
| ४१९२-९९ | ज्ञान-दर्शन-चारित्रैर्तीर्थम् | १५९२-९४ |
| ४२००-४२०२ | **निर्यापकाः** | १५९४ |
| ४२०३-४३७० | **भक्तपरिज्ञाविधिः** | १५९५-१६४४ |
| ४२०८-४३६० | **निर्व्याघातिममरणविधिः** | १५९६-१६४२ |
| ४२१८-३० | संलेखनास्वरूपम् | १५९९-०३ |
| ४२३१-४४ | अगीतार्थपार्श्वे अनशनस्वीकारे दोषाः | १६०३-०६ |
| ४२४५-५२ | असंविग्नपार्श्वे दोषाः | १६०७-०८ |
| ४२५३-५५ | एकमात्रनिर्यापके दोषाः | १६०८-०९ |
| ४२५६-५९ | आभोगद्वारम् | १६१०-११ |
| ४२६०-६१ | अन्यद्वारम् | १६११-१२ |
| ४२६२-६४ | गच्छपृच्छानन्तरं भक्तपरिज्ञाप्रतिपत्तिः | १६१२-१३ |
| ४२६५-७४ | द्वयोर्गच्छाऽनशनिनोः परीक्षा | १६१३-१६ |
| ४२७६-९० | गुरुसमीपे आलोचना | १६१७-२१ |
| ४२८२-८८ | अतिचारालोचना | १६१९-२१ |

| गाथा | विषयः | पेज |
|---|---|---|
| ४२८९-९० | विस्मरणे आलोचनाविधिः | १६२१-२२ |
| ४२९१-९५ | ध्यानव्याघातकराणि स्थानानि | १६२२-२३ |
| ४२९६-९९ | प्रशस्तवसतिद्वारम् | १६२४-२५ |
| ४३००-०३ | निर्यापकाः | १६२५-२६ |
| ४३०८-१२ | चरिमाहारस्वरूपम् | १६२६-२९ |
| ४३१३-१४ | क्रमशः आहारस्तोकता | १६२९-३० |
| ४३१८-२१ | निर्जरा | १६३१ |
| ४३२२-२४ | संस्तारकस्वरूपम् | १६३२ |
| ४३२५-३९ | उद्वर्तनादिः | १६३३-३६ |
| ४३२८-३९ | उपदेशः | १६३४-३६ |
| ४३४०-४२ | असमाधौ यतना | १६३६-३७ |
| ४३४३-५३ | यतनायां दृष्टान्तविधिः | १६३७-४० |
| ४३५४-५५ | चिह्नकरणम् | १६४० |
| ४३५६-५९ | व्याघाते उपायाः | १६४१-४२ |
| ४३६० | अपराक्रमभक्तप्रत्याख्यानम् | १६४२ |

| गाथा | विषयः | पेज |
|---|---|---|
| ४३६१-७० | बालमरणम् | १६४२-४४ |
| ४३७१-७४ | इङ्गिनीमरणम् | १६४५ |
| ४३७५-४४०९ | **पादपोपगमनमरणम्** | १६४५-५५ |
| ४३९७-४४१० | दृष्टान्ताः | १६५२-५५ |
| ४४११-१७ | **श्रुतव्यवहारः** | १६५५-५७ |
| ४४१८-२२ | आज्ञाव्यवहारः | १६५७-५८ |
| ४४२३-३५ | शिष्यपरीक्षाः | १६५८-६१ |
| ४४३६-४० | अतिचारालोचनम् | १६६१-६२ |
| ४४४१-४२ | दर्पसेवनस्वरूपम् | १६६२-६३ |
| ४४४३-४६ | कल्पिकाप्रतिसेवना २४ | १६६३-६४ |
| ४४४७-७० | आलोचनाक्रमः स्थापनाभङ्गादिः | १६६४-७० |
| ४४७१-८२ | सङ्केतेन प्रायश्चित्तदानम् | १६७०-७२ |
| ४४८३-४५०० | **धारणाव्यवहारः** | १६७३-७६ |
| ४४८८ | धारणाव्यवहारयोग्यः | १६७३-७५ |
| ४४९६ | प्रकारान्तरेण धारणाव्यवहारः | १६७६ |

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir




| गाथा | विषय: | पेज |
|---|---|---|
| ४५०१-३३ | जीतव्यवहार: | १६७७-८४ |
| ४५१८-२१ | प्रायश्चित्तम् | १६८१-८२ |
| ४५२४ | सावद्यजीतनिषेध: | १६८२ |
| ४५२८-३३ | शोधिकरजीतेन व्यवहर्त्तव्यम् | १६८३-८४ |
| सूत्र ४ | पुरुषजातसूत्रम् | १६८४ |
| ४५३६-४७ | चत्वार: पुरुषजाता: | १६८५-८८ |
| ४५३८-४७ | दृष्टान्त: सोपनय: | १६८६-८८ |
| सूत्र ५ | गणार्थकारिण: | १६८८ |
| ४५४८-५१ | चत्वार: गणार्थकारिण: | १६८८-८९ |
| सूत्र ६ | गणसङ्ग्रहकरा: | १६८९ |
| ४५५२-५३ | चत्वार: सङ्ग्रहकरा: | १६८९ |
| सूत्र ७ | गणशोभाकरा: | १६९० |
| ४५५४-५५ | गणशोभाकरा: चत्वार: | १६९० |
| सूत्र ८ | गणशोधिकरा: | १६९० |
| ४५५६-५७ | चत्वार: गणशोधिकरा: | १६९०-९१ |




For Private And Personal

| गाथा | विषय: | पेज |
| --- | --- | --- |
| सूत्र ९ | वेश-धर्मचतुर्भङ्गी | १६९१ |
| ४५५८-६१ | लिङ्ग-रत्नत्रयचतुर्भङ्गी | १६९१-९२ |
| सूत्र १० | गणसंस्थिति-धर्मयोश्चतुर्भङ्गी | १६९३ |
| ४५६२-६५ | गणमर्यादादिः | १६९३ |
| सूत्र ११ | प्रियधर्म-दृढधर्मयोश्चतुर्भङ्गी | १६९४ |
| ४५६६-६९ | प्रियधर्म-दृढस्वरूपम् | १६९४-९५ |
| सूत्र १२ | प्रव्राजनाचार्य-उपस्थापनाचार्यचतुर्भङ्गी | १६९५ |
| ४५७०-७४ | धर्माचार्य-प्रव्राजनाचार्य-उपस्थापनाचार्याः | १६९५-९६ |
| सूत्र १३ | उद्देशनाचार्य-वाचनाचार्यौ | १६९६ |
| ४५७५ | चतुर्भङ्गी | १६९६ |
| सूत्र १४ | अन्तेवासी चतुर्भङ्गी | १६९७ |
| ४५७६-७७ | अन्तेवासीत्रयस्वरूपम् | १६९७ |
| सूत्र १५ | स्थविरभूमयः | १६९८ |
| ४५७८-८२ | स्थविरत्रयस्य सेवा | १६९८-९९ |
| सूत्र १६ | शैक्षभूमय : ३ | १६९९ |

| गाथा | विषयः | पेज |
|---|---|---|
| ४५८३-८७ | भूमित्रयस्वरूपम् | १६९९-१७०० |
| ४५८८-४६०१ | परिणामकस्वरूपम् | १७००-१७०६ |
| ४५९३ | ज्ञानावरणभेदा : १० | १७०२ |
| ४५९४-४६०३ | इन्द्रिय-विज्ञानयोरावरणाः | १७०२-०४ |
| ४६०४-०९ | चरित-कल्पितदृष्टान्तयोजना | १७०४-०६ |
| ४६१०-२५ | जड्डस्वरूपम् | १७०६-०९ |
| सूत्र १७-१८ | क्षुल्लकदीक्षा | १७०९ |
| ४६२६-२८ | ऊनाष्टवर्षस्य दीक्षादाननिषेधः | १७०९-१० |
| ४६२९-३२ | अपवादे दीक्षादानम् | १७१०-११ |
| सूत्र १९-२० | नीशीथाध्ययनयोग्यवयः | १७११ |
| ४६३३-३५ | अव्यञ्जनजातस्य निषेधः | १७११-१२ |
| सूत्र २१ | त्रिवर्षश्रमणपर्यायस्य निशीथयोग्यता | १७१२ |
| सूत्र २२ | चतुवर्षपर्यायस्य सूत्रकृताङ्गयोग्यता | १७१२ |
| सूत्र २३ | पञ्चवर्षपर्यायस्य दशा-कल्प-व्यवहारयोग्यत्वम् | १७१२ |
| सूत्र २४ | ६ तः ९ वर्षपर्यायास्य स्थानाङ्गसमवाययोग्यत्वम् | १७१२ |

| गाथा | विषयः | पेज |
|---|---|---|
| सूत्र २५ | दसवर्षपर्यायस्य व्याख्याप्रज्ञप्तियोग्यता | १७१२ |
| ४६३६-३८ | श्रमणपर्याये आगमयोग्यता | १७१३ |
| सूत्र २६ | एकादशवर्षपर्यायस्य-क्षुल्लिकाविमानप्रविभक्त्यादियोग्यता | १७१४ |
| ४६३९-४० | एकादशवर्षपर्यायस्य विविधागमयोग्यता | १७१४ |
| सूत्र २७ | द्वादशवर्षपर्यायस्य अरुणोपपातादियोग्यत्वम् | १७१४ |
| ४६४१-४३ | अरुणोपपतादीनां महिमा | १७१४-१५ |
| सूत्र २८ | त्रयोदशवर्षपर्यायस्य उत्थानश्रुतादियोग्यता | १७१५ |
| ४६४४-४६ | उत्थानश्रुतादीनां प्रभावः | १७१५ |
| सूत्र २९ | चतुर्दशवर्षपर्यायस्य महास्वप्नभावनायोग्यता | १७१६ |
| ४६४७ | अत्र स्वप्नवर्णनविचारः | १७१६ |
| सूत्र ३० | पञ्चदशवर्षपर्यायस्य चारणभावनायोग्यत्वम् | १७१६ |
| ४६४८ | अत्र चारणलब्धिप्राप्तिः | १७१६ |
| सूत्र ३१ | १६ वर्षपर्यायस्य तेजोनिसर्गयोग्यता | १७१६ |
| सूत्र ३२ | १७ वर्षपर्यायस्य आशीविषभावनायोग्यत्वम् | १७१६ |

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir




| गाथा | | विषयः | पेज |
| --- | --- | --- | --- |
| | सूत्र ३३ | १८ वर्षपर्यायस्य दृष्टिविषभावना | १७१७ |
| | सूत्र ३४ | १९ वर्षपर्यायस्य दृष्टिवादाङ्गम् | १७१७ |
| | सूत्र ३५ | २० वर्षपर्यायस्य सर्वश्रुतम् | १७१७ |
| ४६४९-५१ | | तेजोनिसर्गादीनाम् अतिशयाः | १७१७ |
| ४६५२ | | प्रकीर्णकसंख्या | १७१८ |
| ४६५३-५५ | | योग्यसमये सूत्रदाने लाभः | १७१८ |
| | सूत्र ३६ | दशविधं वैयावृत्त्यम् | १७१९ |
| ४६५६-७० | | त्रयोदशप्रकारैः वैयावृत्त्यम् | १७१९-२२ |
| ४६७१-७३ | | ज्ञाननय-चारित्रनयौ | १७२२-२४ |
| ४६७४-७५ | | उपसंहार | १७२५ |
| | | टीकाकृत्प्रशस्तिः | १७२५ |


॥ उद्देश १० सम्पूर्णः ॥



For Private And Personal

# व्यवहारसूत्रग्रन्थस्य विभागव्यवस्था

| भाग | ग्रन्थः | भाष्यगाथाटीकासहिता | पृष्ठ |
|---|---|---|---|
| १ | पीठिका | गाथा १-१८२ | १ (A) - १०८ (B) |
| २ | उद्देश १ | गाथा १८३-९६३ | १०९ (A) - ५१२ (B) |
| ३ | उद्देश २-३ | गाथा ९६४-१७१० | ५१३ (A) - ७९२ (B) |
| ४ | उद्देश ४-५-६ | गाथा १७११-२८१३ | ७९३ (A) -११६८ (B) |
| ५ | उद्देश ७-८-९ | गाथा २८१४-३८०९ | ११६९ (A) -१४८४ (B) |
| ६ | उद्देश १० | गाथा ३८१०-४६७५ | १४८५ (A) -१७२५ (B) |

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



# આચાર્યશ્રી ૐકારસૂરિ જ્ઞાનમંદિર ગ્રંથાવલી

**પ્રભુવાણી પ્રસાર સ્થંભ - ૧,૧૧,૧૧૧**

- શ્રી સમસ્ત વાવ પથક જૈન શ્વે. મૂ. પૂ. સંઘ - ગુરુમૂર્તિ પ્રતિષ્ઠા સ્મૃતિ
- શેઠશ્રી ચંદુલાલ કકલચંદ પરીખ પરિવાર. વાવ-બનાસકાંઠા.
- શ્રી સિદ્ધગિરિ ચાતુર્માસ આરાધના (સં. ૨૦૫૭) દરમ્યાન થયેલ જ્ઞાનખાતાની આવકમાંથી. હસ્તેઃશેઠશ્રી ધુડાલાલ પુનમચંદ હેક્કડ પરિવાર. ડીસા બનાસકાંઠા
- શ્રી ધર્મોત્તેજક પાઠશાળા શ્રી ઝીંઝુવાડા જૈન સંઘ. ઝીંઝુવાડા.
- શ્રી સુઈગામ જૈન સંઘ. સુઈગામ (વાવ પથક) બનાસકાંઠા.
- શ્રી વાંકડિયા વડગામ જૈન સંઘ. વાંકડિયા વડગામ.
- શ્રી ગરાંબડી જૈન સંઘ. ગરાંબડી (વાવપથક) બનાસકાંઠા.
- શ્રી રાંદેરરોડ જૈન સંઘ - સુરત.
- શ્રી ચિંતામણી પાર્શ્વનાથ જૈન સંઘ - પાર્લા (ઇસ્ટ), મુંબઇ.
- શ્રી આદિનાથ તપાગચ્છ શ્વેતામ્બર મૂ.પૂ. જૈન સંઘ, કતારગામ-સુરત.
- શ્રી કૈલાસનગર જૈન સંઘ, કૈલાસનગર, સુરત.
- શ્રી ઉચોસણ જૈન સંઘ, સમુબા શ્રાવિકા આરાધના ભવન, સુરત જ્ઞાનખાતેથી

**પ્રભુવાણી પ્રસારક - ૬૧,૧૧૧**

- શ્રી દિપા શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘ, રાંદેરરોડ, સુરત.

**પ્રભુવાણી પ્રસાર અનુમોદક - ૩૧,૧૧૧**

- શ્રી મોરવાડા જૈન સંઘ, મોરવાડા (વાવ પથક) બનાસકાંઠા
- શ્રી ઉમરા જૈન સંઘ, સુરત.
- શ્રી શત્રુંજય ટાવર જૈન સંઘ, સુરત.
- શ્રી ચૌમુખજી પાર્શ્વનાથ જૈન મંદિર ટ્રસ્ટ, શ્રી જૈન શ્વેતાંબર તપાગચ્છ સંઘ - ગઢસિવાના (રાજ.)
- શ્રીમતી તારાબેન ગગલદાસ વડેચા-ઉચાસણ
- શ્રી સુખસાગર અને મલ્હાર એપાર્ટમેન્ટ સુરતની શ્રાવિકાઓ તરફથી
- રવિજ્યોત એપાર્ટમેન્ટ, સુરતની શ્રાવિકાઓ તરફથી
- અઠવાલાઈન્સ જૈન સંઘ, પાંડવબંગલો, સુરત શ્રાવિકાઓ તરફથી
- શ્રી આદિનાથ તપાગચ્છ શ્વે.મૂર્તિપૂજક જૈન સંઘ, કતારગામ, સુરત.
- શ્રીમતી વર્ષાબેન કર્ણાવત, પાલનપુર

**પ્રભુવાણી પ્રસાર ભક્ત - ૧૫,૧૧૧**

- શ્રી દેશલપુર (કંઠી) અજીતનાથ જૈન દેરાસર (શ્રી પાર્શ્વચંદ્ર ગચ્છ જૈન સંઘ) કચ્છ-ગુજરાત. મુનિરાજશ્રી ભુવનચન્દ્રજી મ.સા.ની પ્રેરણાથી.
- પૂજ્ય મુનિશ્રી ભુવનચન્દ્રજી મ.સા.ની પ્રેરણાથી શ્રી પાર્શ્વચન્દ્રસૂરિશ્વર ગચ્છ સંઘ-ધ્રાંગધ્રા (ગુજરાત.)
- શ્રી અઠવાલાઈન્સ જૈન સંઘ, સુરત શ્રાવિકા ઉપાશ્રય



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ श्रीशङ्खेश्वरपार्श्वनाथाय नमः ॥

श्रीसिद्धि-विनय-भद्र-जनक-विलास-ॐकार-जिनचन्द्र-सद्गुरुभ्यो नमः

श्रीमन्मलयगिरिसूरि विरचितविवरणयुत निर्युक्ति-भाष्यसमेतम्

# श्री व्यवहारसूत्रम्

## भाग ६

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ ॐ नमो जिनाय ॥ ॐ नमो वीतरागाय ॥

॥ अर्हं नमः ॥

श्रीमन्मलयगिरिविरचितविवरणयुतनिर्युक्ति-भाष्यसमेतम्

# श्री व्यवहारसूत्रम्

## ॥ दशम उद्देशकः ॥

For Private And Personal

तदेवं व्याख्यातो नवम उद्देशकः सम्प्रति दशम आरभ्यते। तत्र चेदमादिसूत्रम्-

सूत्रम्—दो पडिमाओ, पण्णत्ताओ, तं जहा-

१. जवमज्झा य चंदपडिमा, २. वइरमज्झा य चंदपडिमा।

जवमज्झं णं चंदपडिमं पडिवन्नस्स अणगारस्स निच्चं मासं वोसट्ठकाए चियत्तदेहे जे केइ परीसहोवसग्गा समुप्पज्जेज्जा दिव्वा वा, माणुस्सगा वा, तिरिक्खजोणिया वा, अणुलोमा वा, पडिलोमा वा, तत्थ अणुलोमा ताव वंदेज्जा वा, नमंसिज्जा वा, सक्कारेज्जा वा, सम्माणेज्जा वा, कल्लाणं मंगलं देवयं चेइयं पज्जुवासेज्जा, तत्थ पडिलोमा ताव अन्नयरेणं दंडेण वा, अट्ठिणा वा, जोत्तेण वा, वेत्तेण वा, कसेण वा काए आउट्टेज्जा, ते सव्वे उप्पन्ने सम्मं सहइ, खमइ, तितिक्खेइ, अहियासेइ।

जवमज्झं णं चंदपडिमं पडिवन्नस्स अणगारस्स,

सुक्कपक्खस्स पाडिवए से कप्पइ एगा दत्ती भोयणस्स पडिगाहेत्तए, एगा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



पाणस्स, सव्वेहिं दुप्पयचउप्पयाइएहिं आहार-कंखीहि सत्तेहिं पडिणियत्तेहिं, अन्नायउंछं सुद्धोवहडं निज्जूहित्ता बहवे समण जाव वणीमगा।

कप्पइ से एगस्स भुंजमाणस्स पडिग्गाहेत्तए नो दोण्हं, नो तिण्हं, नो चउण्हं, नो पंचण्हं। नो गुव्विणीए, नो बालवच्छाए, नो दारगं पेज्जमाणीए, नो अंतो एलुयस्स दो वि पाए साहट्टु दलमाणीए, नो बाहिं एलुयस्स दोवि पाए साहट्टु दलमाणीए।

अह पुण एवं जाणेज्जा-एगं पायं अंतो किच्चा, एगं पायं बाहिं किच्चा एलुयं विक्खम्भइत्ता दलयइ, एवं से कप्पइ पडिग्गाहित्तए।

बिइयाए से कप्पइ दोण्णि दत्तीओ भोयणस्स पडिगाहेत्तए, दोण्णि पाणस्स।

तइयाए से कप्पइ तिण्णि दत्तीओ भोयणस्स पडिगाहेत्तए, तिण्णि पाणस्स।

चउत्थीए से कप्पइ चउ दत्तीओ भोयणस्स पडिगाहेत्तए, चउ पाणस्स।

पंचमीए से कप्पइ पंच दत्तीओ भोयणस्स पडिगाहेत्तए, पंच पाणस्स।

छट्ठीए से कप्पइ छ दत्तीओ भोयणस्स पडिगाहेत्तए, छ पाणस्स।

सत्तमीए से कप्पइ सत्त दत्तीओ भोयणस्स पडिगाहेत्तए, सत्त पाणस्स।



For Private And Personal

अट्ठमीए से कप्पइ अट्ठ दत्तीओ भोयणस्स पडिगाहेत्तए, अट्ठ पाणस्स।

नवमीए से कप्पइ नव दत्तीओ भोयणस्स पडिगाहेत्तए, नव पाणस्स।

दसमीए से कप्पइ दस दत्तीओ भोयणस्स पडिगाहेत्तए, दस पाणस्स।

एगारसमीए से कप्पइ एगारस दत्तीओ भोयणस्स पडिगाहेत्तए, एगारस पाणस्स।

बारसमीए से कप्पइ बारस दत्तीओ भोयणस्स पडिगाहेत्तए, बारस पाणस्स।

तेरसमीए से कप्पइ तेरस दत्तीओ भोयणस्स पडिगाहेत्तए, तेरस पाणस्स।

चोद्दसमीए से कप्पइ चोद्दस दत्तीओ भोयणस्स पडिगाहेत्तए, चोद्दस पाणस्स।

पन्नरसमीए से कप्पइ पन्नरस दत्तीओ भोयणस्स पडिगाहेत्तए, पन्नरस पाणस्स।

बहुलपक्खस्स पाडिवए से कप्पइ चोद्दस दत्तीओ भोयणस्स पडिगाहेत्तए, चोद्दस पाणस्स।

बिइयाए से कप्पइ तेरस दत्तीओ भोयणस्स पडिगाहेत्तए, तेरस पाणस्स।

तइयाए से कप्पइ बारस दत्तीओ भोयणस्स पडिगाहेत्तए, बारस पाणस्स।

चउत्थीए से कप्पइ एक्कारस दत्तीओ भोएयणस्स पडिगाहेत्तए, एक्कारस पाणस्स।
पंचमीए से कप्पइ दस दत्तीओ भोयणस्स पडिगाहेत्तए, दस पाणस्स।
छट्ठीए से कप्पइ नव दत्तीओ भोयणस्स पडिगाहेत्तए, नव पाणस्स।
सत्तमीए से कप्पइ अट्ठ दत्तीओ भोयणस्स पडिगाहेत्तए, अट्ठ पाणस्स।
अट्ठमीए से कप्पइ सत्त दत्तीओ भोयणस्स पडिगाहेत्तए, सत्त पाणस्स।
नवमीए से कप्पइ छ दत्तीओ भोयणस्स पडिगाहेत्तए, छ पाणस्स।
दसमीए से कप्पइ पंच दत्तीओ भोयणस्स पडिगाहेत्तए, पंच पाणस्स।
एक्कारसमीए से कप्पइ चउ दत्तीओ भोयणस्स पडिगाहेत्तए, चउ पाणस्स।
बारसमीए से कप्पइ तिण्णि दत्तीओ भोयणस्स पडिगाहेत्तए, तिण्णि पाणस्स।
तेरसमीए से कप्पइ दो दत्तीओ भोयणस्स पडिगाहेत्तए, दो पाणस्स।
चउदसीए से कप्पइ एगा दत्ती भोयणस्स पडिगाहेत्तए, एगा पाणस्स।
अमावासाए से य अभत्तट्ठे भवइ।

एवं खलु जवमज्झचंदपडिमा अहासुत्तं जाव आणाए अणुपालिया[1] भवइ॥ १ ॥

वइरमज्झं णं चंदपडिमं पडिवन्नस्स अणगारस्स निच्चं[2] मासं वोसट्ठकाए चियत्तदेहे जे केइ परीसहोवसग्गा समुप्पज्जेज्जा जाव अहियासेज्जा।

वइरमज्झं णं चंदपडिमं पडिवन्नस्स अणगारस्स,

बहुलपक्खस्स पाडिवए से कप्पइ पन्नरस दत्तीओ भोयणस्स पडिगाहेत्तए, पन्नरस पाणस्स जाव एलुयं विक्खंभइत्ता दलयइ एवं से कप्पइ पडिग्गाहित्तए।

बिइयाए से कप्पइ चउद्दस दत्तीओ भोयणस्स पडिगाहेत्तए, चउद्दस पाणस्स।

तइयाए से कप्पइ तेरस दत्तीओ भोयणस्स पडिगाहेत्तए, तेरस पाणस्स।

चउत्थीए से कप्पइ बारस दत्तीओ भोयणस्स पडिगाहेत्तए, बारस पाणस्स।

पंचमीए से कप्पइ एगारस दत्तीओ भोयणस्स पडिगाहेत्तए, एगारस पाणस्स।

छट्ठीए से कप्पइ दस दत्तीओ भोयणस्स पडिगाहेत्तए, दस पाणस्स।

सत्तमीए से कप्पइ नव दत्तीओ भोयणस्स पडिगाहेत्तए, नव पाणस्स।

---

१. ०लित्ता श्यु. ॥ २. निच्चं- नाति. श्यु.॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अट्ठमीए से कप्पइ अट्ठ दत्तीओ भोयणस्स पडिगाहेत्तए, अट्ठ पाणस्स।
नवमीए से कप्पइ सत्त दत्तीओ भोयणस्स पडिगाहेत्तए, सत्त पाणस्स।
दसमीए से कप्पइ छ दत्तीओ भोयणस्स पडिगाहेत्तए, छ पाणस्स।
एगारसमीए से कप्पइ पंच दत्तीओ भोयणस्स पडिगाहेत्तए, पंच पाणस्स।
बारसमीए से कप्पइ चउ दत्तीओ भोयणस्स पडिगाहेत्तए, चउ पाणस्स।
तेरसमीए से कप्पइ तिन्नि दत्तीओ भोयणस्स पडिगाहेत्तए, तिन्नि पाणस्स।
चउदसमीए से कप्पइ दो दत्तीओ भोयणस्स पडिगाहेत्तए, दो पाणस्स।
अमावासाए से कप्पइ एगा दत्तीओ भोयणस्स पडिगाहेत्तए, एगा पाणस्स।
सुक्कपक्खस्स पाडिवए से कप्पइ दो दत्तीओ भोयणस्स पडिगाहेत्तए, दो पाणस्स।
बिइयाए से कप्पइ तिन्नि दत्तीओ भोयणस्स पडिगाहेत्तए, तिन्नि पाणस्स।
तइयाए से कप्पइ चउ दत्तीओ भोयणस्स पडिगाहेत्तए, चउ पाणस्स।
चउत्थीए से कप्पइ पंच दत्तीओ भोयणस्स पडिगाहेत्तए, पंच पाणस्स।
पंचमीए से कप्पइ छ दत्तीओ भोयणस्स पडिगाहेत्तए, छ पाणस्स।

सूत्र २
गाथा
३८१०-३८१२
द्वे
चन्द्रप्रतिमे



For Private And Personal

छट्ठीए से कप्पइ सत्त दत्तीओ भोयणस्स पडिगाहेत्तए, सत्त पाणस्स।

सत्तमीए से कप्पइ अट्ठ दत्तीओ भोयणस्स पडिगाहेत्तए, अट्ठ पाणस्स।

अट्ठमीए से कप्पइ नव दत्तीओ भोयणस्स पडिगाहेत्तए, नव पाणस्स।

नवमीए से कप्पइ दस दत्तीओ भोयणस्स पडिगाहेत्तए, दस पाणस्स।

दसमीए से कप्पइ एगारस दत्तीओ भोयणस्स पडिगाहेत्तए, एगारस पाणस्स।

एगारसमीए से कप्पइ बारस दत्तीओ भोयणस्स पडिगाहेत्तए, बारस पाणस्स।

बारसमीए से कप्पइ तेरस दत्तीओ भोयणस्स पडिगाहेत्तए, तेरस पाणस्स।

तेरसमीए से कप्पइ चउद्दस दत्तीओ भोयणस्स पडिगाहेत्तए, चउद्दस पाणस्स।

चउद्दसमीए से कप्पइ पन्नरस दत्तीओ भोयणस्स पडिगाहेत्तए, पन्नरस पाणस्स। पुण्णिमाए से य अभत्तट्ठे भवइ।

एवं खलु एसा वइरमज्झा चंदपडिमा अहासुत्तं जाव आणाए अणुपालिया[1] भवइ ॥२॥



---

१. ०पालित्ता श्यु.॥

'दो पडिमातो पण्णत्ता। तं जहा-जवमज्झा य चंदपडिमा १ वयरमज्झा य चंदपडिमा २' इत्यादि। अस्य सम्बन्धप्रतिपादनार्थमाह-

**पगया अभिग्गहा खलु, एस उ दसमस्स होइ संबंधो।**
**संखा य समणुवत्तइ, आहारे वा[1]वि अहिगारो ॥ ३८१० ॥**

**प्रकृताः खलु** नवमोद्देशके चरमसूत्रेष्व**भिग्रहाः**, अत्रापि त एवाभिग्रहाः प्रतिपाद्या इत्ये**षः दशमस्य** दशमोद्देशकादिसूत्रस्य **सम्बन्धः**। अथवा नवमोद्देशके चरमानन्तरसूत्रे आहारे याऽभिहिता **सङ्ख्या** साऽत्रा**प्यनुवर्त्तते**, ततः **आहार**विषयसङ्ख्याप्रस्तावाद् दशमोद्देशकादिसूत्रस्य **अधिकारः** प्रवृत्तिः ॥ ३८१० ॥

सूत्राक्षराणि सामान्यतः सुप्रतीतानि। विशेषतस्तु **भाष्य**कारो व्याख्यानयति—

**जवमज्झ-वइरमज्झा१, वोसट्ठ२चियत्त३ तिविह तीहिं तु४।**
**दुविहे वि सहइ सम्मं५, अणाउंछे य निक्खेवो६ ॥ ३८११ ॥** दारगाहा ॥



---
१. वा अहीगारो- इति पु. प्रे ॥

**यवमध्येति** पदं **वज्रमध्येति** पदं तथा **व्युत्सृष्ट** इति **त्यक्त** इति **त्रिविध**मुपसर्गं **त्रिभिः**, मनो-वाक्-कायैः **सम्यक् सहते**। यदि वा **द्विविधान्** उपसर्गान् अनुलोम-प्रतिलोमरूपान् त्रिभिस्सम्यक् सहते। तथा **अज्ञातोञ्छे निक्षेप** इति व्याख्येयम्। एष द्वारगाथासङ्क्षेपार्थः॥ ३८११ ॥

साम्प्रतमेनामेव विवरीषुः प्रथमतो यवमध्येति वज्रमध्येति च व्याख्यानयति—

**उवमा जवेण चंदेण वावि जवमज्झचंदपडिमाए।**
**एमेव य बिइयाए, वइरं वज्जं ति एगट्ठं ॥३८१२॥**

**यवमध्यचन्द्रप्रतिमायाः यवेनोपमा चन्द्रेण** च, यवस्येव मध्यं यस्याः सा यवमध्या चन्द्राकारा प्रतिमा चन्द्रप्रतिमेति व्युत्पत्तेः। **एवमेव द्वितीयाया** अपि वक्तव्यम्। वज्रमध्य-चन्द्रप्रतिमाया वज्रेणोपमा चन्द्रेण च, वज्रस्येव मध्यं यस्याः सा वज्रमध्या चन्द्राकारा प्रतिमा चन्द्रप्रतिमा। प्राकृतमधिकृत्य वज्रशब्दस्य पर्यायेण व्याख्यानमाह– **वज्जं वेरं ति एगट्ठं**। इयमत्र भावना–शुक्लपक्षस्य प्रतिपदि चन्द्रविमानस्य पञ्चदशभागीकृत्य एका कला दृश्यते, द्वितीयायां

द्वे कले, तृतीयायां तिस्रः कलाः, एवं यावत् पञ्चदश्यां परिपूर्णाः पञ्चदशकलाः। ततो बहुलपक्षस्य प्रतिपदि एकया कलया ऊनो दृश्यते, द्वितीयायां त्रयोदश, तृतीयस्यां द्वादश, यावदमावास्यायामेकाऽपि न दृश्यते। तदेवमयं मास आदौ ऊनो मध्ये सम्पूर्णोऽन्ते पुनरपि परिहीनः, यवोऽप्यादावन्ते च तनुको मध्ये विपुलः, एवं साधुरपि भिक्षां गृह्णाति-शुक्लपक्षस्य प्रतिपदि एकाम्, द्वितीयस्यां द्वे, तृतीयस्यां तिस्रः, यावत् पञ्चदश्यां पञ्चदश, ततो बहुलपक्षस्य प्रतिपदि पुनश्चतुर्दश, द्वितीयायां त्रयोदश, यावच्चतुर्दश्यामेकाम्, अमावास्यायामुपोषितः। ततश्चन्द्राकारतया चन्द्रप्रतिमा, आदावन्ते च भिक्षायास्तनुत्वाद् मध्ये विपुलत्वाद् यवमध्योपमितमध्यभागा [यवमध्या] तथा चामुमेव यवमध्यां चन्द्रप्रतिमामधिकृत्यान्यत्रोक्तम्-

*एकैकां वर्द्धयेद् भिक्षां शुक्ले, कृष्णे च हापयेत्।*
*भुञ्जीत नाऽमावास्याया-मेष चान्द्रायणो विधिः ॥ १ ॥*

वज्रमध्यायां चन्द्रप्रतिमायां बहुलपक्ष आदौ क्रियते तत एवं भावना-बहुलपक्षस्य प्रतिपदि चन्द्रविमानस्य चतुर्दश कला दृश्यन्ते, द्वितीयस्यां त्रयोदश, तृतीयस्यां द्वादश, यावच्चतुर्दश्यामेका, अमावास्यामेकाऽपि न, ततः पुनरपि शुक्लपक्षस्य प्रतिपदि चन्द्रविमानस्यैका कला दृश्यते,

द्वितीयायां द्वे, यावत् पञ्चदश्यां पञ्चदशापि,तदयं मास आदावन्ते पृथुलो मध्ये तनुकः, वज्रमप्यादावन्ते च विपुलं मध्ये तनुकम्, एवं साधुरपि भिक्षां गृह्णाति बहुलपक्षस्य प्रतिपदि चतुर्दश, द्वितीयस्यां त्रयोदश, तृतीयस्यां द्वादश, यावच्चतुर्दश्यामेकाम् अमावास्यामुपवसति, ततः पुनरपि शुक्लपक्षस्य प्रतिपदि एकां भिक्षां गृह्णाति, द्वितीयस्यां द्वे, यावत् पञ्चदश्यां पञ्चदशेति, तत एषाऽपि चन्द्राकारतया चन्द्रप्रतिमा आदावन्ते च विपुलतया मध्ये च तनुकतया वज्रमध्योपमितमध्यभागा वज्रमध्या ॥ ३८१२॥

एतदेव यवमध्यचन्द्रप्रतिमामधिकृत्य सूचयन्नाह—

**पन्नरसेव उ काउं, भागे ससिणं तु सुक्कपक्खस्स।**
**जा वड्ढयए दत्ती, [1]हवेइ ता चेव कालेणं॥ ३८१३॥**

**शशिनं** शशिविमानं **पञ्चदश भागान् कृत्वा** यथा **शुक्लपक्षस्या**ऽऽदित आरभ्य कला प्रतिदिवसं वर्द्धते एवं **दत्तयो**ऽपि प्रतिपदि आरभ्य **या वर्द्धयते ता एव कालेन** कृष्णेन पक्षेण **हापयेत्**। एवं विपरीतक्रमेण वज्रमध्यचन्द्रप्रतिमायामपि द्रष्टव्यम्॥ ३८१३॥

---

१. हावति - ला. ॥

**भत्तट्ठिओ व खमओ, इयरदिणे तासि होइ पट्ठवतो।**
**चरिमे असद्धवं पुण, होइ अभत्तट्ठमुज्जवणं ॥ ३८१४॥**

**तयोः** यवमध्य-वज्रमध्यप्रतिमयोः **प्रस्थापकः** आरम्भकः **इतरस्मिन्** आरम्भकदिवसात् पाश्चात्ये **दिने भक्तार्थी वा भवति क्षपको वा, चरमे** चरमदिवसे **पुन**र्भक्तविषये **अश्रद्धावान्** श्रद्धामपि न करोति। एतद् यवमध्यचन्द्रप्रतिमामधिकृत्योक्तं वेदितव्यम्। **उद्यापनं** पुनर्द्वयोरपि प्रतिमयोर**भक्तार्थ**मवसेयम् ॥ ३८१४॥

**संघयणे परियाए, सुत्ते अत्थे य जो भवे बलितो।**
**सो पडिमं पडिवज्जइ, जवमज्झं वइरमज्झं च ॥ ३८१५॥**

**संहनने** आद्यत्रयस्यान्यतमस्मिन्। **पर्याये** जन्मतो जघन्यत एकोनत्रिंशति वर्षेषु उत्कर्षतो देशोनायां पूर्वकोट्याम्, प्रव्रज्यापर्यायेण जघन्यतो विंशतौ वर्षेषु उत्कर्षतो देशोनायां पूर्वकोट्याम्। सूत्रमर्थश्च जघन्यतो नवमस्य पूर्वस्य तृतीयमाचारवस्तु उत्कर्षतः किञ्चिन्न्यूनानि दश पूर्वाणि। एवं संहनने पर्याये सति **यः सूत्रे अर्थे च भवति बलिकः** बलीयान् **सः प्रतिमां यवमध्यां**

**वज्रमध्यां च प्रतिपद्यते** ॥ ३८१५॥

तदेवं यवमध्या वज्रमध्येति गतम् १। इदानीं 'नित्यं व्युत्सृष्टकायः' इतिपदं व्याख्यायते—

**निच्चं दिया व रातो, य पडिमकालो व जत्तितो भणितो।**
**दव्वम्मि य भावम्मि य, वोसट्ठं तत्थिमं दव्वे॥ ३८१६॥**

**नित्यं** सदा **दिवा रात्रौ च,** अथवा **यावान् प्रतिमाकालो भणितः** तावन्तं कालं व्युत्सृष्टकायः। तच्च **व्युत्सृष्टं** द्विधा-**द्रव्ये भावे च। तत्र द्रव्ये इदं** वक्ष्यमाणम्॥ ३८१६॥

तदेवाह—

**असिणाणभूमिसयणा, अविभूसा कुलवधू पउत्थधवा।**
**रक्खइ पइस्स सेज्जं, अणिकामा दव्ववोसट्ठा॥ ३८१७ ॥**

**कुलवधूः प्रोषितधवा अस्नाना भूमिशयना अकृतविभूषा** एवं **द्रव्यव्युत्सृष्टा** अद्रव्या **द्रव्यानिकामा** सकामा **पत्युः शय्यां रक्षति** ॥ ३८१७॥

एतद् द्रव्यव्युत्सृष्टम्। भावव्युत्सृष्टमाह—

**वातिय-पित्तिय-संभियरोगायंकेहि तत्थ पुट्ठो वि।**
**न कुणति परिकम्मं सो, किंचि वि वोसट्ठदेहो उ ॥ ३८१८ ॥** दारं २।

तत्र यवमध्यायां वज्रमध्यायां वा चन्द्रप्रतिमायां स्थितो **वातिक-पैत्तिकश्लैष्मिकरोगातङ्कैः स्पृष्टोऽपि स व्युत्सृष्टदेहो न किञ्चिदपि परिकर्म करोति** २॥ ३८१८ ॥

सम्प्रति 'चियत्तदेहे' इति व्याख्यायते। तच्च त्यक्तं द्विधा-द्रव्यतो भावतश्च। तत्र द्रव्यत आह—



**जुद्धपराजिय अट्टण, फलहियमल्ले निरुत्त-परिकम्मे।**
**गूहण[१] मच्छियमल्ले, तइयदिणे दव्वतो चत्तो ॥ ३८१९॥**

इदं कथानकं प्रबन्धेनाऽऽवश्यकटीकायामुक्तम्, इह तु ग्रन्थगौरवभयान्न लिख्यते,

---

१. गहणं म° खं. वा. ॥

ततस्तस्मादवधारणीयम्। अक्षरयोजना त्वेवम्-**अट्टनो** नाम मल्ल उज्जयनीवास्तव्यः सोपारे पट्टने वृद्धतया **युद्धे पराजितः**। तेनाऽन्यः फलहीमल्लो नाम मल्लो मार्गितः। स सोपारके मात्सिकमल्लेन सह युद्धं दत्तवान्। तत्र **फलहीमल्ले निरुक्तं**-निरवशेषं **परिकर्म** क्रियते। इतरस्तु **मात्सिकमल्लो** गर्वाध्माततया शरीरपीडां **गूहयन्** न किमपि परिकर्म कारितवान्। ततः परिकर्माऽकारणतस्**तृतीये दिने** मारितः। तेन परिकर्माकारणतो यस्त्यक्तो देहः स **द्रव्यतस्त्यक्तः** ॥ ३८१९ ॥

भावत्यक्तमाह—

**बंधिज्ज व रुंभेज्ज व, कोई व हणेज्ज अहव मारेज्ज।**
**वारेइ न सो भयवं, चियत्तदेहो अपडिबद्धो ॥ ३८२० ॥** दारं ३।



प्रतिमाप्रतिपन्नो **भगवान्** शरीरेऽप्यप्रतिबद्धो यदि **कोऽपि बध्नीयात्, अथवा रुन्ध्यात्,** यदि वा **हन्याद्** मारयेद्वा, तथापि तं **न निवारयति** एष भावतस्त्यक्तदेहः ३ ॥ ३८२० ॥ सम्प्रति 'जे केइ उवसग्गा' इति व्याख्यानार्थमाह—

**दिव्वादि तिन्नि चउहा, बारस एवं तु होंति उवसग्गा।**
**वोसट्टुग्गहणेणं, आयासंचेयणग्गहणं ॥ ३८२१॥**

उपसर्गास्त्रिविधाः। तद्यथा- **दिव्याः** मानुषाः तैर्यग्योन्याश्च ३। एते त्रयोऽपि प्रत्येकं **चतुर्द्धा। एवं तु** सर्वसङ्ख्यया **भवन्त्युपसर्गा द्वादश।** ननु चतुर्था आत्मसञ्चेतनीया अप्युपसर्गा भवन्ति ते कस्मात् सूत्रकृता नोक्ता तत आह **व्युत्सृष्टग्रहणेन आत्मसञ्चेतन**ग्रहणम् ॥ ३८२१॥

तत्र दिव्याद्युपसर्गभेदानाह—

**हासा१पदोस२वीमंस३, पुढोवेमाय४ दिव्वया चउरो१।**
**हास१प्पदोस२वीमंस३कुसीला४ नरगया चउहा२॥ ३८२२॥**



**दिव्यका** उपसर्गा**श्चत्वारः**। तद्यथा-**हासात्** क्रीडात इत्यर्थः१। **प्रद्वेषात्** अवज्ञा-पूर्वभवसम्बन्धादिकृतात्२। **विमर्शात्** किमयं स्वप्रतिज्ञातश्चलति न वा? इत्येवंरूपात्३। **पृथग्विमात्रातो** नाम किञ्चिद् हासतः किञ्चित् प्रद्वेषतः किञ्चिद् विमर्शतः४। **नरगताः** मनुष्यगता उपसर्गा **चतुर्द्धा**। तद्यथा-**हासात्१ प्रद्वेषात्२ विमर्शात्३ कुसीलत्ति** पदैकदेशे

पदसमुदायोपचारात् कुशीलप्रतिसेवनात इति द्रष्टव्यम्४। तत्र हास-प्रद्वेष-विमर्शाः प्राग्वत्। पृथग्विमात्रापक्षस्यात्र हासादिष्वेवान्तर्भावत्वान्न विवक्षणम्। कुशीलस्य प्रतिसेवनासमाश्रयणं कुशीलप्रतिसेवना। ततो यथा ईर्ष्यालोः प्रोषितस्य गृहे रात्रावुषितस्य तद्भार्याचतुष्टयतः ॥ ३८२२ ॥

**भयतो१ पदोस२ आहारहेउ३ तहऽवच्च-लेणरक्खट्ठा४।**
**तिरिया होंति चउद्धा, एए तिविहा उ उवसग्गा ३ ॥ ३८२३ ॥**

तैरश्चा भवन्त्युपसर्गाश्चतुर्द्धा। तद्यथा-भयतो यथा भयेन श्वादिर्दशति१ प्रद्वेषतो यथा चण्डकौशिको[1] मर्कटादिर्वा२। आहारहेतोर्यथा सिंहादिः३। अपत्यलयनरक्षणार्थं यथा काक्यादिः४। एते त्रिविधा उपसर्गा उक्ताः ॥ ३८२३ ॥

सम्प्रति ये व्युत्सृष्टग्रहणेनाऽऽत्मसञ्चेतनीया गृहीतास्तानुपदर्शयति—

**घट्टण१ पवडण२ थंभण३, लेसण४ चउहा उ आयसंचेया।**
**ते पुण सन्निवयंती, वोसट्ठद्दारे ण इहं तु ॥ ३८२४ ॥**



---

१. चन्द्रकौशिको - खं. ॥

चतुर्धा आत्मना सञ्चेत्यन्ते-क्रियन्ते इत्यात्मसञ्चेत्याः। तद्यथा-**घट्टनतः१ प्रपतनतः२ स्तम्भनतः३ श्लेष्मतश्च४**। तत्र घट्टनतो यथा चक्षुषि रजः प्रविष्टं तेन च चक्षुर्दुःखयितुमारब्धम्, अथवा स्वयमेव चक्षुषि गलके वा किञ्चित् खीलप्रभृति समुत्थितं घट्टयति१। प्रपतनतो यथा मन्दप्रयत्नेन चङ्क्रम्यमाणः प्रपतति ततो दुःखायते२। स्तम्भनतो यथा तावदुपविष्ट आस्ते यावत् पादः सुप्तः स्तब्धो जातः३। श्लेष्मणतो यथा पादं तावदाकुञ्च्य स्थितो यावत् तत्र वातेन लग्नः। अथवा नृत्यं शिक्षयामीति किञ्चिदङ्गमतिशयेन नामितं तच्च तत्रैव लग्नमिति४। **ते पुनः** आत्मसञ्चेतनीया **व्युत्सृष्टद्वारे निपतन्ति, न इह**। 'ते उप्पन्ने सम्मं सहति खमइ तितिक्खइ अहियासेइत्ति' चत्वार्यप्येकार्थिकानि पदानि ॥ ३८२४॥

तत्र सम्यक्सहनमाह—



**मण-वयण-कायजोगेहिं तिहि ऊ दिव्वमादिए तिन्नि।**
**सम्मं अहियासेई, तत्थ उ सुण्हाए दिट्ठंतो ॥ ३८२५ ॥**

**त्रिभिर्मनो-वाक्कायययोगैः** प्रत्येकं **दिव्यादीन् त्रीन्** उपसर्गान् प्रत्येकं चतुर्भेदान् **सम्यग् अध्यास्ते** सहते। तत्र सहनं द्विधा-द्रव्यतो भावतश्च। **तत्र** द्रव्यसहने **स्नुषाया दृष्टान्तः**॥

३८२५ ॥

तमेवाह—

**सासू-ससुरुक्कोसा, देवर-भत्तारमादि मज्झिमगा।**
**दासादी य जहन्ना, जह सुण्हा [1]सहिय उवसग्गा ॥ ३८२६ ॥**

**श्वसुरः श्वश्रूः** एतौ **उत्कृष्टौ,** पूज्यत्वात्। **देवर-भर्तृप्रभृतिका मध्यमाः। दासादयो जघन्याः। यथा** तत्कृता **उपसर्गाः स्नुषा ( षया ) सोढाः** [तथा] साधुनाऽपि सोढव्याः। इयमत्र भावना-स्नुषया अपराधे कृते तां श्वशुरः श्वस्रूश्च हीलयति, सा च हील्यमाना अतीव लज्जते, यद्यपि तानि दुःखोत्पादकानि वचनानि दुरध्यासानि तथापि सा तानि सम्यगध्यास्ते चिन्तयति च-'यदि न सम्यग् अध्यासिष्ये ततः कुलस्य मे विध्वंसो भविष्यति, स्नुषाचारश्चाऽपयास्यति'। देवरा अपि चोल्लुण्ठवचनानि भाषन्ते यद्यपि तेषां सा न लज्जते तथापि न तानुल्लुण्ठति, किन्तु सम्यग् तद्वचनान्यध्यास्ते। दासा अपि च तां स्नुषामुल्लुण्ठयन्ति तथापि 'किमेतेषां वचनान्यहं



---

१. सहइ- ला. ॥

गणयामि'? इत्यवगणय्य सम्यगध्यास्ते, न प्रतिवचनं ददाति। एतद् द्रव्यसहनम्। भावसहनं यत् साधुः द्वादशविधानप्युपसर्गान् कर्मविनिर्जरणार्थं सम्यगध्यास्ते ॥ ३८२६ ॥

एतदेवाह—

**सासुससुरोवमा खलु, दिव्वा दियरोवमा य माणुस्सा।**
**दासत्थाणी तिरिया, तह सम्मं सोऽहियासेइ ॥ ३८२७॥** दारं ४।

तथा वधूदृष्टान्तोक्तप्रकारेण **श्वश्रूश्वशुरोपमान्** दिव्यानुपसर्गान्, **देवरोपमान् मानुषान्** उपसर्गान्, **दासस्थानीयान् तैरश्चान्** उपसर्गान् **सम्यगध्यास्ते** ४ ॥ ३८२७॥

सम्प्रति "दुविहे व" इत्यस्य व्याख्यानार्थमाह—

**दुहा वेते समासेण, सव्वे सामन्नकंटगा।**
**विसयाणुलोमिया चेव१, तहेव पडिलोमिया२ ॥ ३८२८॥**

अथवा **एते** उपसर्गाः श्रामण्यस्य कण्टका इव **श्रामण्यकण्टकाः** सर्वे **समासेन द्विधा** प्रतिपादिताः। तद्यथा-**विषयानुलोमिका** इन्द्रियविषयानुलोमिकाः१ **तथैव प्रातिलोमिकाः**

इन्द्रियविषयप्रातिलोमिकाः ॥ ३८२८ ॥

तानेव दर्शयति—

**वंदण-सक्कारादी, अणुलोमा१ बंध-वहण पडिलोमा २।**
**[1]ते वि य खमई सव्वे, एत्थं रुक्खेण दिट्ठंतो ॥ ३८२९ ॥**

**वन्दन-सत्कारादयोऽनुलोमाः। बन्ध-वधप्रभृतयः प्रतिलोमाः, तानपि सर्वान् क्षमते। अत्र वृक्षेण दृष्टान्तः** ॥ ३८२९ ॥

तमेवाह—



**वासी-चंदणकप्पो, जह रुक्खो ईय सुह-दुहसमो ३।**
**राग-द्दोसविमुक्को, सहई अणुलोम-पडिलोमे ॥ ३८३० ॥**

वासी-चन्दनकल्पा यस्य स **वासीचन्दनकल्पः**। अथवा कल्पस्तुल्यवाची, ततोऽयमर्थः

१. तेच्चिय-ला. ॥

**वास्यां** वास्या तक्षणे, **चन्दने**-चन्दनेनानुलेपने कल्पस्तुल्यो वासी-चन्दनकल्पो **यथा वृक्षो** भवति **इति** एवममुना प्रकारेण **राग-द्वेषविमुक्तः** अत एव **सुख-दुःखसमोऽनुलोम-प्रतिलोमान्** उपसर्गान् सम्यग् **सहते ५** ॥ ३८३० ॥

साम्प्रतं "अन्ना[य]उंछं" इत्यस्य व्याख्यानमाह—

**अन्नाउंछं दुविहं, दव्वे१ भावे य होइ नायव्वं।**
**दव्वुंछं णेगविहं लोगरिसीणं मुणेयव्वं ॥ ३८३१ ॥**

**अज्ञातोञ्छं द्विविधम्।** तद्यथा–द्रव्ये१भावे२ च। तत्र **द्रव्योञ्छमनेकविधं लोकर्षीणां** तापसानां **ज्ञातव्यम्**॥ ३८३१ ॥



तदेवानेकविधं द्रव्योञ्छमाह—

**उक्खल खलए दव्वी, दंडे संडासए य पोत्ती य ।**
**आमे पक्के य तहा, दव्वोंछे होइ निक्खेवो ॥ ३८३२ ॥** ॥ दारं

For Private And Personal

तापसा उञ्छवृत्तय **उदूखले** छटितेषु तन्दुलेषु ये परिशाटिताः शालि-तन्दुलादयः तानुच्चित्य रन्धन्ति। **खलएत्ति खले** धान्ये मर्दिते संव्यूढे च यत् परिशटितं तद् उच्चिन्वन्ति। **दव्वीति** धान्यराशेर्यदेक**दर्व्या** उत्पाट्यते तद् गृह्णन्ति, एवमन्यत्रापि प्रतिदिवसम्। **दंडत्ति** स्वामिनमनुज्ञाप्य यद् धान्यराशेरेकया यष्ट्या उत्पाट्यते तद् गृह्णन्ति, एवमन्यत्रापि प्रतिदिवसम्। **संडासए** इति अङ्गुष्ठप्रदेशिनीभ्यां यद् गृह्यते शाल्यादिकं तावन्मात्रं प्रतिगृहं गृह्णन्ति, यद्यपि बहुकं पश्यन्ति शाल्यादि तथापि न मुष्टिं भृत्वा गृह्णन्ति। **पोत्ती य** त्ति स्वामिनमनुज्ञाप्य धान्यराशौ पोतिं क्षिपन्ति तत्र यत् पोतौ लगति तद् गृह्णन्ति, एवमन्यत्रापि। **तथा आमं पक्कं** वा यच्चरकादयो भिक्षाप्रविष्टा मृगयन्ते। एष **भवति द्रव्योञ्छे निक्षेपः** ५॥ ३८३२॥

सम्प्रति भावोञ्छमाह—

**पडिमापडिवन्ने एस भयवमज्ज किर एत्तिया दत्ती।**
**आदियति त्ति न नज्जइ, अन्नाउंछं तवो भणितो ॥ ३८३३॥**

**प्रतिमाप्रतिपन्न एष भगवान् अद्य किल एतावतीर्दत्तीरादत्ते इति न ज्ञायते**, तेन तस्य भगवतस्**तपोऽज्ञातोञ्छं भवति**॥ ३८३३॥

एतदेव सविस्तरं भावयति—

**दव्वादभिग्गहो[1] सो, दव्वे सुद्धुंछमेत्तिया दत्ती।**
**एलुगमेत्तं खेत्ते, गेण्हइ तइयाए कालम्मि॥ ३८३४॥**

**तद्** अज्ञातोञ्छं तपो **द्रव्याद्यभिग्रहः** द्रव्याभिग्रहः१ क्षेत्राभिग्रहः२ कालाभिग्रहो३ भावाभिग्रहश्च ४। तत्र **द्रव्ये** द्रव्याभिग्रहो यत् **शुद्धमुञ्छं** गृह्णाति। शुद्धं नाम अलेपकृत्। तदपि शुद्धम् उञ्छं गृह्णाति उपनीतं नानुपनीतम्,[एतेन]पञ्चानामाद्यानां पिण्डैषणानामग्रहणम्, उपरितन्योश्च द्वयोरेकतरस्या अभिग्रह इत्यावेदितं द्रष्टव्यम्। तथा **एतावत्यो दत्तयो**ऽद्य मया ग्राह्याः, एष द्रव्याभिग्रहः१। **क्षेत्रे** क्षेत्रविषयोऽभिग्रहो यद् **एलुकमात्रं** विष्कम्भ्य **गृह्णाति**। अत्रापीयं सामाचारी यदि द्वावपि पादावेलुकस्यान्तस्तदा न कल्पते, तत्रेदं कारणम्-यद्युच्च एलुकस्तदा दायकस्य पादौ प्रतिष्ठितौ न दृश्येते, किं बीजादौ प्रतिष्ठितौ उत न? इति यदि नीचे एलुके पाश्चात्यपादः पतितः शुध्यति, यथा न बीजादौ प्रतिष्ठित इति तदा कल्पते, अत्युच्चे तु न कल्पते इति २। **काले** कालाभिग्रहे **तृतीयस्यां** पौरुष्यां यद् भिक्षामटति ३॥ ३८३४॥ सम्प्रति द्रव्याभिग्रहे विशेषमभिधित्सुर्द्वारगाथामाह—



१. °हो खलु दव्वे- ला.॥

**अन्नाउंछं एगोवणीय१, निज्जूहिऊण समणादी२।**
**अगुव्विणी [1] अबालं ती३, एलुगविक्खंभणे दोसा४ ॥ ३८३५ ॥** दारगाहा।

स प्रतिमाप्रतिपन्नो भगवान् **अज्ञातोञ्छं** गृह्णाति, तदप्ये**केनोपनीतम्,** न द्विप्रभृतिभिः। तथा **श्रमणादीन्,** आदिशब्दाद् द्विपद-चतुष्पदादींश्च **निर्यूह्य** अतिवाह्य भिक्षामटति। तथा तां ददतीं भिक्षा**मगुर्विणी**मभ्युपगच्छति **अबालां** च क्षीराहारबालवर्जिताम्। तथा **एलुकविष्कम्भणे दोषा** भवन्ति, ते चाग्रे वक्ष्यन्ते। एष द्वारगाथासङ्क्षेपार्थः॥ ३८३५ ॥ साम्प्रतमेनामेव विवरीषुः प्रथमतोऽज्ञातोञ्छमाह—



**अन्नाउंछं च सुद्धं च, पंच काऊण [2] अग्गहं।**
**दिणे दिणे अभिगेण्हे, तासिमन्नयरीय उ ॥ ३८३६ ॥**

'**पञ्चानाम्** आद्यानां पिण्डैषणानाम् [3] अग्रहं कृत्वा **तयोः** अन्तिमयोरन्यतरस्याश्च ग्रहणं कृत्वा **दिने दिने अज्ञातोञ्छं शुद्धं चाभिगृह्णाति** ॥ ३८३६ ॥

१. अपायंती खं.॥ २. उग्गहं-पु. प्रे.॥ ३. अवग्रहं- पु. प्रे.। अग्रहणं-मु.॥

साम्प्रतम् एकोपनीतामित्यस्य व्याख्यानमाह—

**एक्कस्स भुंजमाणस्स, उवणीयं तु गेण्हति।**
**न गिण्हे दुगमादीणं, अचियत्तं तु मा भवे ॥ ३८३७॥** दारं १।

**एकस्य भुञ्जानस्य उपनीतं** स भगवान् **गृह्णाति, न द्विकादीनां** द्वयोस्त्रयाणां चतुर्णां पञ्चानां वा उपनीतं न **गृह्णाति**। कस्माद् इति चेत्?, **मा भूदप्रीतिरिति** हेतोः १॥ ३८३७॥

अधुना 'निज्जूहिऊण समणादी'॥ [गा.३८३५] इत्यस्य व्याख्यानमाह—

**अडंते भिक्खकालम्मि, घासत्थी वसभादयो[1]।**
**वज्जेइ होज्ज मा तेसिं, आउरत्तेण अप्पियं ॥ ३८३८॥**

**भिक्षाकाले वृषभादयो ग्रासार्थिनोऽटन्ति,** ततस्तान् **वर्जयति, मा तेषामातुरत्वेनाप्रीतिकं भूयादिति** हेतोः ॥ ३८३८॥

तदेवाह—



---

१. विसभा० पु. प्रे.॥

**दुपय-चउप्पय-पक्खी-किविणाऽतिहि-समण-साणमाईया।**
**निज्जूहिऊण सव्वे, अडई भिक्खं तु सो ताहे ॥ ३८३९॥**

भिक्षाकाले **द्विपदाश्चतुष्पदाः पक्षिणः कृपणा अतिथयः श्रमणाः श्वादयश्च** भिक्षार्थमटन्ति, **ततस्तान् सर्वान् निर्यूह्य** तदनन्तरं स भगवान् **भिक्षामटति**॥ ३८३९॥

कथमतिवाह्य? इत्यत आह—

**पुव्वं व चरइ तेसिं, नियट्टचारेसु वा अडइ पच्छा।**
**जत्थ भवे दोन्नि काला, चरती तत्थ अतिच्छिते ॥ ३८४०॥**

**'तेषां'** श्रमणादीनां **पूर्वं वा चरति,** यदि वा तेषु श्रमणादिषु **निवृत्तचारेषु** संवृत्तेषु **पश्चादटति**। एतच्च तस्मिन् क्षेत्रे द्रष्टव्यं यत्र त्रयो भिक्षाकालाः। **यत्र तु द्वौ भिक्षाकालौ तत्र अतिच्छिते** अतिक्रान्ते श्रमणादौ **गच्छति** ॥ ३८४०॥

अथवा—

**अणारद्धे उ अन्नेसु, मज्झे चरति संजतो।**
**गेण्हंत-देंतयाणं तु वज्जयंतो अपत्तियं ॥ ३८४१ ॥** दारं २।

यदि प्रथमभिक्षाकालप्रारम्भे एव भिक्षामटति तदा दायकानामप्रीतिः। ततः प्रथमे भिक्षाकालेऽतिक्रान्तप्राये द्वितीये च भिक्षाकाले **अन्यैः** श्रमणादिभि**रनारब्धे मध्ये** स भगवान् प्रतिमाप्रतिपन्नः **संयतश्चरति**। कथम्भूतः सन् ? इत्याह— **गृह्णतां ददतां चाऽप्रीतिकं वर्जयन्** २ ॥ ३८४१ ॥

साम्प्रतं "अगुव्विणी" इत्यादि व्याख्यानयति—

**नवमासगुव्विणी खलु, गच्छो वज्जेइ इयर सव्वातो।**
**खीराहारं गच्छो, वज्जे इयरो[१] उ सव्वं पि ॥ ३८४२ ॥** दारं ३।

**नवमास-गुर्विणीं खलु गच्छः** गच्छवासी **वर्जयति। इतरः**

१. इयरो सव्वा उ- ला. मु.॥

गच्छनिर्गतप्रतिमाप्रतिपन्नादिकः **सर्वा** अपि गुर्विणीर्वर्जयति। तथा **गच्छः** गच्छवासी **क्षीराहारं** बालं **वर्जयति, इतरस्तु सर्वमपि** बालम् ३॥ ३८४२॥

साम्प्रतं "एलुगविक्खंभणे दोसा" इत्यस्य व्याख्यानमाह—

**गच्छगय-निग्गए वा, लहुगा गुरुगा य एलुगा परतो।**
**आणादिणो य दोसा, दुविहा य विराहणा इणमो ॥ ३८४३॥** दारं ४।

**एलुकाद्** उम्बरात् **परतः** साधुरतिगच्छति, उपलक्षणमेतत्, यदि साधुरेलुकं विष्कम्भयति, आसन्ने वा प्रदेशे एलुकस्य तिष्ठति तदा **गच्छ गतस्य** प्रायश्चित्तं चत्वारो **लघुकाः, गच्छनिर्गतस्य** चत्वारो **गुरुकाः**। तथा **आज्ञादयः** आज्ञाभङ्गादयो **दोषाः द्विविधा** च **विराधना** आत्मविराधना संयमविराधना च **इयं** वक्ष्यमाणा ॥ ३८४३॥

तामेवाह—

**संक१ ग्गहणे२ इच्छा३, दुनिविट्ठा४ अवाउडा५।**
**निहिणु६ क्खणण७ विरेगे८, तेणे९ अविदिन्न१० पाहुडे११ ॥ ३८४४॥**

**बंध१२ वहे१३ उद्दवणे१४, य खिंसणा१५ आसियावणा१६ चेव।**
**उव्वेग१७ कुरुंडिय[1]१८, दीणा१९ अविदिन्नवज्जणया ॥ ३८४५ ॥** दारगाहाओ ॥

एलुकात् परतो यदि गच्छति तदा स्तैन्ये मैथुने वा लोकस्य **शङ्का** स्यात्, तदनन्तरं च **ग्रहणम्**। तथा यस्या गृहमभ्यन्तरं प्रविष्टस्तस्या विषये 'अस्य साधोः किन्नु **इच्छा** येनाभ्यन्तरं गत?' इति लोकस्य शङ्का स्यात्। तथा **दुर्निविष्टा अप्रावृता** वा मध्ये अगारी स्यात् तस्या लज्जा स्यात्, दोषाश्चान्ये शङ्कादयः। तथा मध्ये गृहस्वामी हिरण्यादेर्**निधानं** करोति **उत्खननं** वा, यदि वा परस्परं **विरेचनम्**, तत्र '**स्तेनो**ऽयम्' इति शङ्का स्यात्। तथा अतिभूमिप्रवेशनं तीर्थकृद्भिर्गृहस्थैश्चाऽ**वितीर्ण**मननुज्ञातम्, ततो अदत्तादानदोषः। 'तस्मात् कस्मादतिभूमिमेष प्रविष्टः?' इति गृहस्थः **प्राभृतम्** अधिकरणं कुर्यात् ॥ ३८४४ ॥

तथा **बन्धं** निगडादिभिः। **वधं** कशादिभिस्ताडनम्। **अपद्रावणं** जीविताद् व्यपरोपणम्। तथा **खिंसना** हीलना यथैते वराका अलभमाना अन्तः प्रविशन्ति **आसियावणा चेव** त्ति आसियावणा नाम निष्काशयितुमासादनम्। किमुक्तं भवति? गले गृहीत्वा बहिर्वने निक्षिपति।

गाथा ३८४५-३८५१ उम्बरतिक्रमणे दोषाः १५०० (A)

१. कुरुंडिए दीणा-पु.प्रे. ॥

तथा स व्रती षिड्ग इव प्रविष्टस्तासामगारीणा**मुद्वेजको** भवति। तथा **कुरुण्डितो** नाम उपचारक इत्युच्यते, तं शङ्कमाना गृहिणो वध-बन्धादीनि कुर्युः **दीना** अदत्तदाना। एतैः कारणै**रवितीर्णस्या**तिभूमिप्रवेशनस्य **वर्जना**। एष द्वारगाथाद्वयसमासार्थः॥ ३८४५॥

साम्प्रतमेतदेव विवरीषुः प्रथमतः शङ्काद्वारमाह—

**पच्छित्ते आदेसा संकिय निस्संकिए य गहणादी ।**
**तेण्णि चउत्थे संकिय, गुरुगा निस्संकिए मूलं ॥ ३८४६॥ दारं १।**

एलुकात् परतः प्रवेशे [**स्तैन्ये**]स्तैन्यविषये **चतुर्थे** चतुर्थव्रतविषये वा शङ्का स्यात्। तस्यां च **शङ्कायां** सत्यां **निःशङ्किते** च जनस्य जाते **प्रायश्चित्ते** प्रायश्चित्तविषये **आदेशौ** प्रकारौ। तावेव दर्शयति—**शङ्किते** चत्वारो **गुरुकाः**, **निःशङ्किते मूल**मिति १। तथा **ग्रहणादयश्च** शङ्कायां दोषाः ॥ ३८४६॥

तानेव कथयति—

**गेण्हण कड्ढण ववहार पच्छकडुड्डाह तह य निव्विसए। दारं २।**
**किन्नु हु इमस्स इच्छा, अब्भिंतरमतिगतो जेणं ॥ ३८४७॥** दारं ३।

**ग्रहणं** स्तेनः पारदारिको वेति बुद्ध्या प्रतिग्रहणम्। ततो राजकुलं प्रति **कर्षणम्**। तदनन्तरं राजकुले **व्यवहरणम्**। ततः **पश्चात्कृत**करणं तु व्रतमोचनमित्यर्थः। एवं च सति महान् प्रवचनस्योड्डाहः। **तथा निर्विषय** आज्ञाप्येत। द्वारगाथायां तु "ग्रहणे" इति कर्षणादीनामुपलक्षणम्। गतं ग्रहणद्वारम् २। इच्छाद्वारमाह—**किन्नु** इति वितर्के, **हुः** इति निश्चितम्, यस्या **गृहमभ्यन्तरमतिगत**स्तस्या विषये **अस्य** साधो**रिच्छा येने**त्थमभ्यन्तरं सहसा प्रविष्ट इति ३॥ ३८४७॥

अधुना दुर्निविष्टा अप्रावृतेति पदद्वयं व्याख्यानयति—

**दुन्निविट्ठा व होज्जाही, अवाउडा वा अगारी उ।**
**लज्जिया सा वि होज्जाही, संका वा से समुब्भवे ॥ ३८४८॥**

मध्ये अगारी **दुर्निविष्टा वा भवेद् अप्रावृता वा** भवेत्, ततः सहसा साधोरभ्यन्तरप्रवेशे **साऽपि लज्जिता भवेत्। शङ्का वा से** तस्याः **समुद्भवेत्** ॥ ३८४८ ॥ **तामेवाह—**

**किं मन्ने घेत्तुकामो, एस ममं जेणऽतीति एदूरं ?।**
**अन्नो वा संकेज्जा, गुरुगा मूलं च निस्संके ॥ ३८४९॥**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**आउत्थ परा वावी, उभयसमुत्था व होज्ज दोसा उ** ॥ दारं ४-५।
**उक्खण निहण विरेगं व तत्थ किंची करेज्जाहि ॥३८५०॥**

**किं मन्ये एषः** संयतो **मां ग्रहीतुकामो येन** एतद्दूरमागच्छति ?, **अन्यो वा** एवं **शङ्केत**। तत्र शङ्कायां सत्यां तस्य प्रायश्चित्तं चत्वारो **गुरुकाः**। [१]**निःशङ्के** च तस्याः अन्यस्य वा जाते **मूलं** प्रायश्चित्तम्। **आत्मोत्थः परस्मात् उभयसमुत्था वा दोषा भवेयुः** ४-५। सम्प्रति "निहणुक्खणणं" इत्यादि व्याख्यानयति— **उक्खणणे**त्यादि। **तत्र** गृहस्थो गृहमध्ये हिरण्यादेरुत्खननं वा कुर्यात् **निधानं** परस्परं **विरेकं वा** विरेचनं **किञ्चित्** कुर्यात् ६-७-८॥ ३८४९॥ ३८५०॥ ततः किम्? इत्याह—

**दिट्ठं एएण इमं, साहेज्जा मा उ एस अन्नेसिं।** दारं ७-८॥
**तेणु त्ति व एसो ऊ, संका गहणाइ कुज्जाही ॥ ३८५१॥** दारं ९।



---

१. निःशङ्किते तस्याः- मु.॥

For Private And Personal

**दृष्टम् एतेन** साधुना इदं हिरण्यादि उत्खन्यमानादिकम्, ततो **मा एष अन्येषां** कथयेत यदि वा **एष स्तेनः इति शङ्कया ग्रहणादि** ग्रहण-वध-बन्धनादि **कुर्यात्** ९॥ ३८५१॥

साम्प्रत'मवितीर्ण'पदव्याख्यानार्थमाह—

**तित्थगर-गिहत्थेहिं, दोहि वि अतिभूमिपविसणमदिन्नं।** दारं १०।
**कीसेदूरमतिगतो ?, असंखडं बंध-वहमादी ॥ ३८५२॥** दारं ११ तः १४।

**तीर्थकरेण गृहस्थेन च द्वाभ्यामप्यतिभूमिप्रवेशनमदत्तम्।** तत्र तीर्थकरेणादत्तम् "**अतिभूमिं न गच्छेज्जा**" [दसवै. ५-१-२४] इत्यादिवचनात्, गृहस्थेनाऽप्रीतिकरणात् १०। प्राभृतादिद्वारकलापमाह—'**कस्मादेतद्दूरमयमागतः ?**' इति गृहस्थः **असङ्खडं** कलहं कुर्यात् ११। अतिरोषाद् **बन्धवधादिकं** च १२-१३-१४॥ ३८५२॥

सम्प्रति 'खिंसा'द्वारमाह—

**खिंसेज्ज व जह एए, अलभंत वराग अंतो पविसेंति।** दारं १५।
**गलए घेत्तूण वणम्मि निच्छुभिज्जा हि बाहिरतो ॥ ३८५३॥** दारं १६।

**खिंसेत** हीलयेद् गृहस्थो यथा—एते **वराका अलभमाना मध्ये प्रविशन्ति** १५। आसियावणाद्वारमाह—**गलके गृहीत्वा बहिर्वने निक्षिपेत्** १६॥ ३८५३॥

'उद्वेजक'द्वारमाह—

**ताओ य अगारीओ, वीरल्लेणं व तासिया सउणी।**
**उव्वेगं गच्छेज्जा, कुरुंडितो नाम उवचरओ ॥ ३८५४॥**

यथा **वीरल्लेण** धीवरेण [श्येनपक्षिणा] **त्रासिता शकुनिका** उद्वेगं गच्छति, तथा **ता अप्यगार्यः** सहसाऽन्तःप्रविष्टेन साधुना त्रासिताः सत्य **उद्वेगं गच्छेयुः** १७। कुरुण्टितद्वारमाह—**कुरुण्टितो नाम उपचारकः**, तदाशङ्कया वध-बन्धनादि कुर्यात् ॥ ३८५४॥

**अहवा भणेज्ज एते, गिहवासम्मि वि अदिट्ठकल्लाणा।**
**दीणा अदिन्नदाणा, दोसेते णाउ नो पविसे ॥ ३८५५॥**

**अथवा ब्रूयात्—गृहवासेऽप्येते अदृष्टकल्याणा दीना अदत्तदाना** आसीरन् तेन मध्ये प्रविशन्ति। उपसंहारमाह— **एतान् दोषान् ज्ञात्वा नो मध्ये प्रविशेत्** ॥ ३८५५॥

अत्र चोदकः प्राह—यदि एलुकविष्कम्भे एते दोषाः, अन्तःप्रविष्टे च सविशेषाः तत **एलुकविष्कम्भसूत्रम**फलं स्यात्

तत आह—

**उंबरविक्खंभम्मि वि, जति दोसा अतिगयम्मि सविसेसा।**
**तह वि अफलं न सुत्तं, सुत्तनिवातो इमो जम्हा ॥ ३८५६ ॥**

**यद्यपि उम्बरविष्कम्भे दोषाः, अतिगते** मध्यप्रवेशे **सविशेषाः, तथापि सूत्रमफलं न** भवति। **यस्मादयं सूत्रनिपातः** सूत्रविषयः ॥ ३८५६ ॥

तमेव दर्शयति—

**उज्जाण घडा-सत्थे, सेणा-संवट्ट-वय-पवादी वा।**
**बहिनिग्गमणे जन्ने, भुंजइ य जहिं पहियवग्गो ॥ ३८५७ ॥**

**उज्जाण**त्ति औद्यानिक्यां निर्गतो जन उद्याने **भुङ्क्ते घटा**भोज्यं नाम महत्तराऽनुमहत्तरादिः बहिरावासितः। **सार्थः** वणिक्सार्थः। **सेना** स्कन्धावारः। **संवर्त्तः** नाम यत्र विषमादौ भयेन

लोकस्संवर्त्तीभूतः तिष्ठति। **व्रजिका** गोकुलम्। **प्रपा** पानीयशाला। **सभा** ग्राम्यजनसमवायस्थानम्। एतेषु स्थानेषु ये भुञ्जते जनाः। तथा **बहिर्निर्गमने, यज्ञे** यज्ञपाटे वा, **यत्र वा पथिकवर्गो** भुङ्क्ते, एतेषु स्थानेषु प्रतिमाप्रतिपन्नो हिण्डते ॥ ३८५७॥

तत्रानेन विधिना ग्रहीतव्यम्—

**पासट्ठिगो एलुगमेत्तमेव पासति न चेयरे दोसा।**
**निक्खमणपविसणे वि य, अचियत्तादी जढा एवं ॥ ३८५८॥**

तत्र गत्वा निष्क्रमण-प्रवेशौ वर्जयित्वा ईषदेक**पार्श्वे तिष्ठति,** स च तथा तिष्ठति यथा **एलुकमात्रं पश्यति, नोत्क्षेप**-निक्षेप-विरेचनानि, ततो वध-बन्धादयः प्रागुक्ता **दोषाः** परिहृता भवन्ति। तथा **निष्क्रमणे प्रवेशे च** ये **अप्रीत्यादयो** दोषास्तेऽप्येवं **परित्यक्ताः** ॥ ३८५८॥

**असतीए पमुह कोट्ठग, सालाए मंडवे रसवतीए।**
**पासट्ठितो अगंभीरे, एलुगविक्खंभमित्तम्मि ॥ ३८५९॥**

औद्यानिकी-घटादीनाम् **असति** अभावे यः **शालायाः प्रमुखे कोष्ठको** विशालो यत्र

दूरस्थितैरपि एलुक उत्क्षेप-निक्षेपौ च दृश्येते, **मण्डपे** वा यत्र परिवेषणम्, **रसवत्यां** वा महानसे **अगम्भीरे** अतिप्रकाशे, तत्रापि निष्क्रमण-प्रवेशौ वर्जयित्वा, यत्र उत्क्षेप-निक्षेपौ न दृश्येते **एलुकविष्कम्भमात्रे** क्षेत्रे एक**पार्श्वे स्थित्वा** भिक्षामादत्ते। एष एलुकसूत्रस्य विषयः ॥ ३८५९ ॥

**सूत्रम्— पंचविहे ववहारे पण्णत्ते, तं जहा - १. आगमे - २. सुए, ३. आणा, ४. धारणा, ५. जीए।**

**१. जहा से तत्थ आगमे सिया, आगमेणं ववहारं पट्ठवेज्जा।**

**२. णो से तत्थ आगमे सिया, जहा से तत्थ सुए सिया, सुएणं ववहारं पट्ठवेज्जा।**

**३. णो से तत्थ सुए सिया, जहा से तत्थ आणा सिया, आणाए ववहारं पट्ठवेज्जा।**

**४. णो से तत्थ आणा सिया, जहा से तत्थ धारणा सिया, धारणाए ववहारं पट्ठवेज्जा।**

**५. णो से तत्थ धारणा सिया, जहा य से तत्थ जीए सिया, जीएणं ववहारं पट्ठवेज्जा।**

इच्चेएहिं पंचहि ववहारेहिं ववहारं पट्ठवेज्जा, तं जहा-१. आगमेणं, २. सुएणं, ३ आणाए, ४ धारणाए, ५. जीएणं। जहा जहा से आगमे, सुए, आणा, धारणा, जीए तहा-तहा ववहारं पट्ठवेज्जा।

प०— से किमाहु भंते ?

उ०— आगमबलिया समणा निग्गंथा। इच्चेयं पंचविहं ववहारं जया जया, जहिं जहिं, तया तया, तहिं तहिं अणिस्सिओवस्सियं ववहारं ववहरमाणे समणे निग्गंथे आणाए आराहए भवइ ॥ ३ ॥

अस्य सम्बन्धप्रतिपादनार्थमाह—

बहु आगमितो पडिमं, पडिवज्जइ आगमो इमो वि खलु।
सव्वं व पवयणं पवयणी य ववहारविसयत्थं ॥ ३८६० ॥

खलियस्स व पडिमाए, ववहारो को ? त्ति सो इमं सुत्तं।
ववहारविहिन्नू वा पडिवज्जइ, सुत्तसंबंधो ॥ ३८६१ ॥

अनन्तरसूत्रे प्रतिमाऽभिहिता, तां च **प्रतिमां प्रतिपद्यते बह्वागमिकः**। **अयमपि** पञ्चविधोऽपि व्यवहारः **खल्वागमः**, तत आगमप्रस्तावात् प्रतिमासूत्रादनन्तरं **व्यवहारसूत्र**मवाचि। **सर्वं वे**त्यादि, वाशब्दः सम्बन्धस्य प्रकारान्तरतोपदर्शने, सर्वं **प्रवचनं प्रावचनिकश्च व्यवहारविषयस्थं** व्यवहार-विषयान्तर्गतम्, अतोऽवश्यं व्यवहारो वक्तव्य इति व्यवहारसूत्रम् ॥ अथवा **प्रतिमायां स्खलितस्य को व्यवहारः** किं कर्त्तव्यम् ? इति प्रश्नमाशङ्क्य **स** व्यवहारः पञ्चविध इत्यादि**कमिदं सूत्र**मुपन्यस्तम्। यदि वाऽनन्तरसूत्रे 'प्रतिमाः प्रतिपद्यते' इत्युक्तम्, तां च **प्रतिपद्यते व्यवहारविधिज्ञो** नेतरः, इति प्रतिमासूत्रादनन्तरं व्यवहारसूत्रमित्येष व्यवहार**सूत्रस्य सम्बन्धः**। सूत्राक्षरसंस्कारः सुप्रतीतो विशेषव्याख्यां तु भाष्यकृत् करिष्यति ॥ ३८६०॥ ३८६१॥

तत्र "से तत्थ आगमे सिया आगमेणं ववहारं पट्ठवेज्जा" इत्यादि अस्य व्याख्यानमाह—

सूत्र ३ गाथा ३८६०-३८६३ पञ्चव्यवहाराः

**सो पुण पंच विगप्पो, आगम१ सुय२ आण३ धारणा४ जीए५।**
**संतम्मि ववहरंते, उप्परिवाडी भवे गुरुगा ॥ ३८६२॥**

**स पुनः** व्यवहारः **पञ्चविधः** प्रज्ञप्तः। तद्यथा— **आगमः१ श्रुतम्२ आज्ञा३ धारणा४**



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**जीतमिति**५। तत्र **सति** आगमादौ **व्यवहारे** यदि **उत्परिपाट्या** उत्क्रमेण व्यवहरति तदा प्रायश्चित्तं चत्वारो **गुरुकाः**। इयमत्र भावना— आगमे विद्यमाने यद्यन्येन सूत्रादिना व्यवहरति तदा चतुर्गुरुकम्। यदि पुनरागमो न विद्यते तदा श्रुतेन व्यवहर्त्तव्यम्। श्रुते विद्यमाने यद्याज्ञादिभिर्व्यवहरति तदा चतुर्गुरुकं प्रायश्चित्तम्। यदा तु श्रुतमपि न विद्यते तदा आज्ञया व्यवहर्त्तव्यम्। आज्ञायां विद्यमानायां यदि धारणया प्रस्थापयति तदा चतुर्गुरुकम्। आज्ञाया अभावे धारणया व्यवहर्त्तव्यम्। यदि पुनः धारणायां सत्यां जीतेन व्यवहरति तदा चतुर्गुरुकम्। धारणाया अभावे जीतेन व्यवहर्त्तव्यमिति। तत्र "से तत्थ आगमे सिया" इत्यादिकस्य सूत्रावयवस्यायमर्थः— तत्र तस्मिन् व्यवहारपञ्चकमध्ये से तस्य साधोरागमः स्यात् तर्हि स आगमेन व्यवहारं प्रस्थापयेत् व्यवहरेत्, न शेषैः सूत्रादिभिः॥ ३८६२॥

एतदेवाह—

**आगमववहारी आगमेण ववहरइ सो न अन्नेणं।**
**न हि सूरस्स पगासं, दीवपगासो विसेसेइ।। ३८६३ ॥**

**स आगमव्यवहारी आगमेन व्यवहरति, न अन्येन** श्रुतादिना, तस्य ततो हीनत्वाद्।



For Private And Personal

एतदेव प्रतिवस्तूपमया दर्शयति- न हि **सूर्यस्य प्रकाशं दीपप्रकाशो विशेषयति,** न सूर्यप्रकाशाद् दीपप्रकाशोऽधिकतरः किन्तु हीन इत्यर्थः। एवमिहापि यादृशो विषय आगमस्य नैतादृशः शेषाणां व्यवहाराणामिति। आह- यस्मिन् काले **गौतमा**दिभिरिदं सूत्रं कृतं "ववहारे पंचविहे पन्नत्ते" इत्यादि, तदा आगमो विद्यते ततः किं कारणमाज्ञादयोऽपि सूत्रे निबद्धाः? ॥ ३८६३ ॥

अत्राह—

**सुत्तमणागयविसयं, खेत्तं कालं च पप्प ववहारो।**
**होर्हिति न आइल्ला, जा तित्थं जाव जीतो उ ॥ ३८६४॥**

**सूत्रम् अनागतविषयं** भविष्यति स तादृशः कालो यस्मिन्नागमो व्युच्छेत्स्यति ततः शेषैर्व्यवहारैर्व्यवहर्त्तव्यम्। तत्रापि **व्यवहारः क्षेत्रं कालं च प्राप्य** यो यथा सम्भवति तेन तथा व्यवहरणीयम्। किमुक्तं भवति ? यस्मिन् यस्मिन् काले यो यो व्यवहारोऽव्यवच्छिन्नो व्यवच्छिन्नो वा तदा तदा प्रागुक्तेन क्रमेण व्यवहर्त्तव्यम्। तथा यत्र यत्र क्षेत्रे युगप्रधानैराचार्यैर्या या व्यवस्था व्यवस्थापिता तया तया अनिश्रोपश्रितं व्यवहर्त्तव्यम्। अन्यच्च—'**आद्या** चत्वारो

व्यवहारा **न यावत् तीर्थं भविष्यन्ति जीतस्तु** व्यवहारो **यावत्** तीर्थं तावद् भवितेति जीतोपादानम् ॥ ३८६४॥

सम्प्रति "आणाए आराहेइ" इत्यस्य व्याख्यानमाह—

**दव्वे भावे आणा, भावाणा खलु सुयं जिणवराणं।**
**सम्मं ववहरमाणो, तीए आराहतो होति ॥ ३८६५॥**

**आज्ञा** द्विविधा— **द्रव्ये भावे** च। तत्र द्रव्याज्ञा राजादीनामाज्ञा। **भावाज्ञा** खलु **श्रुतं जिनवराणाम्**। तत्र **सम्यक्** पञ्चविधान्यतमेन व्यवहारेण प्रागुक्तनीत्या **व्यवहरन् तस्याः** आज्ञाया **आराधको भवति** ॥ ३८६५॥

तदेवं व्याख्याता आज्ञा। साम्प्रतमाराधनामाह—

**आराहणा उ तिविहा, उक्कोसा१ मज्झिमा२ जहन्ना३ उ।**
**एग दुग तिग जहन्नं, दु तिगऽट्ठभवा उ उक्कोसा ॥ ३८६६॥**

**आराधना त्रिविधा— उत्कृष्टा १ मध्यमा २ जघन्या ३ च**। तत्रोत्कृष्टाया

आराधनायाः फल**मेको** भवः, मध्यमाया **द्वौ** भवौ, **जघन्यायास्त्रयो** भवाः। अथवा यदि तद्भवे मोक्षाभावस्तदा उत्कृष्टाया आराधनायाः फलं जघन्यं संसरणं **द्वौ** भवौ, मध्यमायास्त्रयो भवाः, जघन्याया **उत्कृष्टा अष्टौ भवाः** ॥ ३८६६ ॥

तदेवं **भाष्य**कृता सूत्रव्याख्या कृता। सम्प्रति **निर्युक्तिविस्तरः**—

**जेण य ववहरति मुणी, जं पि य ववहरति सो वि ववहारो।**
**ववहारो तहिं ठप्पो, ववहरियव्वं तु वोच्छामि ॥ ३८६७॥**

**येन मुनिर्व्यवहरति** स आगमादिर्व्यवहारः, व्यवह्रियतेऽनेनेति व्यवहार इति व्युत्पत्तेः। **यदपि च** व्यवहर्त्तव्यं **मुनिर्व्यवहरति सोऽपि व्यवहारः**, कर्मणि घञः समानयनात्। **तत्र** यो **व्यवहारः** करणपक्षरूपः स **स्थाप्यः**, पश्चाद् वक्ष्यते इति भावः। **व्यवहर्त्तव्यं तु वक्ष्यामि** ॥ ३८६७ ॥

प्रतिज्ञातमेव निर्वाहयति—

**आभवंते य पच्छित्ते, ववहरियव्वं समासतो दुविहं।**
**दोसु वि पणगं पणगं, आभवणाए अहीगारो ॥ ३८६८ ॥**

**व्यवहर्त्तव्यं समासतो द्विविधम्**। तद्यथा— आभवत् प्रायश्चित्तं च। तत्र **द्वयोरपि आभवति प्रायश्चित्ते च** प्रत्येकं **पञ्चकं पञ्चकम् तत्राधिकारः** प्रयोजनमिदानीम् **आभवनया**। एष द्वारगाथासमासार्थः॥ ३८६८॥

साम्प्रतमेनामेव व्याचिख्यासुः प्रथमतः "दोसु वि पणगं पणगं" इत्यस्य व्याख्यानमाह—

**खेत्ते१ सुय२ सुहदुक्खे३, मग्गे४ विणए५ य पंचहा होइ।**
**सच्चित्ते१ अच्चित्ते२, खेत्ते३ काले४ य भावे५ य ॥ ३८६९॥**

आभवत् **पञ्चधा** पञ्चप्रकारं भवति। तद्यथा— **क्षेत्रे१ श्रुते२ सुखदुःखे३ मार्गे४ विनये५** च। प्रायश्चित्तमपि पञ्चधा। तद्यथा **सचित्ते१ अचित्ते२ क्षेत्रे३ काले४ भावे५ च**। एष प्रतिद्वारगाथासमासार्थः॥ ३८६९॥

तत्र क्षेत्रे तावदाभवत् प्राह—

**वासासु निग्गयाणं, अट्ठसु मासेसु मग्गणा खेत्ते।**
**आयरिय कहण साहण, नयणे गुरुगा य सच्चित्ते ॥ ३८७०॥**

**अष्टासु** ऋतुबद्धेषु **मासेषु** विहरतां **वर्षासु** विषये **क्षेत्रे मार्गणा** भवति। क्षेत्रमार्गणाय च **निर्गतानां** साधूनां क्षेत्रं प्रत्युपेक्ष्य प्रत्यागताना**माचार्यस्य** पुरतः क्षेत्रगुण**कथनम्,** तच्च गच्छान्तरागत-प्राघूर्णकसाधुभिराकर्ण्य निजाचार्यसमीपं गत्वा तस्य कथनम्, तत्र **नयने** प्रायश्चित्तम्, तत्र गतैः **सचित्ते** गृह्यमाणे चत्वारो **गुरुकाः** ॥ ३८७० ॥

साम्प्रतमेनामेव गाथां विवृणोति—

**उउबद्धे विहरंता, वासाजोग्गं तु पेहए खेत्तं।**
**वत्थव्वा य गता वा, [1]उवेच्च खेत्ता नियत्ता वा ॥ ३८७१ ॥**

**ऋतुबद्धे** काले विहरन्त आचार्या **वर्षाप्रायोग्यं क्षेत्रं प्रत्युपेक्षन्ते, वास्तव्या** वा क्षेत्रप्रत्युपेक्षणा**योपेत्य गताः**, यदि **वा** तस्मात् **क्षेत्रान्निवृत्ताः** केचित् स्वगच्छसाधवः समागताः ॥ ३८७१ ॥

**आलोएंते सोउं, साहंतऽन्ने उ अप्पणो गुरुणो।**
**कहणम्मि होइ मासो, गयाण तेसिं न तं खेत्तं ॥ ३८७२ ॥**

गाथा ३८७१-३८७८ क्षेत्राऽऽ-भावनविधिः १५०८ (A)

१. उव्वेक्खित्ता- ला. ॥

ते वास्तव्या गताः क्षेत्रं प्रत्युपेक्ष्य समागताः, ततो वा क्षेत्रान्निवृत्ता आचार्याणां पुरत **आलोचयन्ति** क्षेत्रस्य गुणान् कथयन्ति। तत्र **चान्येऽ**न्यस्माद् गच्छात् प्राघूर्णकाः समागताः, ते च तान् तथा आलोचयतः **श्रुत्वा** गत्वा **आत्मनः गुरोः** आचार्यस्य **साहयन्ति** कथयन्ति, ततो ब्रुवते—'यावत् ते तत्र न तिष्ठन्ति तावद् वयं तिष्ठामः'। एवं **कथने** तेषां प्रायश्चित्तं लघुको **मासो** भवति। **न च गतानां तेषां तत् क्षेत्र**माभवति ॥

**सामत्थण निज्जविए, पयभेदे चेव पंथपत्ते य।**
**पणवीसादी गुरुगा, [1]गणिणोग्गाहेण वा जस्स ॥ ३८७३ ॥**

तत् श्रुत्वा यद्याचार्यः **सामत्थण** त्ति सम्प्रधारयति 'तत् क्षेत्रं गच्छामः' इति तदा तस्य प्रायश्चित्तं **पञ्चविंशति** दिनानि। **निर्यापितं** नाम अवश्यं गन्तव्यमिति निर्णयनं, तत्र लघुको मासः। **पदभेदे** क्रियमाणे गुरुको मासः। **पथि** व्रजतां चतुर्लघुकम्। क्षेत्रं **प्राप्तानां** चतुर्गुरुकम्। एतत् प्रायश्चित्तं **गणिनः** आचार्यस्य। **यस्य वाऽऽग्रहेण** ते आचार्या व्रजन्ति तस्याप्येतदेव प्रायश्चित्तम्। न च तत् क्षेत्रं तेषामाभवति। तत्र गत्वा यदि सचित्तमाददति तदा प्रायश्चितं



१. गणिणोऽगहणेण- ला. ॥

चत्वारो गुरुकाः, आदेशान्तरेणानवस्थाप्यम्। अचित्ते उपधिनिष्पन्नम्। तस्मादविधिरेष न कर्त्तव्यः ॥ ३८७३ ॥

तथा चाह—

**एसा अविही भणिया, तम्हा एवं न तत्थ गंतव्वं।**
**गंतव्व विहीए ऊ, पडिलेहेऊण तं खेत्तं ॥ ३८७४॥**

यस्माद् **एषः** अनन्तरोदितोऽविधिः गाथायां स्त्रीत्वं प्राकृतत्वात्, **तस्मादेवं तत्र न गन्तव्यम्** किन्तु **विधिना क्षेत्रं प्रत्युपेक्ष्य गन्तव्यम्** ॥ ३८७४॥

**खेत्तपडिलेहणविही, पढमुद्देसम्मि वन्निया कप्पे।**
**सच्चेव इहोद्देसे, खेत्तविहाणम्मि नाणत्तं ॥ ३८७५॥**



**क्षेत्रप्रत्युपेक्षणविधिः कल्पे कल्पाध्ययने प्रथमोद्देशे** यो **वर्णितः स एव इह**—अस्मिन्नपि व्यवहारस्य दशमे **उद्देशके** द्रष्टव्यः। नवरमत्र **क्षेत्रविधाने** क्षेत्रभेदकथने **नानात्वम्** इहाधिकं क्षेत्रभेदकथनमित्यर्थः॥ ३८७५॥ तदेव करोति—

**चउग्गुणोववेयं तु, खेत्तं होइ जहन्नगं।**
**तेरसगुणमुक्कोसं, दोण्हं मज्झम्मि मज्झिमगं ॥ ३८७६ ॥**

**चतुर्भिर्गुणैः** वक्ष्यमाणैरुपेतं **भवति क्षेत्रं जघन्यम्। त्रयोदशगुणमुत्कृष्टम्। द्वयोः** जघन्योत्कृष्टयोर्मध्ये **मध्यमकम्** ॥ ३८७६ ॥ तत्र जघन्यं चतुर्गुणोपेतमाह—

**महती विहारभूमी१, विचारभूमी२ य सुलभ वित्ती३ य।**
**सुलभा वसही य जहिं४, जहन्नगं वासखेत्तं तु ॥ ३८७७ ॥**

यत्र **महती विहारभूमिः** भिक्षापरिभ्रमणभूमिः१ महती च **विचारभूमिः**२ तथा यत्र **वृत्तिः** भिक्षा **सुलभा**३ **वसतिश्च सुलभा**४ तद् **जघन्यं वर्षाक्षेत्रम्** ॥ ३८७७ ॥

सम्प्रति त्रयोदशगुणानाह—

**चिक्खल्ल१ पाणि२ थंडिल३, वसही४ गोरस५ जणाउले६ वेज्जा७।**
**ओसह८ निचया९ऽहिवती१०, पासंडा११ भिक्ख१२ सज्झाए१३ ॥ ३८७८ ॥**

**चिक्खल** त्ति यत्र प्रायो भूयान् कर्दमो न विद्यते १, न च भूयांसः सम्मूर्च्छिमाः **प्राणाः** २, यत्र च **स्थण्डिल**मनापाताऽसंलोकं महास्थण्डिलं च ईप्सितायां दिशि ३, [सुलभा च **वसतिः**] ४, तथा यत्र प्रचुरं **गोरसं** ५, भूयान् **जनः** सोऽप्यतीव भद्रकः ६, तथा यत्र **वैद्या** भद्रकाः ७, सुलभानि च **औषधानि** ८, कुटुम्बिनां भूयांसो धान्य**निचयाः** ९, **अधिपति**र्नाम राजा स भद्रकः १०, **पाषण्डै**रनपमानं ११, भैक्षं सुलभं तृतीयस्यां पौरुष्यां पर्याप्तं लभ्यते, अन्यास्वपि च पौरुषीषु यदि कार्यं ततो लभ्यते **भिक्षा** १२, **स्वाध्यायो**ऽपि च वसतावन्यत्र च शुध्यति १३। ईदृशं क्षेत्रं प्रत्युपेक्ष्यमवश्यमनुज्ञापयितव्यम् ॥ ३८७८॥

तदेवाह—

**खेत्तपडिलेहणविही, खेत्तगुणा चेव वण्णिया एए।**
**पेहेयव्वं खेत्तं, वासाजोग्गं तु कं कालं ? ॥ ३८७९॥**

गाथा ३८७९-३८८५ क्षेत्राभवनादिः

**क्षेत्रप्रत्युपेक्षणाविधिः क्षेत्रगुणाश्च** **एते** अनन्तरोदिता **वर्णिताः**। तत्र **कस्मिन् काले वर्षायोग्यं क्षेत्रं प्रत्युपेक्षितव्य**मनुज्ञापयितव्यम्?॥ ३८७९॥



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अत आह—

**खेत्ताण अणुण्णवणा, जेट्ठा मूलस्स सुद्धपाडिवए।**
**अहिगरणो अवमाणो, मो[1] मणसंतावो महा होंति ॥ ३८८० ॥**

**ज्येष्ठामूलस्य** मासस्य **शुद्धप्रतिपदि** शुक्लपक्षप्रतिपदि **क्षेत्राणामनुज्ञापना** भवति। किं कारणम् ? अत आह—**अहिगरणो** इत्यादि। अन्येऽपि तत्राऽजानन्तस्तिष्ठेयुस्ततो**ऽधिकरणं** भवेत्। तथा स्वपक्षेभ्यो**ऽपमानं** भूयात्। तथा च सति **महान् मनःसन्तापः**, 'प्रेरिता वयं परिभूताः स्म' इति। अथवा कलहप्रवृत्तावयुक्तवचनैर्मनःसन्तापः स्यात्। तस्माद् ज्येष्ठामूलशुद्धप्रतिपदि कर्त्तव्या क्षेत्राणामनुज्ञापना ॥ ३८८० ॥

एतदेवाह—

**एएहिं कारणेहिं, अणागयं चेव होइ[2]ऽणुण्णवणा।**
**निग्गम-पवेसणम्मि य, पेहंताणं विहिं वोच्छं ॥ ३८८१ ॥**



---

१. मा मणसंताव होहिंति-पु.प्रे.॥ २. होतऽणु- ला.॥

For Private And Personal

**एतैः** अनन्तरोदितैः **कारणैरनागतमेव भवति** क्षेत्रस्याऽनुज्ञापना। सम्प्रति तेषां क्षेत्रं **प्रेष्यमाणानां निर्गमे प्रवेशे च विधिं वक्ष्यामि** ॥ ३८८१ ॥

प्रतिज्ञातमेव करोति—

**केई पुव्वं पच्छा, व निग्गया पुव्वमइगया खेत्तं।**
**समसीमं तू पत्ताण मग्गणा तत्थिमा होति ॥ ३८८२॥**

**केचित्** क्षेत्रप्रत्युपेक्षणाय **पूर्वं** निर्गताः, केचित् **पश्चान्निर्गताः**। तथा प्रवेशे **पूर्वम्** '**अतिगताः**' प्राप्ताः **क्षेत्रम्**, केचित् पश्चात्। **तत्र समकालं सीमानं प्राप्तानाम् इयं** वक्ष्यमाणा **मार्गणा भवति**॥ अनया गाथयाऽऽद्यपादत्रयेण समकं किल चतुर्भङ्गी सूचिता ॥ ३८८२॥

ततस्तामेव दर्शयति—

**पुव्वं विणिग्गतो पुव्वमतिगतो१ पुव्वनिग्गतो पच्छा २।**
**पच्छा निग्गतो पुव्वं, तु अतिगतो दो वि पच्छा वा ४ ॥ ३८८३॥**

जातावेकवचनमतो बहुवचनं द्रष्टव्यम्। **पूर्वं [ समकं ] निर्गताः** पूर्वमेव समकं प्राप्ताः

१, **पूर्वं विनिर्गताः पश्चादे**कतरे प्राप्ताः २ **पश्चाद् विनिर्गताः पूर्वं** प्राप्ताः ३ एकतरे पश्चाद् विनिर्गताः पश्चादेव 'च' तत् क्षेत्रमतिगताः ४ ॥

**पढमगभंगे इणमो, उ मग्गणा पुव्वऽणुण्णवे जइ तु।**
**तो तेसि होइ खेत्तं, अह पुण अच्छंति दप्पेण ॥ ३८८४॥**

तत्र भङ्गचतुष्टयमध्ये **प्रथमके भङ्गे इयं मार्गणा** भवति **यदि** पूर्वमेव समकं निर्गतैः (ताः) पूर्वमेव च समकं तत्क्षेत्रं प्राप्तैः(प्ताः), **पूर्वमेव** च समक**मनुज्ञापयन्ति तदा तेषां भवति** साधारणं **क्षेत्रम्** १। **अथ पुनः** समकं प्राप्ता अपि एकतरे **दर्पेण तिष्ठन्ति,** दर्पो नाम निष्कारणम्, तदा यैः पूर्वमनुज्ञापितं तेषां तत्क्षेत्रम्, नेतरेषाम् ॥ ३८८४॥ एतदेव स्पष्टतरमाचष्टे—

**खेत्तं अतिगया मो त्ति, वीसत्था जइ अच्छहे।**
**पच्छा गयऽणुण्णवए, तेसिं खेत्तं वियाहियं ॥ ३८८५॥**

**क्षेत्रम् अतिगताः** प्राप्ताः **स्म इति यदि विश्वस्ता आसीरन्** न क्षेत्रानुज्ञापनाय यतन्ते

तदा आसतां पूर्वप्राप्ताः किन्तु **पश्चाद् गता** अपि ये तेभ्यः पूर्वम**नुज्ञापयन्ति** क्षेत्रं **तेषां** तत् **क्षेत्रं व्याख्यातं** कथितम्॥ ३८८५॥

अत्रैवापवादमाह—

**गेलन्नवाउलाणं तु, खेत्तमन्नस्स नो भवे।**
**निसिद्धो खमतो चेव, तेण तस्स न लब्भते ॥ ३८८६॥**

**ग्लानत्वेन व्याकुलानां** पूर्वं समकं प्राप्तानामपि समकं पूर्वं वा नानुज्ञापनमभूत् तदा कारण-स्थिततत्वात् तेषामाभवति तत् **क्षेत्रम्, नान्यस्य** पूर्वप्राप्तपूर्वानुज्ञापकस्य पश्चात्प्राप्तपूर्वानुज्ञापकस्य वा। तथा **क्षपको** निष्कारणे **क्षेत्रप्रत्युपेक्षणाय** न प्रवर्त्तयितव्यः, **निषेधात्, तेन** कारणेन **तस्य** क्षपकस्य यत् क्षेत्रम्, तेन क्षपकेण यदनुज्ञापितं क्षेत्रमित्यर्थः, तत् **तैर्न लभ्यते,** किन्तु यैः पश्चादप्यागतैरनुज्ञापितं तेषां तत् क्षेत्रम्। अथ कारणे क्षेत्रप्रत्युपेक्षणाय क्षपकः प्रवर्त्तितस्तदा तेनानुज्ञापितं ते लभन्ते क्षेत्रम्। तथा क्षपकस्य पारणके व्याकुला इति नानुज्ञापयन्ति तदा न तेषां तत् क्षेत्रम्, किन्तु यैरनुज्ञापितं तेषामिति ॥ तदेवं गतः प्रथमो भङ्गः १॥ ३८८६॥

सम्प्रति द्वितीयं तृतीयं च भङ्गमधिकृत्य विवक्षुरिदमाह—

**पुव्व विणिग्गय पच्छा, पविट्ठ पच्छा य निग्गया पुव्विं।**
**कयरेसि तेसि खित्तं ?, तत्थ इमा मग्गणा होति ॥ ३८८७॥**

**पूर्वं विनिर्गताः पश्चादन्यापेक्षया क्षेत्रे प्रविष्टाः**, अपरे **पश्चाद् विनिर्गताः** [1]अग्रेतननिर्गतापेक्षया **पूर्वं** प्रविष्टाः, **कतरेषां तेषां क्षेत्रं** भवति ?। **तत्रेयं भवति मार्गणा** ॥३८८७॥

तामेवाह—

**गेलन्नादीहिं कज्जेहिं, पच्छाऽइंताण होति खेत्तं तु।**
**नि[2]क्कारणट्ठिया ऊ, पच्छाऽतिंता उ न लभंति ॥ ३८८८॥**

पूर्वं विनिर्गताः सन्तो यदि **ग्लानादिभिः कार्यैः** कारणैः पश्चादागच्छन्ति तदा तेषां

१. अन्यापेक्षया- मु.॥ २. निक्कारणं ठिया-ला.॥

**पश्चाद् अतियताम्** आगच्छतां **भवति क्षेत्रम्।** अथ **निष्कारणं** यत्र तत्र वा **स्थितास्तेन** पश्चादागतास्तदा ते **पश्चादागच्छन्तो न लभन्ते** क्षेत्रम् ॥ ३८८८॥

गतो द्वितीयो भङ्गः २। तृतीयभङ्गमधिकृत्याह—

**पच्छा विणिग्गओ वि हु, दूराऽऽसन्ना समा व अद्धाणा।**
**सिग्घगती उ सभावा, पुव्वं पत्तो लभति खेत्तं ॥ ३८८९॥**

गाथायामेकवचनं स्पर्द्धकस्वाम्यपेक्षया। **पश्चाद्विनिर्गतोऽपि** निश्चितं **दूराद् आसन्नात् समाद्वा अध्वनः स्वभावात् शीघ्रगतिरिति** कृत्वा **पूर्वं प्राप्तस्तदा स लभते क्षेत्रम्** ॥ ३८८९॥

**अह पुण असुद्धभावो गतिभेदं काउ वच्चती पुरतो।**
**मा एए गच्छंती, पुरतो त्ती ताहे न लभंति ॥ ३८९०॥**

**अथ पुनर्मा एते** अन्ये **पुरतो गच्छन्तीति** यास्यन्तीति **एवमशुद्धभावो गतिभेदं कृत्वा पुरतो याति तदा** स पुरोगाम्यपि **न लभते** क्षेत्रम्, भावस्याशुद्धत्वात् ॥ ३८९०॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**समयं पि पत्थियाणं, सभावसिग्घगतिणो भवे खेत्तं।**
**एमेव य आसन्ने, दूरद्धाणीण जो एति ॥ ३८९१॥**

**समकमपि** विवक्षितात् स्थानात् **प्रस्थितानां** मध्ये यः **स्वभावशीघ्रगतिस्सन्** पुरतो याति तस्य **तत्क्षेत्रम्**। **एवम् आसन्ने** आसन्नाध्वनीनो **दूराध्वनीनो** वा **यः** पुरतः **समागच्छति** अनुज्ञापयति च स लभते क्षेत्रम् ॥ ३८९१॥

**अथवा समयं पत्ता, समयं चेव अणुण्णविते दोहिं।**
**साहारणं तु तेसिं दोण्ह वि वग्गाण तं होइ ॥ ३८९२॥**

**अथवा** आसन्नाद् दूरात् समाद्वा अध्वनः **समकमेव** तत् क्षेत्रं **प्राप्ताः, समकमेव** च **द्वाभ्यामपि** वर्गाभ्यां तत् क्षेत्र**मनुज्ञापितं** तदा **तयोर्द्वयोरपि वर्गयोः साधारणं तत्** क्षेत्रम्। गतस्तृतीयो भङ्गः ३। चतुर्थे तु भङ्गे यदि पूर्वप्रविष्टैस्सह समकमनुज्ञापितं तत् क्षेत्रं तदा साधारणम्। अथ पश्चात् प्राप्तैरपि पूर्वमनुज्ञापितं तदा तेषामिति ४। तदेवमुक्ता चतुर्भङ्गिकी ॥ ३८९२॥ सम्प्रति "सम सीमं तू पत्ताण" (गा. ३८८२) इत्यस्य व्याख्यानमाह—

**अहवा समयं दोन्नि वि सीमं पत्ता उ, तत्थ जे पुव्विं।**
**अणुजाणावे तेसिं, न जे उ दप्पेण अच्छंति ॥ ३८९३॥**



For Private And Personal

**अथवेति** प्रागुक्तापेक्षया प्रकारान्तरे। **द्वावपि** वर्गौ **समकं सीमानं प्राप्तौ, तत्र ये पूर्वमनुज्ञापयन्ति तेषां** तत्क्षेत्रम्। **न ये दर्पेण** निष्कारणमेवमेव तिष्ठन्ति तेषामिति ॥ ३८९३ ॥ सीमाग्रहणं द्वारगाथायामुद्यानादीनामुपलक्षणम्, तेन तद्विषयामपि मार्गणामाह—

**उज्जाण गामदारे, वसहिं पत्ताण मग्गणा एवं।**
**समयमणुन्ने साहारणं तु न लभंति जे पच्छा ॥ ३८९४ ॥**

**उद्यानं ग्रामद्वारम्** ग्रामग्रहणं नगरादीनामुपलक्षणम्। तथा **वसतिं** समकं **प्राप्तानाम् एवम्** उक्तप्रकारेण **मार्गणा** कर्त्तव्या। तामेव दर्शयति—यदि **समकमनुज्ञापयन्ति** ततः **साधारणम्। ये** पुनः **पश्चादनुज्ञापयन्ति** ते **न लभन्ते** ॥ ३८९४ ॥

गाथा ३८९४-३८९९ समुदायेन मार्गणा

**ते पुण दोन्नी वग्गा, गणि-आयरियाण होज्ज दोण्हं तु।**
**गणिणं व होज्ज दोण्हं, आयरियाणं व दोण्हं तु ॥ ३८९५ ॥**

**तौ पुनर्द्वौ वर्गौ द्वयोर्गण्याचार्ययोर्भवेताम्।** गणी नाम-अत्र वृषभः। एको वर्गो वृषभस्य, अपर आचार्यस्य, अथवा **द्वयोर्गणिनोर्यदि वा द्वयोराचार्ययोः द्वौ** वर्गाविति ॥ ३८९५ ॥



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अत्रेयं मार्गणा—

**अच्छंति संथरे सव्वे, गणि नीति असंथरे।**
**जत्थ तुल्ला भवे दो वी, तत्थिमा होइ मग्गणा ॥ ३८९६॥**

यदि तत्र क्षेत्रे **संस्तरणं** तदा **सर्वेऽपि तिष्ठन्ति**। अथ सर्वेषाम**संस्तरणं** तदा असंस्तरे **गणी** वृषभो **निर्गच्छति,** आचार्यस्तिष्ठति। अथ द्वावपि वर्गौ **तुल्यौ द्वावपि** गणिनौ द्वावप्याचार्यौ वा तदा **तत्रेयं भवति मार्गणा** ॥ ३८९६॥

तामेवाह—

**निप्फण्ण तरुण सेहे जुंगियपाय-ऽच्छि-नास-कर-कण्णा।**
**एमेव संजतीणं, नवरं वुड्ढीसु नाणत्तं ॥ ३८९७॥**



एकस्य निष्पन्नः परिवारः, एकस्यानिष्पन्नः; यस्य **निष्पन्नः** स गच्छतु, इतरस्तिष्ठतु। अथ द्वयोरपि परिवारो निष्पन्नः, केवलमेकस्य **तरुणः**, एकस्य वृद्धः; वृद्धास्तिष्ठन्तु, इतरे गच्छन्तु। अथ द्वयोरपि तरुणा वृद्धा वा, नवरमेकस्य **शैक्षाः**, अपरस्य चिरप्रव्रजिताः, तत्र ये

For Private And Personal

चिरप्रव्रजितास्ते गच्छन्तु, इतरे तिष्ठन्तु। अथ द्वयोरपि शैक्षाश्चिरप्रव्रजिता वा, केवलमेकस्य **जुङ्गितपादाऽक्षि-नासा-कर-कर्णाः**, अपरस्याऽजुङ्गिताः; तत्र जुङ्गितास्तिष्ठन्तु, इतरे गच्छन्तु। अथ द्वयोरपि जुङ्गिताः, तत्र ये पादजुङ्गितास्ते तिष्ठन्तु इतरे गच्छन्तु। सम्प्रति संयतीनां प्रवर्त्तिन्या अभिषेकायाश्च मार्गणा कर्त्तव्या ततस्तामाह— **एवमेव** अनेनैव प्रकारेण **संयतीनां** मार्गणा कर्त्तव्या। **नवरम् वृद्धासु नानात्वम्,** तच्चेदम्— तरुणी-वृद्धानां तरुण्यस्तिष्ठन्ति, वृद्धा गच्छन्ति शेषं तथैव॥ ३८९७॥

सम्प्रति संयतानां संयतीनां च समुदायेन मार्गणां करोति—

**समणाण संयतीण य, समणी अच्छंति णिंति समणा उ।**
**[१]संजोगेसु य बहुसो, अप्पाबहुयं असंथरणे ॥ ३८९८॥**



**श्रमणानां संयतीनां** चैकत्र स्थानेऽवस्थितानामसंस्तरणे **श्रमण्यस्तिष्ठन्ति, निर्गच्छन्ति श्रमणाः। संयोगेषु च बहुशः** प्रवर्त्तमाने**ष्वसंस्तरणे अल्पबहु** परिभाव्य वक्तव्यम्।

१. संजोगे वि- ला. मु.॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



तच्चैवम्—यत्र संयता जुङ्गिताः श्रमण्यो वृद्धास्तत्र जुङ्गितास्तिष्ठन्ति, वृद्धाः श्रमण्यो निर्गच्छन्ति। एवं गुरु-लाघवं परिभाव्य स्वबुद्ध्या भावनीयम् ॥ ३८९८॥ सम्प्रति क्षेत्रिकाऽक्षेत्रिकाणां संस्तरणाऽसंस्तरणयोर्मार्गणां करोति—

**[१]एमेव भत्तसंतुट्ठा, तस्साऽलंभम्मि अप्पभू निंति।**
**जुंगियमादीएसु य वयंति [२]खेत्ती ण ते जेसिं ॥ ३८९९॥**

**एवमेव** अनेनैव प्रकारेण क्षेत्रिकाऽक्षेत्रिकाणामपि संस्तरणेऽसंस्तरणे च भावनीयम्। तच्चैवं— यदि संस्तरणं तदा क्षेत्रिका अपि तिष्ठन्तु, अक्षेत्रिका अपि। नवरम् अक्षेत्रिका **भक्तसन्तुष्टा**स्तिष्ठन्तु, सचित्तमुपधिं च न लभन्ते। **तस्साऽलंभम्मि** त्ति तस्य भक्तस्य अलाभे असंस्तरणे इत्यर्थः, **अप्रभवः** अक्षेत्रिका **निर्गच्छन्ति**। अथाक्षेत्रिका जुङ्गिताः, आदिशब्दादजङ्गमा वा तदा तेषु अक्षेत्रिकेषु **जुङ्गितादिषु क्षेत्रिणो व्रजन्ति,** जुङ्गितादयस्तिष्ठन्तु। **येषां** च सम्बन्धिनस्ते जुङ्गिता वृद्धा वा **न** तेषां तत् क्षेत्रमाभवति, उपलक्षणमेतत्, तेनादेशिकानां कु(खु)डुक्का(खग्गूडा)दीनां च नाऽऽभवति क्षेत्रम् ॥ ३८९९॥



---

**१. अत्र ३८९९ गाथायां प्रथम चरणे अनुष्टुपच्छन्दः॥ २. खेत्तीण जं ते सिं- ला.॥**

For Private And Personal

**पत्ताण अणुन्नवणा, सारूविय सिद्धपुत्त सन्नी य।**
**भोईय महयर ण्हाविय निवेयण दुगाउयाइं ॥ ३९०० ॥**

**सग्गाम सन्नि असती, पडिवसभे पल्लिए व गंतूणं।**
**अम्हं रुइयं खेत्तं, नायं खु करेह अन्नेसिं ॥ ३९०१ ॥**

क्षेत्रप्रत्युपेक्षकाणां यत्र वर्षारात्रः कर्त्तव्यस्तत्क्षेत्रं **प्राप्तानामनुज्ञापना** भवत्यमीषां कर्त्तव्या। तानेवाह— **सारूपिक-सिद्धपुत्रौ** प्रागभिहितौ, **संज्ञिनः** गृहीताणुव्रता दर्शनश्रावकाः, **भोजिको** ग्रामस्वामी, **महत्तराः** ग्रामप्रधानाः पुरुषाः, **नापिताः** नखशोधकाः, वारिका[1] इत्यर्थः। एतेषा मनुज्ञापना कर्त्तव्या यथा— 'वयमत्र वर्षारात्रं कर्त्तुकामास्तद् यद्यन्ये केचित् साधव आगच्छेयुस्तदा तेषामेतद् यूयं कथयतेति'। **दुगाउयाइं** चेत्यादि। यदि तत्र **स्वग्रामे संज्ञी** श्रावको **न विद्यते** तदा द्वे गव्यूते गत्वा **प्रतिवृषभे** अन्तरपल्ल्यां **वा गत्वा** यदि श्रावकोऽस्ति ततस्तस्य **निवेदना** कर्तव्या यथा**ऽस्माकमिदं रुचितं क्षेत्रम्, तत** एतद् **ज्ञातमन्येषां कुरु**तेति ॥ ३९०० ॥ ३९०१ ॥

---

**१. वारिअ पुं. [ दे ] हजाम, नापित-इति पाइअसद्दमहण्णवे ॥**

**जयणाए सामाणं[1] अणुण्णवित्ता वसंति खेत्तबहिं।**
**वासावासट्ठाणं, आसाढे सुद्धदसमीए ॥ ३९०२॥**

**यतनया** सारूपिकादिकं **सन्तमनुज्ञाप्य क्षेत्रस्य बहिर्वसन्ति। वर्षावासस्थानं** पुनराषाढे **शुद्धदशम्याम्** ॥ ३९०२॥

सम्प्रति "जयणाए" इत्यस्य व्याख्यानमाह—

**सारूवियादि जयणा, अन्नेसिं वा वि साहए।**
**बाहिं वा वि ठिया संता पायोग्गं तत्थ गेण्हए ॥ ३९०३॥**

**सारूपिकादीनामन्येषां वा** यत् **साधयति** कथयति,[तत्र]एषा **यतना,** इयं च प्रागेवोक्ता। अथवा पूर्वगाथाप्रथमार्द्धस्यैवं व्याख्या— सन्तं सारूपिकादिकमनुज्ञाप्य क्षेत्रस्य बहिर्यतनया वसन्ति। तत्र तामेव यतनामाह— **बहिर्वाऽपि स्थितास्तत्र** वर्षा**प्रायोग्य**मुपधिं **गृह्णन्ति** उत्पादयन्ति। तच्चैवम्—सङ्घाटकाः सर्वासु दिक्षु प्रत्यासन्नं प्रेष्यन्ते, एकैकश्च सङ्घाट आत्मनः परिपूर्णमुपधिमुत्पादयति, एकस्य च जनस्याधिकस्येति ॥ ३९०३॥ एतदेवाह—



१. समणाणं- ला.मु.॥

**दोण्ह जतो एगस्सा, निप्फज्जइ तत्तियं बहिठिया उ।**
**दुगुणऽप्पणो[1] वासुवहिं संथरे पल्लिं च वज्जंति ॥ ३९०४ ॥**

**द्वयोरुपधिर्यस्मादेकस्यान्यस्य निष्पद्यते** उपधिरात्मनश्च **सङ्घाटस्य** तदपेक्षया **द्विगुणः**। तावन्मात्रमुपधिं **वर्षाप्रायोग्यं** सर्वासु दिक्षु **बहिःस्थिता** उत्पादयन्ति। यदि पुनः **संस्तरन्ति** तदा बहिः प्रतिवृषभग्रामान् अन्तर**पल्लीं** च वर्जयन्ति, न तत्र गच्छन्ति॥ ३९०४॥

**उच्चारमत्तगादी, छारादी चेव वासपायोग्गं।**
**संथार फलग सेज्जा, तत्थ ठिया चेवऽणुण्णवए ॥ ३९०५॥**

तथा **तत्र** बहिः**स्थिता** एव **उच्चारमात्रकादि,** आदिशब्दात् प्रश्रवण-खेलमात्रकपरिग्रहः। तथा **क्षारादि,** आदिशब्दाद् डगलकादिपरिग्रहः, **वर्षाप्रायोग्यम्** , तथा **संस्तारक-फलक-शय्या अनुज्ञापयन्ति**। अथ कस्मात् सर्वेषां सारूपिकादीनामनुज्ञापना क्रियते? उच्यते—एकस्य कथिते कदाचित् सोऽसद्भूतः स्यात् ततोऽनुज्ञापितमननुज्ञापितमेव जायते, सर्वेषां

१. दुगुणयमाणवा° ला.॥

पुनः कथिते यदि केचिदसद्भूतीभवन्ति तदा ये शेषाः सन्तस्तेऽन्येषां साधूनामागतानां कथयन्ति। ते च बहिस्तिष्ठन्ति प्रतिवृषभे अन्तरपल्ल्यां वा तत्र यां[1] न भोक्ष्यन्ते ॥ ३९०५॥

तथा चाह—

**पुण्णो य तेसिं तहि मासकप्पो, अन्नं च दूरे खलु वासजोग्गं।**
**ठायंति तो अंतरपल्लियाए, जं एस काले य न भुंजिहिंती ॥ ३९०६॥**

**पूर्णः खलु तेषां तत्र [मासकल्पः]** वर्षाप्रायोग्यतयाऽसम्भाविते क्षेत्रे। अथवाऽऽषाढशुद्धदशमी अद्यापि दूरे, **अन्यच्च वर्षाकालयोग्यं क्षेत्रं दूरे, तत** आषाढशुद्धदशमीप्रतीक्षणार्थं **यामेष्यति काले न भोक्ष्यते** तस्या**मन्तरपल्याम्** उपलक्षणमेतत् प्रतिवृषभे वा ग्रामे **तिष्ठन्ति** तत आषाढशुद्धदशम्यां वर्षायोग्ये क्षेत्रे समागच्छन्ति ॥ ३९०६॥

**संविग्गबहुलकाले एसा मेरा पुरा य आसी य।**
**इयरबहुले उ संपइ, पविसंति अणागयं चेव ॥ ३९०७॥**

---

१. याम्=अन्तर्पल्लीं प्रतिवृषभग्रामं वा न मोक्ष्यंते, एष्यद्वर्षासु प्रेक्षितक्षेत्र बर्हिर्वर्तित्वात् इत्यर्थः ॥

**एषा मर्यादा पुरा संविग्नबहुले काले आसीत्। सम्प्रति इतरबहुले** पार्श्वस्थादिबहुले **अनागतमेव प्रविशन्ति** किं कारणम् ?

अत आह—

**पेहिए नहु अन्नेहिं, पविसंताऽऽययट्ठिया।**
**इयरे तु कालमासज्ज, पेल्लिज्जा परिवड्ढिया ॥ ३९०८ ॥**

**अन्यैः प्रेक्षिते** क्षेत्रे **न हु** नैव **आयतार्थिनो** मोक्षार्थिनः **प्रविशन्ति। इतरे तु** पार्श्वस्थादयः **कालमासाद्य परिवर्द्धिताः** पूर्वप्रत्युपेक्षितक्षेत्रानपि **प्रेरयेयुः**, ततोऽनागतमेव प्रविशन्ति॥ ३९०८॥

अत्रार्थे कल्पितमुदाहरणमाह—

**रुण्णं तगराहारंबएहिं कुसुमंसुय मुयंतेहिं।**
**उज्जाणपडिसवत्तीहिं बब्बूलाहिं ठएंतीहिं ॥ ३९०९ ॥**

तगराहारे आम्रका**स्तगराहाराम्रकाः**, तैराम्रोद्यानप्रतिसपत्नैर्बब्बूलैर्वृतिकरणाय स्थाप्यमानैः,

गाथायां स्त्रीत्वं प्राकृतत्वात्, वयमाच्छादिता इति हेतोः **कुसुमाश्रुभिर्मुच्यमानै रुदितम्**। इयमत्र भावना—तगराहारे पूर्वं बहव आम्रका आसीरन्, स्तोका बब्बूलाः। ततो लोकेन बब्बूलानाच्छिद्य तैराम्रोद्यानस्य वृतिः कृता। तत्र बब्बूलफलपतनतो बब्बूला जाताः। तैः परिवर्द्धमानैः शालिशस्यमिव तृणैराम्रा विनाशिताः। तत उत्प्रेक्षितम्—'आम्रो**द्यानप्रतिसपत्नैर्बब्बूलैः** वृतिकरणाय **स्थाप्यमानै**र्वयमाच्छादिता' नूनमेतैरिति कुसुमाश्रुमोक्षणेनाऽऽम्रै रुदितमिति ॥३९०९॥

अत्रोपनयमाह—

**एवं पासत्थादी उ, कालेण परिवड्ढिया।**
**पेल्लेज्जा माइठाणेहिं, सोच्चादी ते इमे पुण ॥ ३९१०॥**



**एव**माम्रस्थानीयान् संविग्नान् बब्बूलस्थानीयाः **पार्श्वस्थादयः कालेन** परिवर्द्धिताः सन्तो **मातृस्थानैः** प्रेरयन्ति। किं विशिष्टास्ते पार्श्वस्थादयः? इत्याह-**श्रुत्वादयः, ते पुनः इमे** वक्ष्यमाणाः॥ ३९१०॥

तानेवाह—

**सोच्चाऽऽउट्टी१ अणापुच्छा, मायापुच्छा[1]२जयट्ठिते३।**

**अजयट्ठिए भंडते ततिए समणुण्णया दोण्हं ॥ ३९११ ॥**

एके **श्रुत्वा उपेत्य** समागताः१। अपरे **अनापृच्छाः** समाययुः, अथवा **मायापृच्छा** २। एते द्वयेऽप्ययतस्थिताः तृतीया यतस्थिताः३। तत्राऽऽद्यानां द्वयानां [अयतस्थितानां] **भण्डमानानां** कलहयताम्, गाथायां सप्तमी षष्ठ्यर्थे, बहुवचने एकवचनं प्राकृतत्वात्, न किञ्चिदाभाव्यम्। **तृतीये यतस्थिते समनोज्ञता** साधारणं क्षेत्रम्। इति द्वारगाथासमासार्थः॥ ३९११ ॥

साम्प्रतमेनामेव विवरीषुः प्रथमतः 'सोच्चाऽऽउट्टीति' पदं व्याख्यानयति—

**गुरुणो सुंदरखेत्तं साहंतं सोच्च पाहुणो।**

**नएज्ज अप्पणो गच्छं, एस आउट्टिया ठितो१॥ ३९१२ ॥**

**गुरोः** आचार्यस्याऽऽत्मीयस्य क्षेत्रं प्रत्युपेक्ष्य समागतैः **सुन्दरं क्षेत्र**मिति **कथ्यमानं** श्रुत्वा **प्राघूर्णक आत्मनो गच्छं** तत्र **नयति, एषः** श्रुत्वा **उपेत्य स्थित** उच्यते १॥ ३९१२ ॥

---

१. °च्छाऽजतट्ठिए- ला.॥

सम्प्रत्यनापृच्छा मायापृच्छां च दर्शयति—

**पेहितमपेहियं वा?, ठायति अन्नो अपुच्छिउं खेत्तं।**
**गोवाल-वच्छवाले, पुच्छति अन्नो उ दुप्पुच्छी[1] २ ॥ ३९१३॥**

**प्रेक्षितमिदं** क्षेत्रमन्यैः **अप्रेक्षितं वा? इत्यन्योऽनापृच्छ्य तिष्ठति। अन्यः** पुनः **दुष्प्रच्छी** ये न किमपि जानते तान् **गोपाल-वत्सपालान् पृच्छति—** अन्यैरिदं क्षेत्रं प्रत्युपेक्षितं किं वा न ? इति २ ॥ ३९१३॥

**अविहिट्ठिया उ दोवेते, ततिओ पुच्छिउं विहीए ठितो।**
**सारूविमादि काउं, बेंतऽन्नेहिं न पेहियं॥ ३९१४॥**
**तं तु वीसरियं तेसिं, पउत्था वावि ते भवे।**
**खेत्तिओ य तहिं पत्तो, तत्थिमा होति मग्गणा॥ ३९१५॥**

**एतौ** अनन्तरोदितौ **द्वावपि** श्रुत्वोपेत्य स्थितः१ अनापृच्छया मायापृच्छया वा स्थितः२

१. दुप्पच्छी- ला. पाठभेदे॥

इत्येवंलक्षणाव**विधिस्थितौ**। **तृतीयः** पुनः **सारूपिकमादिकृत्वा** सूत्रोक्तेन **विधिना पृष्ट्वा** स्थितः, **यतस्तेषां** सारूपिकादीनां यत् पूर्वैरनुज्ञापितं तद् **विस्मृतम्,** अथवा ये अनुज्ञापितास्ते **प्रोषिता** अभवन्, अन्ये च स्वरूपं न जानते ततस्ते **ब्रुवते—अन्यैर्न** प्रेक्षितमिदं क्षेत्रमिति येन च पूर्वसङ्घाटकप्रेषणेन क्षेत्रं प्रत्युपेक्षापितं स **क्षेत्रिकस्**तत्र प्राप्तः, **तत्र इयं** वक्ष्यमाणा **भवति मार्गणा** ॥ ३९१४॥ ३९१५॥

तामेवाह—

**आउट्टिया ठितो जो उ, तस्स नामं पि नेच्छिमो।**
**अणापुच्छिय दुप्पुच्छी, भंडंते खेत्तकारणा॥ ३९१६॥**



तत्र **उपेत्य स्थितस्तस्य नामापि नेच्छामः**, सर्वथा सर्वज्ञाऽऽज्ञाप्रतिकूलतया दुर्गृहीतनामधेयत्वात्। यस्त्व**नापृच्छी दुष्प्रच्छी** वा तौ द्वावपि **क्षेत्रकारणेन भण्डेते** कलहं कुरुतः॥ ३९१६॥

**अहवा वि दो वि भंडंते, जयणाए ठिएण ते।**
**खेत्तितो दो वि जेऊण, भत्तं देइ न उग्गहं ॥ ३९१७॥**

**अथवा द्वावपि** तौ **यतनास्थितेन** सह **भण्डते,** ततो व्यवहारे जाते **क्षेत्रिकः** सूत्रोक्तेन विधिना तौ जित्वा तयो**र्भक्तं ददाति** अनुजानाति, **न त्ववग्रहम्,** सचित्तमुपधिं वा नानुजानातीति भावः ॥ ३९१७॥

**तइयाण सयं सोच्चा, सड्ढादीए व पुच्छिउं।**
**होइ साहारणं खेत्तं, दिट्ठंतो खमएण उ ३ ॥ ३९१८॥**

**तृतीयानां** यतनास्थितानां तवचनतः क्षेत्रिकेण **स्वयं श्रुत्वा श्राद्धादीन् वा पृष्ट्वा** ज्ञातं स्वरूपम्, यथा–पृष्ट्वा विधिनैते स्थिताः। इयमत्र भावना— क्षेत्रिकेण यतनास्थिता अपि पृष्टाः— 'किं भवन्तोऽत्र स्थिताः', तेऽवादिषुः— 'वयमत्र पृष्ट्वा स्थिताः, परं न केनापि कथितं यथा अन्यैरनुज्ञापितमिदं क्षेत्रमिति'। ततस्तेन क्षेत्रिकेण श्राद्धादयः पृष्टाः, तेऽप्युचुः- 'यतः युष्माभिरनुज्ञापितं तदस्माकं विस्मृतम्'। यदि वा—'वयं प्रोषिता अभूमः येऽप्येतैरनुज्ञापितास्तैरप्यस्माकं कथितम्, यथा— एतैर्वयमनुज्ञापिता इति'। एवं तेषां यथावस्थिते स्वरूपे ज्ञाते **साधारणमुभयेषां भवति क्षेत्रम्,** विधिना पृच्छातो यतनास्थितानामपि शुद्धत्वात्।

अत्र **दृष्टान्तः** क्षपकेण **पिण्डनिर्युक्तिप्रसिद्धेन**— यथा पायसं क्षपको विधिना शुद्धं गवेषयन् आधाकर्मण्यपि शुद्धस्तथा इमे यतनास्थिता अपि ३ ॥ ३९१८॥

एतदेवाह—

**सुद्धं गवेसमाणो, पायसखमगो जहा भवे सुद्धो।**
**तह पुच्छिउ ठायंता सुद्धा उ भवे असढभावा ॥ ३९१९॥**

**यथा** पायसस्य-क्षीरान्नस्य प्रतिग्राहकः क्षपकः **पायसक्षपकः शुद्धं गवेषयन्** आधाकर्मण्यपि पायसे गृह्यमाणे **शुद्धस्तथा** विधिना **पृष्ट्वा तिष्ठन्तोऽशठभावाः शुद्धा भवन्ति** ॥३९१९॥

अत्रैव प्रकारान्तरमाह—

**अतिसंथरणे तेसिं, उवसंपन्ना उ खेत्ततो इयरे।**
**अविहिट्ठिया उ दो वी, अहवा इमा मग्गणा अन्ना ॥ ३९२०॥**

**अतिसंस्तरणे** संस्तरणातिक्रमे **तेषां** क्षेत्रिकाणाम् **इतरे** यतनास्थायिनः **क्षेत्रत उपसम्पन्नाः**।

**द्वौ पुनः** प्रागुक्तावविधिस्थितौ तेषाम् **अथवा इयमन्या मार्गणा** ॥ ३९२० ॥

तामेवाह—

**पेहेऊणं खेत्तं केइ ण्हाणादि गंतु ओसरणं।**
**पुच्छंताण कहेंती, अमुगत्थ वयं तु गच्छामो ॥ ३९२१ ॥**

**केचित्** साधवो वर्षारात्रयोग्यं **क्षेत्रं प्रत्युपेक्ष्या**ऽनुज्ञाप्य चेदं चिन्तयन्ति, यथा— अत्र प्रत्यासन्नेषु स्थानेषु समन्ततो बहवो गच्छाः, क्षेत्राणि च वर्षाप्रायोग्याणि तत्र प्रचुराणि न सन्ति, समासन्नश्च वर्षाकालः, ततो मा केचिदन्येऽजानन्तोऽत्र तिष्ठेयुरिति स्नानादिसमवसरणे सर्वेऽपि मिलिता भविष्यन्तीति तत्र गत्वा सर्वेषां विदितं कुर्मः। एतच्चिन्तयित्वा तदनन्तरं **स्नानादिसमवसरणं गत्वा** तेषां **पृच्छतां कथयन्ति**–'**अमुकत्र** वयं वर्षाकरणाय **गच्छाम**' इति ॥ ३९२१ ॥

**घोसणय सोच्च सन्निस्स, पेल्लणा पुव्वमतिगए पच्छा।**
**पुव्वट्ठिते परिणते, पच्छ भणंते न से इच्छा ॥ ३९२२ ॥**

प्रागुक्तां **घोषणां श्रुत्वा** कोऽपि धर्मकथालब्धिसम्पन्नो धर्मश्रद्धिकास्तत्र श्रावका भूयांसस्तिष्ठन्तीति परिभाव्य निर्मर्यादस्तत्र **पूर्वतरं गतः**, गत्वा च संज्ञिनः **संज्ञिवर्गस्य प्रेरणा** संस्तव-धर्मकथादिभिरात्मीकरणम्, ततः **पश्चादा**गताः क्षेत्रिकाः, तैः स पृष्टः- 'युष्माकमग्रे कथितं ततः कस्मादिह त्वमागतः?' स तूष्णीक आसीत्, ततः क्षेत्रिकैरुक्तम्- 'गच्छत यूयं सम्प्रत्यपि'। श्रावकवर्गश्च तस्मिन् **पूर्वस्थिते परिणत** आसीत् ततः स **पश्चाद् ब्रूते**- 'मा निर्गच्छतु, वयं द्वयोरपि वर्त्तिष्यामहे'। अत्र यत् सचित्तमुपधिश्च तत् क्षेत्रिकाणामाभवति. **न से** तस्य निर्मर्यादस्य। श्रावकवर्गस्य वा **इच्छा** प्रभवति ॥ ३९२२॥

साम्प्रतमिमामेव गाथां व्याचिख्यासुः प्रथमतो 'घोषणकं' भावयति—

**बाहुल्ला संजयाणं तु, उवग्गो यावि पाउसे।**
**ठिया मो अमुगे खेत्ते, घोसणऽण्णोण्णसाहणं ॥ ३९२३॥**



**संयतानां** समन्ततः प्रत्यासन्नेषु स्थानेषु **बाहुल्याद् उपाग्रश्च** अतिप्रत्यासन्नश्च **प्रावृट्कालः**, **अपि**शब्दादन्यानि च वर्षाप्रायोग्याणि क्षेत्राणि प्रचुराणि न सन्ति, ततो माऽन्ये प्रविशन्त्विति स्नानादिसमवसरणे **घोषणाम् अन्योन्यकथनं** कृतवन्तः, यथा— '**वयममुकक्षेत्रे स्थिताः**

**स्म**' इति ॥ ३९२३॥

घोषणस्यैव प्रकारान्तरमाह—

**विभिज्जंते व ते पत्ता, ण्हाणादीसु समागमे।**
**पहुप्पते य नो कालाऽऽसन्ना घोसणयं ततो ॥ ३९२४॥**

साधूनां **स्नानादिषु समागमे** यो यत आगतः स तत्र संस्थितः,ते च विवक्षिताः क्षेत्रमनुज्ञाप्य तत्र **प्राप्ताः**, तत्र यद्येकैकस्य गच्छस्य समीपे गत्वा क्रमेण कथ्यते तदा **कालो न प्राप्यते,** उत्सूरस्य भवनात्, ततो ये सङ्घसमवायाच्चैत्याद्वा **सम्प्रस्थितास्तान् आसन्नान्** कृत्वा मेलापके मेलापयित्वा महता शब्देन **घोषणकं** कुर्वते यथा— 'शृणुत साधवः! अस्माभिरमुकं क्षेत्रं वर्षानिमित्तमनुज्ञापितमिति' ॥ ३९२४॥ 'सोच्चा सन्निस्से'त्यादि [गा. ३९२२] व्याख्यानार्थमाह—

**दाणादिसड्ढकलियं, सोऊणं तत्थ कोइ गच्छेज्जा।**
**रमणिज्जं खेत्तं ति य, धम्मकहालद्धिसंपन्नो ॥ ३९२५ ॥**

तद् घोषणकं **श्रुत्वा कोऽपि धर्मकथालब्धिसम्पन्नो दानादिप्रधानश्राद्धकलितं** तद् **रमणीयं क्षेत्रमिति** कृत्वा **तत्र गच्छेत्** ॥ ३९२५॥

**संथव-कहाहि आउट्टिऊण अत्तीकरेइ ते सड्ढे।**
**ते वि य तेसु परिणया, इयरे वि तहिं अणुप्पत्ता ॥ ३९२६॥**

**संस्तवेन** धर्म**कथाभिश्च तान् श्राद्धान् आवर्त्य** आवर्ज्य **आत्मीकरोति, तेऽपि च** श्राद्धास्तेषु **परिणताः, इतरेऽपि** च क्षेत्रिकास्तत्र **अनु** पश्चात् **प्राप्ताः** ॥ ३९२६॥

**नीह त्ति तेहि भणिते, सड्ढे पुच्छंति, ते वि य भणंति।**
**अच्छह भंते ! दोण्हऽवि, न तेसि इच्छाए सच्चित्तं ॥ ३९२७॥**

**तैः** क्षेत्रिकैः **निर्गच्छतेति भणिते** ते पूर्वाऽऽगताः **श्राद्धान् पृच्छन्ति**— 'यामो वयम्, न निष्कास्यमानास्तिष्ठामः'। **तेऽपि च** श्राद्धाः क्षेत्रिकान् समागत्य **भणन्ति**—'**आसीध्वं भदन्त**! यूयं द्वयेऽपि, यतो **द्वयोरपि** वयं वर्तिष्यामहे। तत्र **तेषां** पूर्वागतानाम्[1] **इच्छया सचित्तम्,** उपलक्षणमेतत्, उपधिश्च **न** भवति, किन्तु क्षेत्रिकाणामेवेति ॥ ३९२७॥

१. पूर्वग° मु.॥

**असंथरे अनिंताणं कुल-गण-संघे य होइ ववहारो।**
**केवइयं पुण खेत्तं होइ पमाणेण बोधव्वं ? ॥ ३९२८॥**

**असंस्तरे** अन्यत्रासंस्तरणे पुनरनिर्गच्छतां **कुले गणे सङ्घे च भवति व्यवहारः।** **कियत् पुनः क्षेत्रं भवति प्रमाणेन बोद्धव्यम्** ॥ ३९२८॥

तत्राह—

**एत्थ सकोसमकोसं मूलनिबद्धं गाममणुयंताण।**
**सच्चित्ते अच्चित्ते, मीसे य विदिन्नकालम्मि ॥ ३९२९॥**

**अत्र** क्षेत्रमार्गणायां यत् [वर्षाप्रायोग्यं] क्षेत्रं मासप्रायोग्यं वा तत् **सक्रोशमक्रोशं** च। तत्र यत् सक्रोशं तत् पूर्वादिषु दिक्षु प्रत्येकं सगव्यूतम् ऊर्द्धम् अधश्चार्द्धक्रोशम्, अर्द्धयोजने च समन्ततो यस्य ग्रामाः सन्ति। अक्रोशं नाम- यस्य **मूलनिबन्धात्** परतः षण्णां दिशामन्यतरस्यामेकस्यां द्वयोस्त्रिसृषु वा दिक्षु अटवी-जल-श्वापद-स्तेन-पर्वत-नदीव्याघातेन

गमनं भिक्षाचर्या च न सम्भवति तद् **मूलनिबद्ध**मात्रमक्रोशम्, तं **ग्राममममुञ्चताम्**। किमुक्तं भवति ? तस्मिन् सक्रोशे अक्रोशे वा क्षेत्रे स्थितानामृतुबद्धे काले निष्कारणमेकैको मासः कालः वितीर्णः अनुज्ञातः, कारणेन पुनर्भूयानपि कालः, वर्षासु निष्कारणं चत्वारो मासाः कालो वितीर्णः, कारणेन पुनरतिप्रभूतोऽपि। एवं **वितीर्णे काले सचित्ते अचित्ते मिश्रे** चावग्रहो भवति, नाऽवितीर्णे काले। तेषामसंस्तरणे अनिर्गच्छतां तत् साधारणं भवति क्षेत्रम्। तत्र चायं क्षेत्रव्यवहारः ॥ ३९२९॥

**अत्थि बहु [१]वसभगामा, कुदेस-नगरोवमा सुहविहारा।**
**बहुगच्छुवग्गहकरा, सीमच्छेएण वसियव्वं ॥ ३९३०॥**



विवक्षितस्य स्थानस्य समन्ततः **सन्ति वृषभग्रामाः**। किंविशिष्टाः ? इत्याह- **कुदेश-नगरोपमा बहुगच्छोपग्रहकारिण[सुखविहारा]**स्तेषु **सीमाच्छेदेन वस्तव्यम्** ॥ ३९३०॥

तत्र वृषभक्षेत्रं द्विविधम् ऋतुबद्धे वर्षाकाले च। एकैकं त्रिविधम्, तद्यथा— जघन्यं १

---

१. वसहग्गामा- ला.। वसहुग्गामा-मु.॥

मध्यमम् २ उत्कृष्टं ३ च। तत्र ऋतुबद्धे जघन्यमाह—

**जहियं च तिन्नि गच्छा, पण्णरसुभया जणा परिवसंति।**
**एयं वसभक्खेत्तं, तव्विवरीयं भवे इयरं ॥ ३९३१॥**

**उभौ जनौ** आचार्यो गणावच्छेदकश्च, तत्राचार्य आत्मद्वितीयः, गणावच्छेदी आत्मतृतीयः, सर्वसङ्ख्यया पञ्च, ईदृशा **यत्र त्रयो गच्छाः** साधुसङ्ख्यया **पञ्चदश परिवसन्ति। एत**ज्जघन्यमृतुबद्धे काले **वृषभक्षेत्रम्। तद्विपरीतं** यत्र तादृशाः पञ्चदश जना न संस्तरन्ति एतद् भवति **इतरत्** न वृषभक्षेत्रं भवतीति भावः। उत्कृष्टं वृषभक्षेत्रं यत्र द्वात्रिंशत् साधुसहस्राणि संस्तरन्ति, यथा **ऋषभ**स्वामिकाले **ऋषभसेन**गणधरस्य। जघन्योत्कृष्टयोर्मध्ये मध्यमम्। वर्षाकाले यत्राचार्य आत्मतृतीयः, गणावच्छेदी त्वात्मचतुर्थः, सर्वसङ्ख्यया सप्त, एवम्प्रमाणा यत्र त्रयो गच्छाः संस्तरन्ति एतज्जघन्यं वर्षाकालप्रायोग्यं वृषभक्षेत्रम्। उत्कृष्टं मध्यमं च यथा ऋतुबद्धे काले, ईदृशेषु बहुगच्छोपग्रहकरेषु वृषभग्रामेषु सत्सु यदि वा एतेष्वेव साधारणेषु क्षेत्रेषु परस्परं भण्डनं न कर्त्तव्यं सचित्तादिनिमित्तम्, किन्तु सीमाच्छेदेन वस्तव्यम् ॥ ३९३१॥

तमेव सीमाच्छेदमाह—

**तुब्भंतो मम बाहिं, तुब्भ सचित्तं ममेतरं वा वि।**
**आगंतुग वत्थव्वा, थी-पुरिसकुलेसु व विरेगो ॥ ३९३२॥**

परस्परं वागन्तिको व्यवहार एवं कर्त्तव्यः। मूलग्रामस्य **अन्तः** मध्ये यत् सचित्तादि तद् **युष्माकम्, अस्माकं** तु **बहिः** प्रतिवृषभादिषु। अथवा **युष्माक**मुभयत्रापि **सचित्तम्, अस्माकम् इतरद्** अचित्तम्। यदि वा युष्माक**मागन्तुकाः**, अस्माकं **वास्तव्याः**। अथवा युष्माकं **स्त्रियो**ऽस्माकं **पुरुषाः** यदि वा एतेषु **कुलेषु** यो लाभः स युष्माकम्, एतेषु तु कुलेष्वस्माकमिति [**विरेकः** विभागः] ॥ ३९३२॥

**एवं सीमच्छेदं, करेंति साहारणम्मि खेत्तम्मि।**
**पुव्वट्ठितेसु जे पुण, पच्छा एज्जाहि अन्ने उ ॥ ३९३३॥**

**खेत्तं उवसंपन्ना, ते सव्वे नियमसो उं[१] नातव्वा।**
**आभव्वं तत्थ तेसिं, सचित्तादीण किं भवे ? ॥ ३९३४ ॥**



---

१. उ बोद्धव्वा- पु.प्रे.मु.॥

**एवम्** उक्तेन प्रकारेण **साधारणे क्षेत्रे सीमाच्छेदं कुर्वन्ति। ये पुनरन्ये** तत्र **पूर्वस्थिते**ष्वन्येषां क्षेत्राणामभावे [पश्चाद्] **समागच्छन्ति ते सर्वे नियमशः** नियमेन **क्षेत्रत उपसम्पन्ना ज्ञातव्याः।** अथ **तत्र** क्षेत्रे **तेषां** तथा स्थितानां **सचित्तादीनां** मध्ये **किमाभाव्यं भवति ? किंवा** न ? इति ॥ ३९३३॥ ३९३४॥ तत्राह—

**नाल पुर-पच्छसंथुय, मित्ता य वयंसया य सच्चित्ते।**
**आहार मत्तगतिगं, संथारग वसहिमच्चित्ते ॥ ३९३५॥**

**उग्गहम्मि परे एयं, लभते उ अखित्तितो।**
**वत्थमादी विदिन्नं तु, कारणम्मि व[1] सो लंभे ॥ ३९३६॥**

**नालबद्धाः पूर्वसंस्तुताः पश्चात्संस्तुता मित्राणि वयस्यकाश्च** एतत् **सच्चित्ते परे** परकीयेऽवग्रहे **अक्षेत्रिको** लभते। **अचित्ते आहारम्** अशनादिकं **मात्रकत्रिकम्** उच्चारमात्रकं१ प्रश्रवणमात्रकं२ श्लेष्ममात्रकं३ च, **संस्तारकं** परिशाटिरूपमपरिशाटिरूपं वा **वसतिं** च, **वस्त्रादिकं पुनर्दत्तं लभते। कारणे** अनिस्तरणादिलक्षणे पुनरदत्तमपि ॥ ३९३५॥ ३९३६॥

१. वि सो-ला.मु.॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



तदेवं गतं क्षेत्रद्वारम्। अधुना श्रुतद्वारमाह—

**दुविहा सुओवसंपय, अभिधारंते१ तहा पढंते२ य।**
**एक्केक्का वि य दुविहा, अणंतर१ परंपरा२ चेव ॥ ३९३७ ॥**

**द्विविधा श्रुतोपसम्पत्।** तद्यथा— **अभिधारयति१ पठति२ च, एकैकाऽपि द्विधा–अनन्तरा परम्परा च।** तत्राभिधारयत्यनन्तरा नाम- एकः साधुः कञ्चिदाचार्यमभिधारयति योऽसावभिधार्यमाणः स न किञ्चिदन्यमभिसन्धारयति। परम्परा नाम-एको यतिः कञ्चिदाचार्यमभिधारयति, सोऽप्यभिधार्यमाणोऽन्यमभिधारयति, सोऽप्यन्यम्, सोऽप्यन्यम्, एवमनियतं परिमाणम् ॥ ३९३७ ॥

एतदेवाह—

**एत्थं सुयं अहीहामि, सुयवं सो य अन्नहिं।**
**[1]वच्चंतो सोऽभिधारेंतो, सो वि अन्नं तमेव वा ॥ ३९३८ ॥**



१. अत्र ३९३८ गाथायं तृतीयं चरणे अनुष्टुप् च्छन्दः ॥

For Private And Personal

**दोण्हं अणंतरा होंति, तिगमादी परंपरा।**
**सट्ठाणं पुणरेंतस्स, केवलं तु निवेयणा ॥ ३९३९॥**

**अत्र** 'अस्य पार्श्वे **श्रुतमध्येष्ये**' इति कश्चिदभिधारयन् व्रजति। **सोऽपि श्रुतवान् अन्यत्राभिधारयन् व्रजति, सोऽप्यन्यम्** यदि वा **तमेवा**भिधारयति ॥ ३९३८॥

अत्र **द्वयोरनन्तरा** श्रुतोपसम्पद् **भवति त्रिकादीनां तु परम्परा। स्वस्थानं पुनरागच्छतः केवलं** तस्याभिधारितस्य **निवेदना** कर्त्तव्या, यथा—'अहं स्वस्थानं गमिष्यामीति' ॥ ३९३९॥

साम्प्रतमनन्तरायां परम्परायां चाभिधारणायामाभवन्तमाह—

**अछिन्नोवसंपयाए, गमणं सट्ठाण जत्थ वा छिन्नं।**
**मग्गण कहण परंपर, छम्मीसं चेव वल्लिदुगं ॥ ३९४०॥**

अछिन्नोपसम्पद् नाम अभिधार्यमाणो यद्यन्यं ना भिधारयति, तस्य हि लाभो नान्येन छिद्यते। तस्या**मछिन्नोपसम्पदि** योऽभिधारयतां लाभः स **स्वस्थानं गच्छति,** योऽभिधारितस्तस्यान्येनाच्छिन्नस्सन् गच्छतीत्यर्थः। अथ छिन्ना उपसम्पत् तत आदित आरभ्य **यत्र छिन्ना** उपसम्पत् तत्र सर्वेषां लाभो गच्छति। इहाभिधारयन् योऽभिधारितस्तं प्रति सम्प्रस्थितः, स चापान्तराले यद्यन्यमभिधारयति आत्मीये वा गच्छे प्रतिनिवर्त्तते तदा

यदभिधारयता पथि लब्धं सचित्तं तदभिधारितस्य स्वयं वा गत्वा समर्पयति, अन्यस्य वा हस्ते प्रेषयति। अथ नार्पयति स्वयमन्यप्रेषणेन वा तत्राह— **मग्गणे**त्यादि। तत्र **कहण परंपर** त्ति यैः स दृष्ट आगच्छन् तैर्यः पूर्वमभिधारितस्तस्य परम्परकेणाख्यातम्, यथा— 'युष्मानभिधारयता तेन सम्प्रस्थितेन सचित्तं लब्धं तद् युष्माकं तेन न प्रेषितम्'। मग्गण त्ति स चैतत् श्रुत्वा तं मार्गयति—'क्व गतो भवेन्मम सचित्तहारी?' इति। मृगयमाणैश्च स्नानादिसमवसरणे दृष्टः, पृष्टश्च यथा—'अमुककाले अस्मानभिधारयता समागच्छता सचित्तं लब्धं तन्मह्यं देहि', यदि न ददाति तदा बलाद् व्यवहारेण दाप्यते, मायानिष्पन्नश्च तस्य गुरुको मासः। प्रायश्चित्तं सचित्ते चत्वारो गुरुकाः। अचित्ते उपधिनिष्पन्नम्। स पुनरभिधारयन् यैः सचित्तैः सोऽभिधार्यते तेषां मध्ये किं लभते ? इत्याह— **छम्मीसं चेव वल्लिदुग**मिति। षट् नालबद्धानि निर्मिश्राणि लभते मिश्रं च, एवंरूपं निर्मिश्रमिश्रलक्षणं वल्लिद्विकं लभते ॥ ३९४० ॥ साम्प्रतमेनामेव गाथां विवृण्वन्नाह—

**अभिधारंते पढंते वा, छिन्नाए ठाति अंतए।**
**मंडलीए उ सट्ठाणं, [1]लभते नो उ मज्झिमे ॥ ३९४१ ॥**



---

१. वयते-ला.मु.॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**अभिधारयति पठति वा** यो लाभः स **छिन्नायामुपसम्पदि अन्तके** पर्यन्ते तिष्ठति, सर्वेषां लाभः तत्र विश्राम्यतीत्यर्थः। **मण्डल्यां तु** यो लाभः स **स्वस्थानं** लभते, व्याख्यातुरुपतिष्ठत इत्यर्थः, **न तु मध्यमे** मण्डलीमध्यवर्त्तिनि ॥ ३९४१ ॥

कस्मात्? इत्याह—

**जो उ मज्झिल्लए जाति, नियमा सो उ अंतिमं।**
**पावते निन्नभूमिं तु, पाणियं व पलोट्टियं ॥ ३९४२ ॥**

**यो** मण्डली**मध्यवर्त्तिनि** लाभो **याति सोऽपि नियमादन्तिमं** व्याख्यातृलक्षणं **प्राप्नोति, निम्नभूमिमिव पानीयं प्रलोठितम्** ॥ ३९४२ ॥

पूर्वं षट् निर्मिश्राण्युक्तानि तानि सम्प्रति दर्शयति—

**माया१ पिया२ य भाया३, भगिणी४ पुत्तो५ तहेव धूया६ य।**
**एसा अणंतरा खलु, निम्मीसा होइ वल्ली उ ॥ ३९४३ ॥**



For Private And Personal

**माता१ पिता२ भ्राता३ भगिनी४ पुत्रो५ दुहिता६ च, एषा खल्वनन्तरा निर्मिश्रा भवति वल्ली** ॥ ३९४३ ॥

**सेसाण उ वल्लीणं, परलाभो होइ दोण्णि चउरो वा।**
**एवं परंपराए, विभास ततो विय जा परतो ॥ ३९४४॥**

**शेषाणां तु वल्लीनां** यो लाभो भवति **द्वे** पुत्र-दुहितरौ यदि वा **चत्वारि** मातृ-पितृ-भ्रातृ-भगिनीरूपाणि स समस्तोऽपि **परलाभः**, अभिधारितस्य लाभ इत्यर्थः। **एवं परम्परायामपि विभाषा** कर्त्तव्या। **ततोऽपि या परतो** वल्ली तस्य या परतः ताः सर्वा अपि परलाभः॥ ३९४४॥

सम्प्रति मिश्रवल्लीप्रतिपादनार्थमाह—

**माउम्माया१ य पिया२, भाया३ भगिनी४ य एव पिउणो [1]वि।**
**पुत्तो१ धूया२ य तहा, भाउयमादी चउण्हं पि ॥ ३९४५॥**

१. वि चत्तारि- इति पाठः छन्दोनुसारं सम्भाव्यते इति ला. टिप्पणे॥

**अट्ठेव पज्जयाइं, चउवीसं भाउ-भगिणी सहियातिं।**
**एवइयच्चिय माउलसुयादयो परयरा वल्ली ॥ ३९४६॥**

**मातुः माता१ पिता२ भ्राता३ भगिनी४ च। एवं पितुरपि** चत्वारि वक्तव्यानि। तद्यथा- माता १ पिता २ भ्राता ३ भगिनी ४ च। **भ्रात्रादीनां तु चतुर्णां** प्रत्येकं द्वौ द्रष्टव्यौ। तद्यथा—**पुत्रो दुहिता** च। भ्रातुः पुत्रो दुहिता, भगिन्या अपि पुत्रो दुहिता, पुत्रस्यापि पुत्रो दुहिता, दुहितुरपि पुत्रो दुहिता च। **अष्टौ च प्रार्यकाणि भ्रातृ-भगिनीसहितानि।** तद्यथा— मातामह्या अपि माता१ पिता२ भ्राता३ भगिनी४, पितामहस्यापि माता१ पिता२ भ्राता३ भगिनी४। सर्वसङ्ख्यया मिश्रवल्ली चतुर्विंशतिः- अष्टावार्यकाणि ८, अष्टौ प्रार्यकाणि, अष्टौ च भ्रात्रादिचतुष्टयस्य प्रत्येकं द्विकभवनात्। तथा चाह- **एतावत्येव** मिश्रवल्ली। **मातुलसुतादयः परतरा वल्ली**। ते च मातुलसुतादयो यदि तमभिधारयन्ति तदा स लभते। अथाऽऽचार्यमभिधारयन्ति तदा आचार्यस्य। ये पुनः परतरे स्वजना ये चान्ये ते सर्वे[1]ऽभिधारयतो वा आचार्यस्य वा भवन्ति ॥ ३९४५॥ ३९४६॥



१. 'ते सर्वे आचार्यस्यैवाभवन्ती ति इति' गुरुतत्त्ववि. २-२४७॥

**दुविहो अभिधारंतो, दिट्ठमदिट्ठो२ य होइ नायव्वो।**
**अभिधारिज्जंतगसंतएहिं दिट्ठो व अन्नेहिं ॥ ३९४७ ॥**

**अभिधारयन् द्विविधो** द्रष्टव्यः, तद्यथा—**दृष्टः१ अदृष्टश्च२।** तत्र **दृष्टोऽभिधार्यमाणसत्कैः** साधुभिरन्यैर्वा। अदृष्टो न केनापि दृष्टः ॥ ३९४९ ॥

**सचित्ते अंतरा लद्धे, जो उ गच्छति अन्नहिं।**
**जो तं पेसे सयं वा वि, नेइ तत्थ अदोसवं ॥ ३९४८ ॥**

**सचित्ते अन्तरा** पथि **लब्धे योऽ**भिधारयन् **अन्यत्र गच्छति,** स्वगच्छं वा प्रतिनिवर्त्तते, **तत्र यत्** तत् सचित्तं लब्धमभिधारितस्य **प्रेषयति, स्वयं वा नयति, सोऽदोषवान्** ॥ ३९४८ ॥

**जो उ लद्धुं वए अण्णं, सगणं पेसवेइ वा।**
**दिट्ठो व[1] अदिट्ठो वा, माई होंति उ दोन्नि वी ॥ ३९४९ ॥**

**यस्तु** सचित्तं **लब्ध्वा अन्यमा**चार्यं **व्रजति, स्वगणं** वा तत् सचित्तं **प्रेषयति, दृष्टो**

---

१. व संतऽदिट्ठा-ला. ॥

**अदृष्टो वा** सन् तौ दृष्टाऽदृष्टरूपौ **द्वावपि मायिनौ भवतः** ॥ ३९४९ ॥

**ण्हाणादिएसु तं दिस्सा, पुच्छा सिट्ठे हरंति से।**
**गुरुगो गुरुगा चेव, [1]सचित्ते अचित्ते तिविहं पुण ॥ ३९५० ॥**

परम्परया कथमपि श्रुतम्, यथा— अमुकोऽस्मानभिधार्य समागच्छन् अन्तरा पथि सचित्तं लब्धवान्, परं सोऽन्यत्र गतः, स्वगणं वा गतवान्। ततस्तं मृगयमाणैस्तैः स्नानादिषु **स्नानादिसमवसरणेषु तं दृष्ट्वा पृच्छा** कृता। यथा- 'त्वममुके कालेऽस्माकमभिधार्य समागच्छन्नन्तरा सचित्तमुत्पादितवान् ?'। तेन च यथावस्थितं **शिष्टम्।** ततः **से** तस्य सकाशात् सचित्तं हरन्ति। अथ स न ददाति तर्हि बलाद् व्यवहारेण दाप्यते, मायाप्रत्ययश्च तस्य **गुरुको** मासः प्रायश्चित्तम्। **सचित्ता**पहरणे चत्वारो **गुरुकाः**। **अचित्ते पुनस्त्रिविधम्**-जघन्योपधिनिष्पन्नं मध्यमोपधिनिष्पन्नम् उत्कृष्टोपधिनिष्पन्नं च। अत्रैवान्यकर्तृकं किञ्चिद्विशेष-सूचकं गाथाद्वयम्—

*दुविहो अभिधारेंतो, दिट्ठ१मदिट्ठो२ व होति नायव्वो।*
*अभिधारिज्जंतगसंतएहिं दिट्ठो व अन्नेहिं ॥१॥*



---

१. सच्चित्ते अच्चित्ते-ला.॥

*दिट्ठो मायी१ अमायी२, एवमदिट्ठो वि होइ दुविहो उ।*
*अमायी उ अप्पिणती, मायी उ न अप्पिणे जो उ ॥२॥*

आद्यगाथाव्याख्यानं प्राग्वत्। **दृष्टो** द्विविधः- **मायी१ अमायी२** च। **एवमदृष्टोऽपि द्विविधो भवति**— मायी१ अमायी२ च। तत्र **अमायी** लब्धं सचित्तादिक**मर्पयति। यस्तु मायी स नार्पयति,** ततः स बलाद् व्यवहारेण दाप्यते। शेषं तथैव ॥ ३९५० ॥

**एवं ता जीवंते अभिधारेंतो उ एइ जो साहू।**
**कालगते एयम्मि उ, इणमन्नो होइ ववहारो ॥ ३९५१ ॥**

**एवं तावद् जीवत्य**भिधार्यमाणे **योऽभिधारयन् साधुरागच्छति** तस्य व्यवहारः। **कालगते** पुनः **एतस्मिन्** अभिधार्यमाणे **अयमन्यो भवति व्यवहारः** ॥ ३९५१ ॥

तमेवाह—

**अप्पत्ते कालगते, सुद्धमसुद्धे अदेंत देंते य।**
**पुव्विं पच्छा निग्गय, संतमसंते सुते बलिया ॥ ३९५२ ॥**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir





कञ्चिदाचार्यमभिधारयन् सम्प्रस्थितः, तत्र यं गच्छमभिसन्धार्य सम्प्रस्थितस्त**मप्राप्ते** एव स आचार्यः **कालगतः**, अत्र च त्रयः प्रकाराः— **पुव्विं पच्छा निग्गय** त्ति, यदैवाभिधारयन् **निर्गतस्त**दैव कालगतः स आचार्यः१। अथवा **पूर्वम**भिधारयन् निर्गतः पश्चादाचार्यः कालगतः २। यदि वा पूर्वमाचार्यः कालगतः **पश्चाद**भिधारयन् निर्गतः३। अत्र प्रथमे प्रकारे यत् तेनाभिधारयता पथि सचित्तादि लब्धं तत् कालगताचार्यशिष्याणामाभवति१। द्वितीये प्रकारे लब्धे अलब्धे वा सचित्तादिके यद्युपरताः स्थविरास्तदापि तत् सचित्तादि तच्छिष्याणामाभवति२। तृतीये प्रकारे तेनाभिधारयता दूरादागच्छता तावन्न ज्ञातं यावत् तं गच्छं प्राप्तः, ततो यन्निमित्तं स तत्रागतस्तच्छ्रुतं यदि तस्य शिष्यस्यास्ति तदा स तत् श्रुतं तस्मै दातुमिच्छति ततः कालगताचार्यस्य लभन्ते शिष्याः सचित्तादिकम्, यद्यपि सोऽभिधारको विपरिणतो न **गृह्णाति** (इच्छति) शिष्यस्य सकाशात् श्रुतं **ग्रहीतुं** तथापि कालगताचार्याणामेव तत् सचित्तादि आभवति। अथ तत् श्रुतं नास्ति न वा ददाति तदा न **लभन्ते** कालगताचार्यशिष्याः सचित्तादिकम्। आह— 'किं कारणं तृतीयेऽपि प्रकारे कालगताचार्यशिष्याणा-मेवाऽऽभवति?' तत आह- **बलिय** त्ति बलवती श्रुताज्ञा, तत् श्रुतं तदवस्थमेव यन्निमित्तं तेनाभिधारितम्। **सुद्धमसुद्धे अदेंत देंते य** इति यत् कालगताचार्यस्य शिष्याणामाभवति तद् यद्यभिधारको

For Private And Personal

ददाति तदा शुद्धः, अप्रायश्चित्तीत्यर्थः। अथ न ददाति तदा अशुद्धः प्रायश्चित्तभाग् भवतीत्यर्थः। तत्र सचित्तस्याऽदाने प्रायश्चित्तं चत्वारो गुरुकाः, आदेशान्तरेणानवस्थाप्यम्। अचित्ते उपधिनिष्पन्नम्। योऽपि चानाभाव्यमादत्ते तस्याप्येवमेव प्रायश्चित्तम् ॥ ३९५२॥

सम्प्रति "पुव्विं पच्छा निग्गते संतमसंते" इत्यस्य किञ्चिद् व्याख्यानमाह—

**लद्धे उवरया थेरा तस्स सिस्साण सो भवे।**
**मए वि लभते सीसो, जइ से अत्थि देइ वा ॥ ३९५३॥**

तत्र प्रथमे प्रकारे यथाऽभिहितं प्राक् तथैव१। द्वितीये प्रकारे **लब्धे**, उपलक्षणमेतत्, अलब्धे वा सचित्ते **स्थविरा उपरता**स्ततः सः सचित्तादिको लाभ**स्तस्य शिष्याणामाभवति**२। तृतीये पुनः प्रकारे **मृते**ऽप्यभिधारिते **लभते शिष्यो यदि से** तस्य श्रुत**मस्ति ददाति वा**। अथ नास्ति न ददाति वा तदा न लभते ॥ ३९५३॥

एतावता "संतमसंते" इत्यपि व्याख्यातम्। उपसंहारमाह—

**एवं नाणे तह दंसणे य सुत्तऽत्थ तदुभए चेव।**
**वत्तण संधण गहणे, नव नव भेया य एक्केक्के ॥ ३९५४॥**

**एवम्** उक्तप्रकारेण **ज्ञान**निमित्तमभिधार्यमाणे यद् आभवति तद् भणितम्, **तथा** तेनैव प्रकारेण **दर्शनेऽपि** दर्शनप्रभावकशास्त्राणामप्यर्थायाभिधार्यमाणे आभवत् प्रतिपत्तव्यम्। तत्र ज्ञानार्थं दर्शनार्थं वा योऽभिधार्यते सः **सुत्तऽत्थ तदुभए चेव** त्ति सूत्रार्थतया१ अर्थार्थतया२ तदुभयार्थतया३ च। तत्र यत् सूत्रार्थतया अभिधारणं तद् **वर्त्तनार्थ**तया१ **सन्धनार्थ**तया२ **ग्रहणार्थ**तया३ च। तत्र पूर्वगृहीतस्य पुनरुज्ज्वालनं वर्त्तना१। विस्मृत्यापान्तराले त्रुटितस्य पुनः सन्धानकरणं सन्धना२। अपूर्वस्य ग्रहणं ग्रहणमिति३। एवं त्रयो भेदा अर्थार्थतायामुभयार्थतायां च प्रत्येकं द्रष्टव्याः। सर्वसङ्ख्यया ज्ञाने दर्शने च **प्रत्येकं नव नव भेदाः**। तथा चाह— **नव नव भेया य एक्केक्के॥ ३९५४॥** सम्प्रति चरणार्थमभिधारयन्तमधिकृत्याह—

**पासत्थमगीयत्था, उवसंपज्जंति जे उ चरणट्ठा।**
**सुत्तोवसंपयाए, जो लाभो सो उ तेसिं तु ॥ ३९५५॥**

**ये पार्श्वस्थाः** पार्श्वस्थादयो**ऽगीतार्थाश्चरणार्थमुपसम्पद्यन्ते** तेषां चरणोपसम्पन्निमित्तं कमप्यभिधारयतां समागच्छतां **श्रुतोपसम्पदि** चान्तरा **यो लाभो** भवति **स तेषाम**भिधार्यमाणानां भवति, नाल-बद्ध-वल्लीद्विकं तु तेषामभिधारयतामिति ॥ ३९५५॥

**गीयत्था ससहाया असमत्ता जं तु लहइ सुहदुक्खी।**
**सुत्तत्थे अतक्कंता समत्तकप्पी उ न दलंति ॥ ३९५६॥**

ये पुनः पार्श्वस्थादयो **गीतार्थाः ससहायाः** 'सम्भोगनिमित्तमालोचनां दास्यामः' इत्यभिधारयन्तः **सूत्रार्थान् अतर्कयन्तः** अनपेक्षमाणा आगच्छन्तोऽन्तरा यद् लभन्ते सचित्तमचित्तं वा, येऽपि च गीतार्थाः **असमाप्ताः** असमाप्तकल्पा आगच्छन्तो **लभन्ते, यच्च** एकाकी एकाकिदोषपरि-वर्जनार्थमुपसम्पत्तुकामो लभते, यच्च **समाप्तकल्पिनः** [यश्च **सुख-दुःखी** सुख-दुःखार्थमुपसम्पत्तुकामः] तत् तेषामेवाऽऽभवति, न तु येषां समीपं प्रस्थितास्तेषाम्। एवं निर्ग्रन्थीनामपि द्रष्टव्यम् ॥ ३९५६॥

**अभिधारिज्जंत अपत्ते, एस वुत्तो गमो खलु।**
**पढंते उ विहिं वोच्छं, सो य पाढो इमो भवे ॥ ३९५७॥**

**एषः** अनन्तरोदितः **खलु गमः** प्रकारो**ऽभिधार्यमाणे अप्राप्ते उक्तः**। अत ऊर्ध्वं तु प्राप्ते सति **पठति विधिं वक्ष्यामि, स च पाठः अयं** वक्ष्यमाणो **भवति** ॥ ३९५७॥

तमेवाह—

**धम्मकहा सुत्ते या कालिय तह दिट्ठिवाय अत्थे य।**
**उवसंपय संजोगे दुगमाइ जहुत्तरं बलिया ॥ ३९५८॥**

**धर्मकथाया सूत्रे कालिके तथा दृष्टिवादे अर्थे च** पाठार्थ**मुपसम्पद्**[या]भवति। तत्र सूत्रतोऽर्थतश्च सूत्रार्थयोश्च स्वस्थाने **द्विकादिसंयोगे यथोत्तरं बलिकाः** बलवन्तः। सूत्रचिन्तायां परं परं सूत्रं पाठयन्, अर्थचिन्तायां परं परमर्थं व्याख्यानयन्। सूत्राऽर्थयोरेव परस्परचिन्तायामर्थप्रदाता बलीयानिति भावः ॥ ३९५८॥

**अ।वलिय मंडलिकमो, पुव्वुत्तोऽछिन्न-छिन्नभेदेणं।**
**एसा सुओवसंपय, एत्तो सुहदुक्खयं वोच्छं ॥ ३९५९॥**



या सा श्रुतोपसम्पत्परम्परा सा आवलिका ज्ञातव्या। या त्वनन्तरा सा मण्डली। सा च अच्छिन्ना कथम् इति चेद् ? उच्यते-यस्मादभिधारकस्य लाभोऽन्येनाऽच्छिन्नः सन्नभिधार्यमाणे गच्छति, ततोऽच्छिन्नलाभयोगात् सा उपसम्पदच्छिन्नेत्युच्यते। या त्वावलिका सा छिन्ना, यत-स्तस्यां यो लाभ आदित आरभ्य परम्परया छिद्यमानोऽन्तिमेऽभिधार्येऽन्यमनभिधारयति

विश्राम्यति ततः सा छिन्नोपसम्पत्। एवं **छिन्नाच्छिन्नभेदेनाऽऽवलिका-मण्डलिकाक्रमः** पठत्यपि **पूर्वोक्त एव** द्रष्टव्यः। तदेवमुक्तैषा **श्रुतोपसम्पत्। अत** ऊर्ध्वं **सुखदुःखतां** सुखदुःखोपसम्पदं **वक्ष्ये** ॥ ३९५९॥

तामेवाह—

**अभिधारे उववन्नो, दुविहो सुहदुक्खितो मुणेयव्वो।**
**तस्स उ किं आभवती, सच्चित्ताऽचित्तलाभस्स ? ॥ ३९६०॥**

**सुखदुःखितो द्विविधो ज्ञातव्यः**। तद्यथा- अभिधारयतीति **अभिधारः** अभिधारयन्, **उपपन्नः** सुखदुःखोपसम्पदं प्राप्तः। **तस्य** द्विविधस्यापि **सचित्तलाभस्य अचित्तलाभस्य** वा मध्ये **किमाभवति**? इति वक्तव्यम् ॥ ३९६०॥

अथ कः सुखदुःखोपसम्पदमुपपद्यते ? तत आह—

**सहायगो तस्स उ नत्थि कोई, सुत्तं च तक्केइ न सो परत्तो।**
**एगाणिए दोसगणं विदित्ता, सो गच्छमब्भेइ समत्तकप्पं ॥ ३९६१॥**

**तस्य सहायकः कोऽपि न विद्यते। न च परस्मात् सूत्रमपेक्षते, स्वयं** सूत्रार्थपरिपूर्णत्वात्। केवल**मेकाकिनि दोषगणं विदित्वा स गच्छं समाप्तकल्पम् अभ्येति** अभ्युपगच्छति॥ ३९६१॥

तत्रोपसम्पन्नमधिकृत्याऽऽभवद्व्यवहारमाह—

**खेत्ते सुहदुक्खी ऊ, अभिधारिंताइं दुन्नि वी लभति।**
**पुर-पच्छसंथुयाइं, हिट्ठिल्लाणं च जो लाभो ॥ ३९६२ ॥**

**सुखदुःखी** सुखदुःखोपसम्पदमुपसम्पन्नः **क्षेत्रे** परक्षेत्रेऽपि, एतदर्थमेव क्षेत्रग्रहणम्, अन्यथैतन्निरर्थकं स्यात्, **द्वयान्यपि पूर्वसंस्तुतानि पश्चात्संस्तुतानि** वाभिधारयन्ति लभते। ये च तेन दीक्षितास्तेषाम**धस्तनानां यो लाभः** सोऽपि तस्याऽऽभवति ॥ ३९६२॥

सम्प्रति 'क्षेत्रे' इत्यस्य विवरणाह—

**परखेत्तम्मि वि लभती, सो दो वी तेण गहण खेत्तस्स।**
**जस्स वि उपसम्पन्नो, सो वि य से न गिण्हए ताइं ॥ ३९६३॥**

माता-पितृप्रभृतीनि श्वश्रूश्वसुरप्रभृतीनि च यदि तं सुखदुःखोपसम्पन्नमभिधारयन्त्युपतिष्ठन्ते व्रतग्रहणाय **परक्षेत्रेऽपि** तदा **स** तानि **द्वयान्यपि** परक्षेत्रेऽपि **लभते, तेन** "परक्षेत्रेऽपि लभते इति प्रतिपत्तिः स्यादि"त्येवंलक्षणेन कारणेन **क्षेत्रस्य ग्रहणं** कृतम्, अन्यथा न कमप्यर्थं पुष्णाति। **यस्यापि** समीपे स **उपसम्पन्नः सोऽपि तानि न गृह्णाति,** सूत्रादेशतोऽनाभाव्यत्वात् ॥ ३९६३ ॥

**परखेत्ते वसमाणो, अतिक्कमंतो व न लभति असन्निं।**
**छंदेण पुव्वसन्नी, गाहियसम्मादि सो लभति ॥ ३९६४॥**

**परकीये क्षेत्रे** तिष्ठन् **व्यतिक्रामन् वा** यस्तस्य सुखदुःखोपसम्पन्नस्य उपतिष्ठते स यदि असंज्ञी अविदितपूर्वस्तदा **तमसंज्ञिनं न लभते,** केवलं स क्षेत्रिकस्याऽऽभवति। यः पुनः **पूर्वसंज्ञी** पूर्वविदितस्वरूपस्तं पूर्वसंज्ञिनं **छन्देन** लभते। यदि स वल्लीसम्बद्धो भवति, तं च सुखदुःखितमभिधारयति तदा लभते। अथ तं नाभिधारयति, अभिधारयन्नपि च वल्लीसम्बद्धो न भवति, ततो यस्य समीपे सुखदुःखोपसम्पदं जिघृक्षुः सम्प्रस्थितस्तस्याऽऽभवति। **गाहियसम्मादि सो लभते** इति, यदि स सुखदुःखितेन सम्यक्त्वं ग्राहितः, आदिशब्देन मद्यमांसविरतिं वा, ततः पश्चात् प्रव्रज्यापरिणामपरिणतः स यद्यपि वल्लीद्विकसम्बद्धो न

भवति तथापि यदि तस्य सुखदुःखितस्य समीपे उपतिष्ठते तदा स तं लभते ॥ ३९६४॥

एतदेव सविशेषमभिधित्सुराह—

**सुखदुक्खिवएण जइ ऊ परखेत्तुवसामितो तहिं कोई।**
**बेति अभिनिक्खमामी सो ऊ खेत्तिस्स आभवति ॥ ३९६५॥**

तेन **सुखदुःखितेन यदि तत्र परक्षेत्रे कोऽपि उपशमितः** सम्यक्त्वं ग्राहितो भवति तत्कालमेव च **ब्रूते- अभिनिष्क्रमामि** प्रव्रज्यां प्रतिपद्ये तदा **सः क्षेत्रिणः** क्षेत्रिकस्याऽऽ**भवति**, न तु सुखदुःखितस्य ॥ ३९६५॥

**अह पुण गाहितो दंसण,ताहे से होति उवसमेंतस्स।**
**कम्हा ? जम्हा सावए, तिन्नि वरिसाणि पुव्वदिसा ॥ ३९६६ ॥**

**अथ पुनः दर्शनं** सम्यक्त्वं तेन सुखदुःखितेन पूर्वं **ग्राहितस्ततः से** तस्य **उपशमयतः** सद्देशनया प्रतिबोधयतः स आभवति। **कस्मात्** इति चेत् ? अत आह— **यस्मात् श्रावके त्रीणि वर्षाणि पूर्वदिग्** भवति पूर्वायत्तता भवति ॥ ३९६६॥

**एएण कारणेणं, सम्मद्दिट्ठिं तु न लभते खेत्ती।**
**एसो उवसंपन्नो, अभिधारेंतो इमो होति ॥ ३९६७॥**

**एतेन कारणेन सम्यग्दृष्टिं** पूर्वग्राहितसम्यग्दर्शनं **क्षेत्री** क्षेत्रिको **न लभते। एष** सुखदुःखोपसम्पद**मुपसम्पन्न** उक्तः। साम्प्रत**मभिधारयन्** वक्तव्यः। सः **अयं** वक्ष्यमाणो **भवति** ॥ ३९६७॥

तमेवाह—

**मग्गण कहण परंपर, अभिधारेंतेण मंडलीऽछिन्ना।**
**एवं खलु सुहदुःखे, सचित्तादीउ मग्गणा कया ॥ ३९६८॥**

सुखदुःखनिमित्तमन्यं गच्छमुपसम्पद्यमानस्य **मार्गणा** भवति— कुत्र स गच्छो विद्यते? [इत्येवं] गवेषयन् गच्छति। ततः केनापि तस्य **कथनं** भवति, यथा— अमुकस्थाने स गच्छोऽस्तीति। ततस्तेना**भिधारयता परम्परा** आवली छिन्ना अनन्तरा **मण्डली अच्छिन्ना** प्रागिव परिभाव्या। परिभाव्य च यद् यस्याऽऽभवति तत् तस्मै दातव्यम्। इयमत्र भावना— आवलिकायां मण्डल्यां वा वल्लीद्विकमभिधारयत आभवति। शेषं तु यत् स लभते तत्

तेनाभिधारितस्य भवति, तदपि च परम्परया व्रजद् अन्तिमस्याभिधार्यमाणस्य विश्राम्यति। मण्डल्यामन्येनाच्छिद्यमानो लाभोऽनन्तरस्याभिधार्यमाणस्योपतिष्ठति। **एवम्** उक्तेन प्रकारेण **सुखदुःखे** सुखदुःखोपसम्पदमभिजिघृक्षोरभिधारयतः **सचित्तादौ मार्गणा कृता** ॥ ३९६८॥

सम्प्रति प्रकारान्त रेण सुखदुःखोपसम्पदमुपसम्पन्नेऽभिधारयति सचित्तादौ मार्गणां करोति—

**जइ से अत्थि सहाया, जइ वा वि करेंति तस्स तं किच्चं।**
**तो लभते इहरा पुण, तेसि समणुण्णाण साहारं ॥ ३९६९॥**

**यदि से** तस्य सुखदुःखोपसम्पन्नस्य **सहायाः सन्ति, यदि वा** 'त एव' येषां समीपे उपसम्पन्नः **तस्य** सुखदुःखितस्य **तत् कृत्यं** वैयावृत्त्यादि **कुर्वन्ति** तदा यत् तस्योपतिष्ठति **तत्ते**[1] **लभन्ते। इतरथा पुनस्तेषां समनोज्ञानां** साम्भोगिकानां **साधारणं** तद् भवति ॥ ३९६९॥

**अपुण्णकप्पिया जे ऊ, अन्नोन्नमभिधारए।**
**अन्नोन्नस्स लाभो उ, तेसिं साहारणो भवे ॥ ३९७०॥**

१. तं-लभते पु.प्रे.॥

**अपूर्णकल्पिका** नाम गीतार्था असहाया **ये** अपूर्णकल्पिकाः **अन्योन्यमभिधारयन्ति अन्योन्यस्य** सुखदुःखोपसम्पदं प्रतिपद्यन्ते **तेषां** यो **लाभः** सः अन्योन्यस्य परस्परस्य **साधारणो भवति** ॥ ३९७० ॥

**जाव एक्केक्कगो पुण्णो, ताव तं सारवेंति उ।**
**कुलादिथेरगाणं वा, देंति जो व सि सम्मतो ॥ ३९७१ ॥**

**यावत्** तेषा**मेकैकस्य पूर्णो** गच्छो भवति। किमुक्तं भवति— यावदेकैकस्य प्रत्येकं गच्छो नोपजायते **तावत् तम्** अभ्युपपन्नगच्छमेकतरे **सारयन्ति** येषामवग्रहे ते वर्त्तन्ते। अथ ते सारयन्तः परिताम्यन्ति तदा **कुलस्थविराणाम्, आदि**शब्दाद् गणस्थविराणां सङ्घस्थविराणां वा तान् **ददति** अर्पयन्ति **यो वा** कोऽपि **तेषां सम्मत**स्तस्य समर्पयन्ति ॥ ३९७१ ॥

गता सुखदुःखोपसम्पत्। सम्प्रति मार्गोपसम्पद् वक्तव्या। तथा चाह—

**सुहदुक्ख उवसंपय एसा खलु वण्णिया समासेणं।**
**अह एत्तो उवसंपय मग्गोग्गहवज्जिए वोच्छं ॥ ३९७२ ॥**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**एषा** अनन्ततरोदिता **खलु उपसम्पद् वर्णिता समासेन सुखदुःखे। अथ** अनन्तरमत उर्ध्वं **मार्गे अवग्रहवर्जिते वक्ष्ये,** मार्गोपसम्पदं **वक्ष्ये** इत्यर्थः ॥ ३९७२ ॥ अथ चेयं व्युत्पत्तिः- मार्गदर्शनायोपसम्पत् -

**मग्गोवसंपयाए, गीयत्थेणं परिग्गहीयस्स।**
**अग्गीयस्स वि लाभो, का पुण उवसंपया मग्गे? ॥ ३९७३ ॥**

**मार्गोपसम्पदि** प्रतिपन्नायामगीतार्थस्यापि सतो **गीतार्थेन परिगृहीतस्य लाभो** भवति, अन्यथा 'अगीतार्थस्य न किञ्चिदाभवति' इति वचनान्न कोऽपि लाभः स्यात्। **का पुनरुपसम्पद् मार्गे** इति चेत् : ॥ ३९७३ ॥

'अत' आह—

**जह कोई मग्गन्नू, अन्नं देसं तु वच्चती साहू।**
**उपसंपज्जइ उ तगं, तत्थऽन्नो गंतुकामो उ ॥ ३९७४ ॥**

**यथेति** मार्गोपसम्पद उपप्रदर्शने। यथा **कश्चित् साधुर्मार्गज्ञोऽन्यं देशं व्रजति, तत्र देशे अन्यो गन्तुकामः तकं** साधुमुपसम्पद्यते 'अहमपि युष्माभिः सह समागमिष्यामि' ॥ ३९७४ ॥



For Private And Personal

अथ कीदृशो मार्गोपदर्शननिमित्तमुपसम्पद्यते ? तत आह—

**अव्वत्तो अविहाडो, अदिट्ठदेसी अभासितो वा वि।**
**एगमणेगे उवसंपयाए चउभंगो जा पंथो ॥ ३९७५॥**

**अव्यक्तो** वयसा१ **अविहाडो** अप्रगल्भः२ **अदृष्टदेशी** अदृष्टपूर्वदेशान्तरः३ **अभाषिकः** देशभाषापरिज्ञानविकलः४। सा चोप**सम्पत् एकस्य अनेकस्य** च। अत्र **चतुर्भङ्गी**। तद्यथा— एकं एक उपसम्पद्यते१ एकमनेकः२ अनेकमनेकः३ अनेकमेकः४। सा चोपसम्पत् तावद् यावत् पन्थाः। किमुक्तं भवति ?— **यावत् पन्थानं** व्रजति ततो वा प्रत्यागच्छतीति॥ ३९७५॥

एतदेव सविशेषमभिधित्सुराह—

**गयागते गयनियते, फिडिय गविट्ठे तहेव अगविट्ठे।**
**उब्भामग सन्नायग, नियट्ट अद्दिट्ठ अभासी य ॥ ३९७६॥**

अव्यक्ता अविहाडा अदेशिका अभाषिका वा अन्यं साधुमुपसम्पद्यन्ते— 'अस्मान् अमुकप्रदेशे नयत'। अथवा यत्र तेषां गन्तव्यं तत्र ये विवक्षितसाधोरन्ये व्यक्त-विहाडादयो गन्तुकामास्तान् ब्रुवते— 'वयं युष्माभिस्सह समागमिष्यामस्तत्र यत्र(यूयम्)गन्तुकामा'स्ततो

यदि प्रत्यागच्छन्ति तदैतत् **गतागत**मित्युच्यते, तस्मिन् मार्गोपसम्पत्। **गयनियत्ते** इति अनुपसम्पन्ना एवाऽऽत्मीयेन व्यक्त-विहाडादिना समं गताः, तस्य च कालगततया प्रतिभग्नत्वादिना वा कारणेन प्रत्यागन्तव्यं नाभवत्, ततः प्रत्यागच्छन्**तस्तं** (न्तोऽन्य) साधुमुपसम्पद्यन्ते, एषा गतनिवृत्ते मार्गोपसम्पत्। तथा **फिडित गविट्ठे तहेव अगविट्ठे** इति, स्फिटितो नाम-नष्टः, कथं नष्टः ? तत आह— **उब्भामगे**त्यादि, उद्भामकभिक्षाचर्यया अदृष्टपूर्वे विषये गतः, ततो न जानाति कुतो गन्तव्यम् ? इति स्फिटितः। अथवा **स्वज्ञातयो** गवेषमाणाः समागताः, ततस्तस्मात् स्थानाददृष्टपूर्वे विषये नष्टस्ततः स्फिटितः। तथा **अभाषकोऽदृष्टपूर्वे** विषये पृष्ठतो लग्नो याति परं मिलितुं न शक्नोति, स च दृष्ट्वाऽपि प्रतिप्रच्छनीयदेशभाषामजानन् न प्रतिपृच्छति ततः पथात्परिभ्रष्टो नश्यति, स च नष्टो गवेषणीयः। तत्र स्फिटिते गवेषिते तथैव चागवेषिते आभवनमार्गणा कर्त्तव्या ॥ ३९७६॥ तत्र तदेव गवेषयतामगवेषयतां चाऽऽभवनमनाभवनमाह—

**उवणट्ठ अन्नपंथेण वा गयं अगवेसंत न लभंति।**
**अगविट्ठो त्ति परिणते, गवेसमाणा खलु लभंति ॥ ३९७७॥**

उपेत्य स्वज्ञातिकान् दृष्ट्वा नष्ट **उपनष्टः, अन्येन वा पथा** स विवक्षिते स्थाने **गतो** भविष्यतीत्येवं सङ्कल्प्य ये मार्गोपदर्शनायोप**सम्पन्ना**(समपद्यन्त)स्ते यदि तं न गवेषयन्ति तदा ते **अगवेषयन्त**स्तस्य सत्कं **न** किञ्चि**ल्लभन्ते**। यदि पुनरद्यापि न गवेषित इति **परिणते चेतसि** प्रयत्नं विधाय **गवेषयन्ति** तदा तस्यादर्शनेऽपि **खलु** तत्सत्कं लाभं **लभन्ते**॥ ३९७७॥

अथोपसम्पद्यमानानां किमाभवति ? किं वा न? इत्यत आह—

**अम्मा-पिति संबद्धा, मित्ता य वयंसगा य जे तस्स।**
**दिट्ठाऽऽभट्ठा य तहा, मग्गुवसंपन्नतो लहति ॥ ३९७८॥**

व्रजन्तः प्रत्यागच्छन्तो वा यत् ते उपसम्पद्यमानाः सचित्तादिकमुत्पादयन्ति तत् सर्वं मार्गोपदर्शकस्य नेतुराभवति। **ये** पुनः **माता-पितृसम्बद्धा,** नालबद्धवल्लीद्विकमिति भावः। **मित्राणि वयस्या दृष्टाऽऽभाषिता**श्च ये तमभिधारयन्ति तान् **मार्गोपसम्पन्नः** मार्गोपसम्पदं प्रतिपन्नो **लभते**॥ ३९७८॥

तदेवं गता मार्गोपसम्पत्। सम्प्रति विनयोपसम्पदमाह—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**विणयोवसंपयाओ, पुच्छण साहण अपुच्छगहणे य।**
**नायमनाए दोन्नि वि, नमंति पक्किल्लसाली वा ॥ ३९७९॥**

अत ऊर्ध्वं **विनयोपसम्पद्** वक्तव्या इति शेषः। सा चैवम्— कारणतोऽकारणतो वा केचिद् विहरन्तः अदृष्टपूर्वं देशं गताः, तैर्वास्तव्यानां साम्भोगिकानां समीपे **प्रच्छनं** कर्त्तव्यम्, यथा—कानि मासप्रायोग्याणि क्षेत्राणि? कानि वर्षावासप्रायोग्याणि ? एवं पृष्टैस्तैरपि **साधनं** कथनं कर्त्तव्यम्, अन्यथा वक्ष्यमाणप्रायश्चित्तप्रसक्तेः। अथ त एवाऽऽगन्तुका **न पृच्छन्ति** तदा तेषामपि प्रायश्चित्तम्। **गहणे य** त्ति सचित्तादिकस्य ग्रहणे सति परस्परं निवेदनं कर्त्तव्यम्— यथैतत् सचित्तमचित्तं वा लब्धम्, यूयं गृह्णीतेति, अनिवेदने असामाचारी। तथा **नायमनाए** त्ति, ते आगन्तुका वास्तव्याश्च परस्परं जानन्ति, यथा यतन्ते, न प्रमादिनः, **अनाए** त्ति, न जानन्ति किं यतन्ते ? किं वा प्रमादिनः ?। तत्र ज्ञातानज्ञातान् वा द्रव्यादिभिः परीक्ष्योपसम्पद्येरन्, नान्यथा। **दोन्नि वि नमंति** त्ति ते च परीक्षापूर्वकमुपसम्पद्यमाना द्वयेऽपि परस्परं नमन्ति। किमुक्तं भवति ? रत्नाधिकस्य प्रथमतोऽवमरत्नाधिकेनाऽऽलोचना दातव्या, पश्चाद् रत्नाधिकेनावमरत्नाधिकस्य। अत्र **पक्वशालयो** दृष्टान्तः— यथा पक्वाः शालयः परस्परं नमन्ति तथात्रापीति भावः॥ ३९७९॥



For Private And Personal

साम्प्रतमेनामेव गाथां विवरीषुः प्रथमतः "पुच्छण साहण अपुच्छ" त्ति व्याख्यानार्थमाह—

**कारणमकारणे वा, अदिट्ठदेसं गया विहरमाणा।**
**पुच्छा विहारखेत्ते, अपुच्छ लहुतो य, जं वावि ॥ ३९८० ॥**

**कारणे** अशिवादिलक्षणे **अकारणे** विहारप्रत्ययं सुखविहारो भविष्यतीति बुद्ध्या विहरन्तो यथासुखमक्लेशेन सूत्रार्थान् कुर्वन्तोऽ**दृष्टपूर्वं देशं गताः**। तत्र च तेषां साम्भोगिकाः सन्ति, ततस्तैरागन्तुकैस्ते वास्तव्याः साम्भोगिकाः **पुच्छा विहारखेत्ते** त्ति मासकल्पप्रायोग्याणि वर्षावासप्रायोग्याणि वा विहारक्षेत्राणि प्रष्टव्याः, तानि च तैः कथयितव्यानि। यदि **न पृच्छन्ति** पृष्टा वा ते न कथयन्ति तदा द्वयानामपि प्रत्येकं प्रायश्चित्तं **लघुको** मासः। यच्च पृच्छामन्तरेण कथनमन्तरेण वा स्तेन-श्वापदादिभ्योऽनर्थं साधवः प्राप्नुवन्ति तन्निष्पन्नमपि तेषां द्वयानामपि प्रायश्चित्तम् ॥ ३९८० ॥

अधुना "गहणे य" इत्यस्य व्याख्यानमाह—

**सच्चित्तम्मि उ लद्धे, अन्नोन्नस्स अनिवेयणे लहुगो।**
**ववहारेण उ हाउं, पुणरवि दाउं[1], नवरं मासो ॥ ३९८१ ॥**

---

१. दाणे-पु.प्रे.मु.॥

यत् ते आगन्तुका वास्तव्या वा **सचित्तं** लभन्ते, उपलक्षणमेतत्, अचित्तं वा। तस्मिन् **लब्धेऽन्योन्यस्य** निवेदना कर्त्तव्या यथा— 'एतद् मया सचित्तमचित्तं वा लब्धम् यूयं प्रतिगृह्णीत।' एवं निवेदने कृते द्वितीयो न गृह्णाति, परं सामाचारी एषेत्यवश्यं निवेदनं कर्त्तव्यम्। **अनिवेदने** प्रायश्चित्तं **लघुको** मासः। एतदेव सविशेषमाह— **ववहारेण उ** इत्यादि, यदि न निवेदयति तदा असामाचारी, तत्प्रतिषेधार्थं **व्यवहारेण** आगमप्रसिद्धेन तद् **हृत्वा** तस्य **मास**लघु प्रायश्चित्तं दत्त्वा तस्यैव पुनः प्रतियच्छन्ति॥ ३९८१॥

सम्प्रति "नायमनाए" इत्यस्य व्याख्यानमाह—

**नाए व अनाए वा होति परिच्छाविही जहा हेट्ठा।**
**अपरिच्छणम्मि गुरुगा, जो य परिच्छाए अविसुद्धो ॥ ३९८२ ॥**

**ज्ञाते अज्ञाते वा भवति** द्रव्यादिभिः **परीक्षाविधिर्यथा अधस्ताद्**भणितस्तथा कर्त्तव्यः। यदि पुनर**परीक्ष्यो**पसम्पद्यते, **योऽपि च** गच्छः **परीक्षायाम् अविशुद्धः** प्रमादीति कृत्वा तमपि ये उपसम्पद्यन्ते तेषां प्रत्येकं प्रायश्चित्तं चत्वारो **गुरुकाः** ॥ ३९८२॥

सम्प्रति "दोन्नि वि नमन्ती"त्यत्र मतान्तरमाह—

**केई भणंति ओमो, नियमेण निवेयइ इच्छ इयरस्स।**
**तं तु न जुज्जति जम्हा, पक्किल्लगसालिदिट्ठंतो ॥ ३९८३॥**

**केचिद् ब्रुवते— नियमेन अवमः** अवमरत्नाधिको **निवेदयति, इतरस्य** रत्नाधिकस्य **इच्छा** यदि प्रतिभासते ततो निवेदयति, नो चेन्नेति। **तच्च न युज्यते, यस्मात् पक्वशालिदृष्टान्त** उपन्यस्तः, स चोभयनमनसूचक इति॥ ३९८३॥

सम्प्रति द्वयोः नमनमाह—

**वंदणाऽऽलोयणा चेव, तहेव य निवेयणा।**
**सेहेण उ पउत्तम्मि, इयरो पच्छ कुव्वती ॥ ३९८४ ॥**

**शैक्षेण** अवमरत्नाधिकेन **वन्दने आलोचनायां** तथैव च **निवेदने** सचित्तादेः कृते **पश्चाद् इतरः** रत्नाधिकस्तस्य पुरतो वन्दनमालोचनां निवेदनं **च करोति** ॥ ३९८४॥

सम्प्रति क्षेत्र-श्रुत-सुखदुःख-मार्ग-विनयोपसम्पत्सु यदाभाव्यं तदुपदर्शयति—

**सुय-सुहदुक्खे खेत्ते मग्गे विणओवसंपयाए य।**
**बावीस पुव्वसंथुय वयंस दिट्ठाऽऽभट्ठे य सव्वे य ॥ ३९८५॥**

**श्रुतोपसम्पदि** उपसम्पद्यमानो **द्वाविंशतिं** लभते। तद्यथा— षड् अमिश्रवल्ल्याम्- माता१ पिता२ भ्राता३ भगिनी४ पुत्रो५ दुहिता६ इत्येवंरूपान्। षोडश मिश्रवल्ल्याम्, तद्यथा- मातुर्माता१ पिता२ भ्राता३ भगिनी४। एवं पितुरपि ४। भ्रात्रादीनां तु चतुर्णां प्रत्येकं द्विकम् तद्यथा— पुत्रो दुहिता च। **सुखदुःखोपसम्पदि पूर्वसंस्तुतान्** माता-पितृसम्बद्धान्, उपलक्षणमेतत् मित्र-**वयस्यप्रभृतीनि** च। **क्षेत्रोपसम्पदि** वयस्यान्, इदमप्युपलक्षणम्, पूर्वसंस्तुतान् पश्चात्संस्तुतान् नालबद्धवल्लीद्विकं च लभते। **मार्गोपसम्पदि दृष्टाऽऽभाषितान्,** चशब्दाद् वल्लीद्विकं मित्राणि च। **विनयोपसम्पदि सर्वान्** लभते, नवरं निवेदयति ॥ ३९८५॥



एतदेवाह—

**खेत्ते मित्तादीया, सुतोवसंपन्नतो उ छल्लभते।**
**अम्मापिउसंबद्धे, सुहदुक्खी ईयरो दिट्ठे ॥ ३९८६॥**

**क्षेत्रे** उपसम्पद्यमानो **मित्रादीन्** लभते, आदिशब्दात् पूर्व-पश्चात्संस्तुतान् नाल-वल्लीद्विकमाहारं मात्रकत्रिकं संस्तारं वसतिं चेति परिग्रहः। **श्रुतोपसम्पन्नो लभते षड्** मात्रादिकान् मिश्रां च वल्लिं **मातृ-पितृसम्बद्धाम्। सुखदुःखी** सुखदुःखोपसम्पन्नो माता-पितृसम्बद्धान् लभते वयस्यादींश्च। **इतरः** मार्गोपसम्पन्नो **दृष्टा**भाषितान्, उपलक्षणमेतत्, वल्लिद्विकं मित्राणि च लभते। विनयोपसम्पन्नस्याऽऽभाव्यं सुप्रतीतमिति न व्याख्यातम् ॥ ३९८६॥

**इच्चेयं पंचविहं, जिणाण आणाए कुणइ सट्ठाणे।**
**पावइ धुवमाराहं, तव्विवरीए विवच्चासं ॥ ३९८७॥**

**इत्येवं पञ्चविधं** क्षेत्र-श्रुतादिभेदतः पञ्चप्रकारमाभवद्व्यवहारं **स्वस्थाने** आत्मीये आत्मीये स्थाने, यथा क्षेत्रोपसम्पदि यद् उपसम्पद्यमानस्य आऽऽभवति तत् तथैव व्यवहरति। एवं शेषेष्वपि स्थानेषु वक्तव्यम्। **जिनानामाज्ञया करोति** परिपालयति स **ध्रुव**मन्ते **आराधनां प्राप्नोति,** जिनाज्ञायाः परिपालितत्वात्। **तद्विपरीतः** आभवद्व्यवहारविपर्यासकारी **विपर्यासं** प्राप्नोति, नाराधनामन्तकाले प्राप्नोतीति भावः ॥ ३९८७॥

इच्चेसो पंचविहो, ववहारो आभवंतितो नाम।
पच्छित्ते ववहारं, सुण वच्छ! समासतो वोच्छं ॥ ३९८८॥

इत्येष आभवन्तिको नाम व्यवहारः पञ्चविध उक्तः। अत ऊर्ध्वं प्रायश्चित्ते व्यवहारं समासतो वक्ष्ये। तं च वत्स ! वक्ष्यमाणं शृणु ॥ ३९८८॥

सो पुण चउव्विहो दव्व-खेत्त-काले य होति भावे य।
सच्चित्ते अच्चित्ते, दुविहो पुण होइ दव्वम्मि ॥ ३९८९॥

स पुनः प्रायश्चित्तव्यवहारश्चतुर्विधः। तद्यथा— द्रव्ये क्षेत्रे काले भावे च। तत्र द्रव्ये पुनर्द्विविधो भवति। तद्यथा— सचित्ते अचित्ते च ॥ ३९८९ ॥

तत्र प्रथमतः सचित्ते विवक्षुरिदमाह—

पुढवि-दग-अगणि-मारुय-वणस्सइ-तसेसु होति सच्चित्ते।
अचित्ते पिंड उवही, दस पन्नरसेव सोलसगे ॥ ३९९०॥

संघट्टण-परियावण-उद्दवणा वज्जणाए सट्ठाणं।
दाणं तु चउत्थादी, तत्तियमेत्ता व कल्लाणा ॥ ३९९१॥

**अहवा अट्ठारसगं, पुरिसे इत्थीसु वज्जिया वीसं।**
**दसगं च नपुंसेसुं, आरोवण वण्णिया तत्थ ॥ ३९९२॥**

**पृथिव्यादीनां सङ्घट्टनादौ** प्रत्येकं यदापत्तिप्रायश्चित्तं तत् **स्वस्थान**मित्युच्यते। तच्च "छक्काय चउसु लहुया" [गा.१३५] इत्यादिना प्रागेवाभिहितम्। इदं तु **दान**प्रायश्चित्तमभिधीयते। किं तद् ? इत्याह- **चतुर्थादि।** तद्यथा— पृथिव्यादिकं वनस्पतिपर्यन्तमेकेन्द्रियम् **अपद्रावयति** जीविताद् व्यपरोपयति तदा अभक्तार्थः, द्वीन्द्रियमपद्रावयतः षष्ठम्, त्रीन्द्रियमपद्रावयतोऽष्टमम्, चतुरिन्द्रिये दशमम्, पञ्चेन्द्रिये द्वादशकम्। **तत्तियमेत्ता व कल्लाणा** इति अथवा यस्य यावन्ति इन्द्रियाणि तस्य तावन्ति कल्याणानि प्रायश्चित्तम्। तद्यथा— एककल्याणकमेकेन्द्रियाणां परितापने [पौरुषीत्यर्थः]। द्वे कल्याणके द्वीन्द्रियाणाम्, पूर्वार्द्धमित्यर्थः। त्रीणि कल्याणकानि त्रीन्द्रियाणाम्, एकाशनकमिति भावः। चतुरिन्द्रियाणामाचाम्लम्। पञ्चेन्द्रियाणामभक्तार्थः ॥ ३९९० ॥ ३९९१ ॥

**अथवेदं** वर्जनायां सचित्ते प्रायश्चित्तम् - वर्जना नाम प्रव्राजनायां निषेधः। तत्र **पुरुषे अष्टादशकं** वर्जितम्। **स्त्रीषु वर्जिता विंशतिः। दशकं च नपुंसकेषु।** तत्राह - **अथवा आरोपणा**प्रायश्चित्तं प्राक् **कल्पाध्ययने** सप्रपञ्चमभिहितमिति ततोऽवधार्यम्। **अचित्ते पिंड उवही** इत्यादि, अचित्ते

प्रायश्चित्तं पिण्डे पिण्डविषयमुपधिविषयं च, क्व? इत्याह— दशके षोडशके च। इयमत्र भावना—पिण्डमुपधिं वा **दशभिरेषणादोषैः पञ्चदशभिरु**द्गमदोषैः, इहाध्यवपूरकस्य मिश्रेऽन्तर्भावविवक्षणात् पञ्चदशभिरित्युच्यते, **षोडशभिरु**त्पादनादोषैरविशुद्धं गृह्णानस्य प्रायश्चित्तम्। तदपि च प्राक् **कल्पाध्ययने**ऽभिहितमिति न भूयो भण्यते ॥ ३९९२॥

तदेवं सचित्ते अचित्ते इति द्वारद्वयं गतम्। अधुना 'क्षेत्रद्वारं कालद्वारं' चाह—

**जणवय अद्धाण रोधए, मग्गादीए य होइ खेत्तम्मि।**
**दुब्भिक्खे य सुभिक्खे, दिवा व रातो व कालम्मि ॥ ३९९३॥**

**जनपदे अध्वनि रोधके मार्गातीते च** यत् प्रायश्चित्तं तत् **क्षेत्रे** क्षेत्रविषयं **भवति**। इयमत्र भावना— जनपदेऽपि वसन् संस्तरन्नपि चाध्वानं प्रतिपन्नानां यः कल्पस्तमाचरति, अध्वानं प्रतिपन्नो वा न यतना करोति, दर्पेण वाऽध्वानं प्रतिपद्यते, तथा रोधकेऽपि सेनासूत्रे यो विधिरभिहितस्तं न करोति, मार्गातीतं क्षेत्रातिक्रान्तमशनादिकमाहारयति, एतेषु यत् प्रायश्चित्तं तत् क्षेत्रविषयमिति। सम्प्रति कालद्वारम्— **दुर्भिक्षे सुभिक्षे दिवा रात्रौ च काले** कालविषयम्। किमुक्तं भवति ? सुभिक्षेऽपि काले संस्तरन्नपि दुर्भिक्षकल्पमाचरति, यदि वा दुर्भिक्षे अयतनां

करोति, तथा दिवसे यः कल्पस्तं रजन्यामाचरति, रजन्यामपि यः कल्पस्तं दिवा समाचरति, यदि वा दिवसकल्पमूनमधिकं वा करोति, एवं रात्रिकल्पमपि। एतेषु यत् प्रायश्चित्तं तत् कालविषयम् ॥ ३९९३ ॥

साम्प्रतमेनामेव गाथां विवृणोति—

**वसिमे वि अविहिकरणं, संथरमाणम्मि खेत्तपच्छित्तं।**
**अद्धाणे उ अजयणं, पवज्जणा चेव दप्पेणं ॥ ३९९४॥**

**कालम्मि उ संथरणे, पडिसेवति अजयणा व ओमम्मि।**
**दिय-निसिमेराऽकरणं, ऊणऽहियं वा वि कालेणं ॥ ३९९५॥**

**वसिमेऽपि** संस्तरतोऽपि **यदविधिकरणं** तन्निष्पन्नं **क्षेत्रप्रायश्चित्तम्।** तथा **अध्वनि** प्रपन्ने **अयतना** अध्वनः **प्रपदने** वा **दर्पेण** यत् प्रायश्चित्तम् ॥ ३९९४॥ तथा

**काले** सुभिक्षे **संस्तरणेऽपि** दुर्भिक्षकल्पं समाचरति **दुर्भिक्षे वा** समापतिते **अयतना, दिवा-निशामर्यादाया अकरणम्,** दिवसकल्पस्य रात्रौ रात्रिकल्पस्य दिवसे समाचरणमिति

भावः। यदि वा दिवसकल्पस्य रात्रिकल्पस्य **ऊनमधिकं वा** करणम् तन्निष्पन्नं **काल**विषयं प्रायश्चित्तम् ॥ ३९९५॥

भावविषयमाह—

**जोगतिए करणतिए, दप्प पमाए[1] य पुरिसभावम्मि।**
**एएसिं तु विभागं, वोच्छामि अहाणुपुव्वीए[2] ॥ ३९९६॥**

**योगत्रिकं** मनो-वाक्-कायलक्षणं, **करणत्रिकं** करण-कारणाऽनुमोदनारूपं, **दर्पे** निष्कारणमकल्पस्य प्रतिषेवणं, **प्रमादः** पञ्चविधः, **पुरुषो** गुर्वादिलक्षणो वक्ष्यमाणः, एतेषु यत् प्रायश्चित्तं तद् **भावे** भावविषयम्। साम्प्रत**मेतेषामेव पदानां** विभागमहं समासेन **वक्ष्ये** ॥ ३९९६॥

तत्र योगत्रिककरणत्रिकभावनामाह—

**जोगतिए करणतिए सुभासुभे तिविहकालभेएण।**
**सत्तावीसं भंगा, दुगुणा वा बहुतरा वा वि ॥ ३९९७॥**

---

१. पमायपुरिसे य भा० ला.॥ २. समासेण- ला.॥

**योगत्रिके करणत्रिके** प्रत्येकं **शुभे अशुभे च त्रिविधकालभेदेन** सञ्चार्यमाणे सप्तविंशतिर्भङ्गा भवन्ति, द्विगुणा वा, बहुतरा वा। तद्यथा- मनसा करोति१ मनसा कारयति२ मनसा कुर्वन्तमनुजानाति३ एवं वचसा ३ कायेन च३ सर्वसङ्ख्यया नव। एते चातीताऽनागत-वर्त्तमानरूपकालत्रिकेण चिन्त्यमानाः **सप्तविंशतिर्भवन्ति**। एते चाऽशुभव्यापारसमाचरणविषये। एतदेव शुभव्यापारासमाचरणविषयेऽपि द्रष्टव्यम् यथा— मनसा न करोति कालप्राप्तमपि शक्तावपि च सत्यां शुभं व्यापारम्१ न च कारयति२ कुर्वन्तं नानुजानीते३ इत्यादि तथैव। उभयमीलने चतुष्पञ्चाशत्। तत उक्तम्— **द्विगुणा** वा एते एकैकसंयोगे। द्विक-त्रिकसंयोगे च बहुतरा भवन्ति। ते चाऽऽ**वश्यकटीकायां** प्रत्याख्यानचिन्तायामिव भावनीयाः, ततोऽवादि **बहुतरा वावि** ॥ ३९९७॥

अथ मनसा कथं करणं कारणमनुमननं वा ? तत आह—

**वावे महमंबवणं, मणसा करणं तु होअवुत्ते वि।**
**अणुजाणसु जावुप्पइ, मणकारणमो[1] अवारेंतो॥ ३९९८॥**



---

१. कारवण- ला.॥

कोऽपि संयतः कञ्चित् प्रदेशं दृष्ट्वा चिन्तयति—अस्मिन्नवकाशे **अहमाम्रवणं वपामि,** यद्यपि तेन तथा चिन्तयित्वा **नोप्त**माम्रवणं तथापि तत् तेन मनसा कृतमिति **मनसा करणम्।** तथा केनचिद् गृहस्थेन संयत उक्तः, यथा— 'संयत! यदि त्वमनुजानासि तत एतस्मिन्नवकाशे आम्रवणं **वपामि,** तस्मादनुजानीहि येनोप्यत' इति। एवमुक्ते यदि **न निवारयति** तदाऽ**नुक्ते**ऽपि **मनसा कारापणं** द्रष्टव्यम् ॥ ३९९८॥

तदेव भावयति—

**मागहा इंगिएणं तु, पेहिएण य कोसला।**
**अद्धुत्तेण य पंचाला, नाणुत्तं दक्खिणावहा ॥ ३९९९॥**

**एवं तु अणुत्ते वी मणसा कारावणं तु बोद्धव्वं।**
**मणसाऽणुण्णा साहू, चूयवणं वुत्त वुप्पति वा ॥ ४०००॥**

**मागधाः मगधदेशोद्भवाः** प्रतिपन्नमप्रतिपन्नं वा **इङ्गितेन** आकारविशेषेण जानन्ति। **कौशलाः प्रेक्षितेन** अवलोकितेन। **पाञ्चाला अर्द्धोक्तेन। नानुक्तं दक्षिणापथाः,** किन्तु

साक्षाद् वचसा व्यक्तीकृतं ते जानते प्रायो जडप्रज्ञत्वात् ततः **एवं सति वचसाऽनुक्तेऽपि** निवारणाभावाद् **मनसा कारापणं बोद्धव्यम्।** सम्प्रति **मनसाऽनुज्ञातं** भावयति-चूतवनम् उप्तम् पूर्वमारोपितम्' यदि वा उप्यते आरोप्यमाणं तिष्ठतीति ज्ञात्वा साधुश्चिन्तयति शोभनं **चूतवनमुप्तमुप्यते** वा, एषा मनसाऽनुज्ञा ॥ ३९९९॥ ४०००॥

**एवं वय-कायम्मी, तिविहं करणं विभास बुद्धीए।**
**हत्थादिसन्न छोडिं, इय काए कारणमणुण्णा ॥ ४001 ॥**

**एवम्** उक्तप्रकारेण **वचसि काये** च **त्रिविधं करणं** करण-कारणा-ऽनुमननलक्षणं **बुद्ध्या विभाषेत।** तत्र वचसि सुप्रतीतम्। काये तु दुर्विभावमिति तद्भावनामाह—**हत्थादि** इत्यादि। अत्रापि कायेन स्वयं करणमतिप्रतीतम्। ततः कारणमाह— **हस्तादिसंज्ञा कायेन,** गाथायां सप्तमी तृतीयार्थे, **कारणम्।** तथा **छोटिं** नखच्छोटिकां ददतः कायेन **अनुज्ञा** ॥ ४००१॥

**एवं नवभेएणं, पाणइवायादिगे उ अइयारे।**
**निरवेक्खाण मणेण वि, पच्छित्तियरेसि उभएणं ॥ ४००२॥**

**एवम्** उक्तेन प्रकारेण **नवभेदेन** समाहारोऽयम्, नवभिर्भेदैः **प्राणातिपातादिके अतीचारे** यत् प्रायश्चित्तं तद् भावविषयमिति भावः। तत्र **निरपेक्षाणां** प्रतिमाप्रतिपन्नादीनां **मनसाऽप्यतीचारसेवने प्रायश्चित्तम्। इतरेषां** गच्छस्थितानाम् **उभयेन** वाचा कायेन चातीचारसेवने प्रायश्चित्तमिति ॥ ४००२ ॥

**वायाम-वग्गणादी, धावण डेवणय होति दप्पेण।**
**पंचविहपमायम्मी, जं जहि आवज्जई तं तु ॥ ४००३ ॥**

यन्निष्कारणं **व्यायाम-वल्गनादि** करोति, यदि वा **धावनं डेपनं वा**-लोष्टादेः प्रक्षेपणं तद्विषयं प्रायश्चित्तं **भवति** ज्ञातव्यं **दर्पेण**। तथा पञ्चविधे पञ्चप्रकारे प्रमादे यं **प्रमादमापद्यते यत्र, [ तत्र ] तद्** भवति प्रमादविषयं प्रायश्चित्तम् ॥ ४००३ ॥

सम्प्रति पुरुषानाह—

**गुरुमाईया पुरिसा, तुल्लऽवराहे वि तेसि नाणत्तं।**
**परिणामगाइया वा, इड्ढिमनिक्खंत असहू वा ॥ ४००४॥**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**पुमं बाला थिरा चेव, कयजोगा य सेयरा।**
**अहवा सभावतो पुरिसा, होंति दारुण भद्दगा ॥ ४००५॥**

**गुर्वादयः पुरुषास्तेषां तुल्येऽप्यपराधे** प्रायश्चित्तमधिकृत्य भवति **नानात्वम्**। अथवा त्रिविधाः पुरुषाः **परिणामकादयः** परिणामका अपरिणामका अतिपरिणामकाश्च। तेषामपि तुल्येऽप्यपराधे प्रायश्चित्तमन्यथाऽन्यथा भवति। अथवा अनेकविधाः पुरुषाः, तद्यथा— **ऋद्धिमन्निष्क्रान्ता** अनृद्धिमन्निष्क्रान्ताश्च, **असहाः** सहाश्च, **पुरुषाः** स्त्री नपुंसकानि च, **बालास्तरुणाश्च**, **स्थिरा** अस्थिराश्च, **कृतयोगा** अकृतयोगाश्च। **सेतरा** नाम सप्रतिपक्षाः। एतेषामपि तुल्येऽप्यपराधे पुरुषभेदेन प्रायश्चित्तभेदः। **अथवा स्वभावतः पुरुषा** द्विविधा भवन्ति, तद्यथा— **दारुणा भद्रकाश्च**। तत्र तुल्येऽप्यपराधे दारुणानामन्यत् प्रायश्चित्तमन्यद् भद्रकाणामिति ॥ ४००४॥ ४००५॥

साम्प्रतमुपसंहारमाह—

**पायच्छित्ताऽऽभवंते य ववहारेसो समासतो भणितो।**
**जेणं तु ववहरिज्जइ, इयाणि तं तू पवक्खामि ॥ ४००६॥**



For Private And Personal

**एषः** अनन्तरोदितः **प्रायश्चित्ते आभवति च** प्रत्येकं **पञ्चविधो व्यवहारः समासतो भणितः**। इदानीं तु **येन व्यवह्रियते तं** व्यवहारं **प्रवक्ष्यामि** ॥ ४००६ ॥ प्रतिज्ञातमेव करोति—

**पंचविहो ववहारो, दुग्गतिभयचूरगेहि पन्नत्तो।**
**आगम१ सुय२ आणा३ धारणा४ य जीए५ य पंचमए ॥ ४००७ ॥**

येन व्यवह्रियते स **व्यवहारः दुर्गतिभयचूरकैः** दुर्गतिभयविध्वंसकैः **पञ्चविधः प्रज्ञप्तः**, तद्यथा- **आगमः१ श्रुतम्२ आज्ञा३ धारणा४ जीतं च पञ्चमः** ॥ ४००७ ॥

**आगमतो ववहारो, सुणह जहा धीरपुरिसपन्नत्तो।**
**पच्चक्खो य परोक्खो, सो वि य दुविहो मुणेयव्वो ॥ ४००८ ॥**

तत्राऽऽगमतो **व्यवहारो यथा धीरपुरुषैः प्रज्ञप्तस्तथा शृणुत। स** आगमतो व्यवहारो **द्विविधो ज्ञातव्यः**, तद्यथा–प्रत्यक्षः१ परोक्षश्च२ ॥ ४००८ ॥

**पच्चक्खो वि य दुविहो इंदियजो चेव नो-य-इंदियजो।**
**इंदियपच्चक्खो वि य पंचसु विसएसु नायव्वो ॥ ४००९ ॥**

**प्रत्यक्षोऽपि द्विविधः**, तद्यथा— **इन्द्रियजो१ नोइन्द्रियजश्च२**। तत्र **इन्द्रियजः प्रत्यक्षः पञ्चसु** रूपादिषु **विषयेषु ज्ञातव्यः** ॥ ४००९ ॥

**नोइंदियपच्चक्खो, ववहारो सो समासतो तिविहो।**
**ओहि मणपज्जवे या, केवलनाणे य पच्चक्खो ॥ ४०१० ॥**

यस्तु **नोइन्द्रियजः प्रत्यक्षो व्यवहारः स समासतस्त्रिविधः**, तद्यथा- **अवधिप्रत्यक्षं१ मनःपर्यवप्रत्यक्षं२ केवलज्ञानप्रत्यक्षम्३** ॥ ४०१० ॥

तत्रावधिप्रत्यक्षमाह—

**ओहिगुणपच्चइए, जे वट्टंते सुतंगवी धीरा।**
**ओहिविसयणाणत्थे, जाणसु ववहारसोधिकरे ॥ ४०११ ॥**

**अवधिर्द्विधा**— भवप्रत्ययो१ गुणप्रत्ययश्च२। तत्र संयतानां गुणप्रत्यय एव, न भवप्रत्ययः, तत आह— **अवधौ गुणप्रत्यये ये वर्त्तन्ते श्रुताङ्गविदो धीरास्तान् अवधिविषयज्ञानस्थान् जानीत व्यवहारशोधिकरान्** शुद्धव्यवहारकारिणः ॥ ४०११ ॥

**उज्जुमती विपुलमती, जे वट्टंती सुयंगवी धीरा।**
**मणपज्जवनाणत्थे, जाणसु ववहारसोहिकरे ॥ ४०१२॥**

ये **ऋजुमतौ विपुलमतौ** वा मनःपर्यवज्ञाने **श्रुताङ्गविदो धीरा वर्त्तन्ते**, तान् **मनःपर्यवज्ञानस्थान् जानीत व्यवहारशोधिकरान्** शुद्धव्यवहारकारिणः ॥ ४०१२॥

**आदिगरा धम्माणं, चरित्त-वरनाण-दंसणसमग्गा।**
**सव्वत्तगनाणेणं, ववहारं ववहरंति जिणा ॥ ४०१३॥**

ये **धर्मयोः** श्रुतधर्मस्य चारित्रधर्मस्य च **आदिकराः** तत्प्रथमतया प्रवर्त्तनशीलाश्चारित्र-**वरज्ञान-दर्शनसमग्रास्ते जिनाः सर्वत्रग-ज्ञानेन व्यवहारं व्यवहरन्ति**। उक्तः प्रत्यक्षः ॥ ४०१२॥ सम्प्रति परोक्षमाह—

**पच्चक्खागमसरिसो, होति परोक्खो वि आगमो जस्स।**
**चंदमुही[1] विव सो वि हु, आगमववहारवं होति ॥४०१४॥** [जीतक.भा.११०]



---

१. चंदमुहीव तु सो-जीतकल्पभाष्ये॥

यद्यपि पूर्वादिकं श्रुतं तथापि **यस्य आगमः** चतुर्दशपूर्वादिकः **परोक्षोऽपि प्रत्यक्षागमसदृशः** प्रत्यक्षावध्यादितुल्यरूपो भवति **सोऽप्यागमव्यवहारवान्** वक्तव्यो **भवति**। यथा चन्द्रसदृशमुखी कन्या **चन्द्रमुखीति**। एतदुक्तं भवति–यद्यपि पूर्वाणि श्रुतम्, नागमः। तथापि चतुर्दशादीनि पूर्वाणि अवध्याद्यागमतुल्यानीति तैर्व्यवहरन् आगमव्यवहारवानुच्यत इति॥ ४०१४ ॥ सम्प्रत्यागमस्य व्याख्यानमाह—

**नायं आगमियं ति य, एगट्ठं जस्स सो परायत्तो।**
**सो पारोक्खो वुच्चइ, तस्स पएसा इमे होंति ॥ ४०१५ ॥** [जीतक.भा.१११]

**ज्ञातम् आगमितमित्येकार्थम्,** एवं च ज्ञानमागम इत्येकार्थमापतितम्। तत्र यस्य आगमोऽपराधीनः स प्रत्यक्ष उच्यते, स चावध्यादिरूपः। **यस्य तु परायत्तः स परोक्ष उच्यते,** स च चतुर्दशपूर्वादिसमुत्थः, **तस्य** परोक्षस्याऽऽगमस्य **प्रदेशाः** प्रविभागा भेदा इत्यर्थः, इमे वक्ष्यमाणा **भवन्ति** ॥ ४०१४॥

तानेवाह—

**पारोक्खं ववहारं, आगमतो सुयधरा ववहरंति।**
**चोद्दस-दसपुव्वधरा, नवपुव्वि य गंधहत्थी य ॥ ४०१६ ॥** [जीतक.भा.११२]

ये **श्रुतधराः** चतुर्दशपूर्वधरा **दशपूर्वधरा नवपूर्विणो वा गन्धहस्तिनः** गन्धहस्ति-समानास्ते **आगमतः परोक्षं व्यवहारं व्यवहरन्ति** ॥ ४०१६ ॥

अत्राऽऽक्षेप-परिहारावभिधित्सुराह—

**किह आगमववहारी?, जम्हा जीवादयो पयत्था उ।**
**उवलद्धा तेहिं तू, सव्वेहिं नयविगप्पेहिं ॥ ४०१७ ॥** [जीतक.भा.११३]

**कथं** केन प्रकारेण साक्षात् श्रुतेन व्यवहरन्त **आगमव्यवहारिणः** प्रोच्यन्ते?। सूरिराह— **यस्माद् जीवादयः पदार्थास्तै**श्चतुर्दशपूर्वधरादिभिः **सर्वैर्नयविकल्पैः** नैगमादिनयभेदै-**रुपलब्धाः** ॥ ४०१७ ॥

एतदेव सविशेषमाह—

**जह केवली वियाणइ, दव्वं खेत्तं च कालभावं च।**
**तह चउलक्खणमेयं, सुयनाणी वी विजाणाति ॥ ४०१८ ॥**[जीतक.भा.११४]

**यथा केवली** केवलज्ञानेन सर्वं **द्रव्यं** सर्वं **क्षेत्रं** सर्वं **कालं** सर्वं **भावं** च सर्वात्मना स्वपरपर्यायभेदभिन्नं **जानाति**, एवं **श्रुतज्ञान्यपि चतुर्लक्षणं** द्रव्य-क्षेत्र-काल-भावरूपं श्रुतबलेन [ **वि** ]**जानाति**, तत एतेऽप्यागमव्यवहारिण उच्यन्ते॥ ४०१८॥

एतदेव प्रस्तुतं प्रायश्चित्तशुद्ध्यधिकारमधिकृत्य योजयति—

**पणगं मासविवड्ढी, मासिगहाणी य पणगहाणी य।**
**एगाहे पंचाहं, पंचाहे चेव एगाहं ॥ ४०१९॥**

**राग-द्दोसविवड्ढिं, हाणिं वा णाउ देंति पच्चक्खी।**
**चोद्दसपुव्वादी वि हु, तह नाउं देंति हीणऽहियं॥४०२०॥** [जीतक.भा.११५६]

यथा **प्रत्यक्षिणः** प्रत्यक्षागमज्ञानिनः 'तुल्येऽप्यपराधे' पञ्चकयोग्ये एकस्य **पञ्चकं** ददति, अपरस्य **रागद्वेषविवृद्धि**मुपलभ्य मासेन मासाभ्यां **मासैर्वा वृद्धिं** प्रयच्छन्ति। उपलक्षणमेतत्, मूलमनवस्थाप्यं पाराञ्चितं वा यच्छन्ति। तथा तुल्येऽपि पाराञ्चितयोग्येऽपराधे एकस्य पाराञ्चितम्, अपरस्याऽनवस्थाप्यं, मूलं, छेदं वा मासेन मासाभ्यां **मासैर्वा हान्या** तपो वा चशब्दात्



For Private And Personal

पञ्चकम्, यावदन्ते नमस्कारसहितम्, 'हा दुष्ठु कृतम्, हा दुष्ठु कारितम् हा दुष्ठु अनुमोदितम्' इत्येवं वैराग्यभावनातो **राग-द्वेषहानिं** भूयसीमतिभूयसीमतिभूयस्तरामुपलभ्य **प्रयच्छन्ति**। तथा कस्यचिन्मासिकप्रतिसेवनायामल्पां राग-द्वेषहानिमुपलभ्य पञ्चकहान्या मासिकं ददति, पञ्चविंशतिदिनानि ददतीत्यर्थः। तथा **एकाहं** नाम अभक्तार्थम्। कस्यचिदभक्तार्थे प्रतिसेविते **पञ्चाहं** ददति, **पञ्चाहे** वा प्रतिसेविते **एकाहम्,** उपलक्षणत्वादस्याऽऽचाम्लमेकाशनकं पूर्वार्द्धं निर्विकृतं पौरुषीं नमस्कारसहितं वा प्रयच्छन्ति। एवं **चतुर्दशपूर्व्यादयोऽपि** निश्चितं रागद्वेषहानि-वृद्धी उपलभ्य **हीनमधिकं** वा प्रायश्चित्तं ददति ॥ ४०१९ ॥ ४०२० ॥

अत्र परस्य प्रश्नमुदीरयति—

**चोयगपुच्छा पच्चक्खनाणिणो थेवे कहं बहुं दिंति।**
**दिट्ठंतो वाणियए, जिण-चोद्दसपुव्विए धमए ॥ ४०२१ ॥**

**चोदकस्य** अत्र **पृच्छा— प्रत्यक्षज्ञानिनः** जिनादयः **स्तोकेऽ**पराधे **कथं बहु प्रयच्छन्ति** प्रायश्चित्तम्? उपलक्षणमेतत् भूयसि वाऽपराधे स्तोकम् ?। अत्र सूरिराह— **दृष्टान्तोऽ**त्र वणिजा द्रष्टव्यः। तथा भूयः परस्य पृच्छा- **जिनादयः** केवलज्ञानादिबलेन परस्य भावं जानते,

**चतुर्दशपूर्विणस्तु** कथम् ? येन स्तोकेऽपि बहु, बहावपि स्तोकं ददति। सूरिराह— अत्र धमको दृष्टान्तः ॥ ४०२१ ॥

तत्र प्रथमतो **वणिग्दृष्टान्तं** भावयति—

**जं जहमोल्लं रयणं, तं जाणइ रयणवाणितो निउणो।**
**थोवं तु महल्लस्स वि, कासइ अप्पस्स वि बहुं तु ॥ ४०२२ ॥**

[जीत क.भा.११८]

यथा निपुणो **रत्नवणिग् यद्** रत्नं **यथामूल्यं तत्** तथा सम्यग् **जानाति**। ज्ञात्वा च कस्यचिन्**महतोऽपि** रत्नस्य **स्तोकं** मूल्यं ददाति, **कस्यचिदल्पस्याप्यद्भुत**गुणोपेतस्य **बहु** ॥ ४०२२ ॥

इमामेव दृष्टान्तभावनां प्रकारान्तरेणाह—

**अहवा[१] कायमणिस्स उ सुमहल्लस्स वि उ कागिणी मोल्लं।**
**वइरस्स उ अप्पस्स वि, मोल्लं होती सयसहस्सं ॥ ४०२३ ॥** [जीतक.भा.११९]

१. °वा वि कायमणिणो सु° जीतकल्प भाष्ये॥

**अथवेति** प्रकारान्तरे। रत्नपरीक्षको वणिक् **काचमणेः सुमहतोऽपि मूल्यं काकिनीं** करोति। **वज्रस्य** तु रत्नस्याऽल्पस्याऽपि **मूल्यं** तेन क्रियमाणं **शतसहस्रं भवति** ॥ ४०२३ ॥

अत्रोपनयमाह—

**इय मासाण बहूण वि, राग-द्दोसऽप्पयाए थोवं तु।**
**राग-द्दोसोवचया, पणगे वि उ तो बहुं देंति ॥ ४०२४ ॥** [जीतक.भा.१२०]

**इति** अमुना दृष्टान्तप्रकारेण **बहूनामपि** मासानां प्रायोग्ये अपराधे वैराग्यभावनोच्छलतो **राग-द्वेषाल्पतया** स्तोकं प्रायश्चित्तं ददति, सिंहव्यापादकस्येव। **रागद्वेषोपचयात् पञ्चकेऽप्यपराधे बहु** प्रायश्चित्तं **ददति** ॥ ४०२४ ॥

अधुना "जिण चोद्दस्सपुव्विए धमए" इत्यस्य व्याख्यानमाह—

**पच्चक्खी पच्चक्खं, पासति पडिसेवगस्स तो भावं।**
**किह जाणति पारोक्खी?, नायमिणं तत्थ धमएणं ॥ ४०२५ ॥**

[जीतक.भा.१२१]

**प्रत्यक्षी** जिनादिः **प्रत्यक्षं प्रतिसेवकस्य भावं जानाति, परोक्षी** चतुर्दशपूर्वादिः **कथं जानाति?** येन सोऽपि तथैव व्यवहरति। सूरिराह–**तत्र** तस्मिन् विषये **ज्ञातम्** उदाहरणम् इदं वक्ष्यमाणं **धमकेन** शङ्खध्मात्रा ॥ ४०२५॥

तदेव दर्शयति—

**नालीधमएण जिणा, उवसंहारं करेंति पारोक्खे।**
**जह सो कालं जाणति, सुएण सोहिं तहा सोउं ॥ ४०२६॥**

[जीत क.भा.१२२]

**'जिनाः'** तीर्थकृतः **परोक्षे** आगमे **उपसंहारं नालीधमकेन कुर्वन्ति।** इयमत्र भावना–नाडिकायां गलन्त्यामुदकगलनपरिमाणतो जानाति— एतावत्युदके गलिते यामो दिवसस्य रात्रेर्वा गत इति, ततोऽन्यस्य परिज्ञानाय शङ्खं धमति। तत्र **यथा स** अन्यो जनः शङ्खस्य शब्देन **श्रुतेन कालं** यामलक्षणं **जानाति तथा** परोक्षागमज्ञानिनोऽपि **शोधिम्** आलोचनां **श्रुत्वा** तस्य यथावस्थितं भावं जानन्ति, ज्ञात्वा च तदनुसारेण प्रायश्चित्तं ददति ॥ ४०२६॥

अथ कीदृशास्ते श्रुतज्ञानिनो ये प्रत्यक्षज्ञानिन इव शोधिं जानन्ति? तत आह—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**जेसिं जीवाऽजीवा, उवलद्धा सव्वभावपरिणामा।**
**सव्वाहि नयविहीहिं, केण कयं ? आगमेण कयं ॥ ४०२७॥**

**येषां** श्रुतबलेन सर्वे **जीवा अजीवाश्च उपलब्धा** द्रव्यतः, **सर्वेषामपि** च **भावानां** पदार्थानामुपलब्धाः श्रुतज्ञानविषयाः **परिणामाः** पर्यायाः। कैः? इत्याह— **सर्वै**र्नैगमादिभिः **नयविधिभिः** नयविकल्पैस्ते प्रत्यक्षज्ञानिन इव परस्य शोधिं जानन्ति। अत्र परप्रश्नः **केन कृतं** तत् श्रुतज्ञानं ? यस्येदृशं माहात्म्यम्? अत आह—**आगमेन** केवलज्ञानेन **कृतम्**॥ ४०२७॥

एतावेवाऽऽक्षेप-परिहारौ भावयति—

**तं पुण केण कयं तू, सुयनाणं जेण जीवमादीया।**
**नज्जंति सव्वभावा ?, केवलनाणीण तं तु कयं ॥ ४०२८ ॥**

[जीत क.भा.१२४]

**तत् पुनः श्रुतज्ञानं केन कृतं ? येन जीवादयः सर्वे भावा ज्ञायन्ते।** सूरिराह— **केवलज्ञानिभिः कृतम्**, गाथायां षष्ठी तृतीयार्थे प्राकृतत्वात् ॥ ४०२८॥



For Private And Personal

तदेवं यथा श्रुतज्ञानिनोऽपि जानन्ति तथा प्रतिपादितम्। अधुना शोधिविधिमाह—

**आगमतो ववहारं, पर सोच्चा संकियम्मि उ चरित्ते।**
**आलोइयम्मि आराहणा अणालोइए भयणा॥ ४०२९॥**

**आगमतः** प्रत्यक्षज्ञानी परोक्षज्ञानी वा **परे** परस्मिन् व्यवहारं करोति परस्याऽऽलोचनां श्रुत्वा, नान्यथा। तत्र यदि कलुषितचारित्रतया न सम्यगालोचयति, किन्त्वालोचनामर्यादामतिक्रम्य वर्त्तते तदा **शङ्कितमिति** वा भिन्नमिति वा कलुषितमिति वा एकार्थम्। [एतादृशे] **चारित्रे** सति न सम्यगनेनाऽऽलोचितमिति ज्ञात्वा तं ब्रूते- 'अन्यत्र गत्वा शोधिं कुरु'। यदि पुनः सम्यगालोचयति तदा ददाति प्रायश्चित्तम्। अथ यदि प्रत्यक्षागमज्ञानिनः परोक्षागमज्ञानिनो वा सर्वभावविषयपरिज्ञानं ततः कस्मात् तस्य पुरत आलोच्यते ? किन्तु तस्य समीपमुपगम्य वक्तव्यम्—'अपराधान् मे भवन्तो जानते तस्य शोधिं प्रयच्छत'। तत आह— **आलोइयम्मी** त्यादि। आलोचिते बहुगुणसम्भवतः सम्य**गाराधना** भवति, **अनालोचिते** आराधनाया **भजना** विकल्पना-कदाचिद् भवति कदाचिन्नेति। एतच्चाग्रे भावयिष्यते ॥ ४०२९॥

तत्र "आगमतो ववहारं पर सोच्चे" ति व्याख्यानयति—

**आगमववहारी छव्विहो वि आलोयणं निसामेत्ता।**
**देति ततो पच्छित्तं, पडिवज्जति सारिओ जइ य ॥ ४०३० ॥**

**आगमव्यवहारी षड्विधो**ऽपि परस्याऽऽलोचनां **निशम्य ततः प्रायश्चित्तं ददाति। यदि च** कमप्यराधं विस्मृतं **स्मारितस्सन्** सम्यक् **प्रतिपद्यते** तदा स्मारयति च। अन्यथा तस्याऽऽलोचनामेव न ददाति ॥ ४०३० ॥

साम्प्रतमुत्तरार्द्धं व्याख्यानयति—

**आलोइय-पडिक्कंतस्स होइ आराहणा तु नियमेण।**
**अणालोइम्मि भयणा, किह पुण भयणा हवति तस्स? ॥ ४०३१ ॥**

[तुला जी.भा.१२७]

पूर्वमपराधजात**मालोचितम्,** ततस्तस्मात् **प्रतिक्रान्तस्य** अपुनःकरणतया प्रतिनिवृत्तस्य **नियमेन** पर्यन्ते सम्यगाराधना भवति। **अनालोचिते** पुनर्**भजना**। आह-**कथं पुनर**नालोचिते **तस्या**राधनाविषये **भजना भवति**॥ ४०३१ ॥

तत्राह—

**कालं कुव्वेज्ज सयं, अमुहो वा होज्ज अहव आयरितो।**
**अप्पत्ते पत्ते वा, आराहण तह वि भयणेवं ॥ ४०३२ ॥**

कोऽपि आलोचनां ग्रहीष्यामि इत्यालोचनापरिणामपरिणत आलोचनाग्रहणाय सम्प्रस्थित आलोचनार्हसमीपम्। स च तमप्राप्त एवापान्तराले स्वयं **कालं कुर्यात्,** यदि वा प्राप्तोऽपि रोगवशाद**मुखो जातः, अथवा** तस्याऽप्राप्तवत एव स आलोचनार्ह **आचार्यः** कालगतः, यदि वा प्राप्तवतोऽप्यमुखो जातः, ततः स एवमालोचनापरिणामपरिणत आलोचनाया असम्भवेऽपि कालं कुर्वन्नाराधकः। यदि पुनर्न सम्यगालोचनापरिणामपरिणतस्तदा सोऽनाराधकः। स च तथाकालगतो दीर्घसंसारी भवति। **एवमाराधना** आलोचनार्हे **प्राप्तेऽप्राप्ते वा भजनया** भवति ॥ ४०३२ ॥

सम्प्रत्यागमव्यवहारिणामपि पुरत आलोचनायां गुणानुपदर्शयति—

**अवराहं वियाणंति, तस्स सोहिं च जइ वि।**
**[1]तहाऽवाऽऽलोयणा वुत्ता, आलोएंते बहू गुणा ॥ ४०३३ ॥** [जी.भा.१३०]

---

१. तधेवालो०- ला.। तहावि आलो० मु.॥

**यद्यप्यागमव्यवहारिणः तस्य** आलोचकस्यापराधं **विजानन्ति शोधिं च, तथापि** तेषामपि पुरत **आलोचना** दातव्या **उक्ता** तीर्थकर-गणधरैः। यत **आलोचयति बहवो गुणाः**। तथाहि आलोचनाचार्येण स आलोचकः प्रोत्साह्यते, यथा—'वत्स ! त्वं धन्यः, त्वं सभाग्यः यदेवं मानं निहत्याऽऽत्महितार्थतया स्वरहस्यानि प्रकटयसि, महादुष्करमेतत्'। एवं स प्रोत्साहितः सन् प्रवर्द्धमानपरिणामः सम्यग् निःशल्यो भूत्वा यथावस्थितमालोचयति, शोधिं च सम्यक् प्रतिपद्यते, ततः पर्यन्ते आराधना, स्तोककालेन च मोक्षगमनमिति ॥ ४०३३॥

अथ कथमागमिनो व्यवहारं प्रयुञ्जते ? तत आह—

**दव्वेहि पज्जवेहि य कमखेत्ते कालभावपरिसुद्धं।**
**आलोयणं सुणेत्ता, तो ववहारं पउंजंति ॥ ४०३४॥** [जी.भा.१३१]

**द्रव्यैः** सचित्तादिभिः **पर्यायैः** तेषामेव सचित्तादिद्रव्याणामवस्थाविशेषैः परिणामविशेषैः तथा **क्रमतः क्षेत्रतः कालतो भावतश्च परिशुद्धामालोचनां श्रुत्वा ततः**, तदनन्तरं **व्यवहारं**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



शोधिव्यवहारं **प्रयुञ्जते,** नान्यथा। तत्र यदि सचित्तं सेवित्वा सचित्तमेवाऽऽलोचयति तदा द्रव्यशुद्धा सा आलोचना, यदा तु सचित्तं प्रतिसेव्याचित्तमालोचयति तदा द्रव्याऽशुद्धा। तथा यामवस्थामुपगतं सचित्तं प्रतिसेव्य तामवस्था[मुप]गतं तदालोचयति तदा सा आलोचना पर्यायशुद्धा, यदा त्वन्यामवस्थामुपगतं प्रतिसेव्यान्यावस्थमालोचयति तदा पर्यायाऽशुद्धा। तथा यदि प्रतिसेवनानुलोममालोचयति तदा सा क्रमशुद्धा, उत्क्रमेणाऽऽलोचयतः क्रमाऽशुद्धा। तथा यद् यत्र जनपदेऽध्वनि वा प्रतिसेवितं तत् तथैवाऽऽलोचयतः क्षेत्रशुद्धा आलोचना, जनपदे प्रतिसेवितमध्वनि कथयतः क्षेत्राऽशुद्धा। तथा यद्यदा सुभिक्षे दुर्भिक्षे वा दिवा रात्रौ वा प्रतिसेवितं तत् तदालोचयतः कालशुद्धा, सुभिक्षे प्रतिसेव्य दुर्भिक्षे कथयतो रात्रौ वा प्रतिसेव्य दिवसे कथयतः कालाऽशुद्धा। तथा येन भावेन अनाभोगादिना सेवितं तं भावं कथयतो भावशुद्धा, उपेत्य प्रतिसेव्यानाभोगादिना कथयतो भावाशुद्धा॥ ४०३४॥

सम्प्रति भावमेवोपदर्शयति —

**सहसा अण्णाणेण व, भीएण व पेल्लिएण व परेण।**
**वसणेण पमादेण व, मूढेण व रागदोसेहिं ॥ ४०३५॥** [जी.भा.१३४]



For Private And Personal

तेन प्रतिसेवकेन **सहसा अज्ञानेन वा भीतेन वा परेण वा प्रेरितेन** वा **व्यसनेन** वा द्यूतादिना **प्रमादेन वा मूढेन वा राग-द्वेषाभ्यां** वा प्रतिसेव्य यदि तथैवाऽऽलोच्यते तदा प्रायश्चित्तममी ददति, नान्यथेति वाक्यशेषः ॥ ४०३५ ॥

सम्प्रति "सहसा" इत्यस्य व्याख्यानमाह—

**पुव्वं अपासिऊणं छूढे पायम्मि जं पुणो पासे।**
**न य तरति नियत्तेउं पायं सहसाकरणमेयं ॥ ४०३६ ॥** [जी.भा.१३१]
[जी.भा.१३५]

**पूर्वम्** अग्रेतने प्रदेशे कुलिङ्गिन**मदृष्ट्वा क्षिप्ते** उत्पाटिते **पादे यत् पुनः पश्यति** कुलिङ्गिनं समापतितम्, **न च पादं निवर्त्तयितुं शक्नोति**, तत एवं यत् तस्य व्यापादन**मेतत् सहसाकरणम्** ॥४०३६ ॥

साम्प्रतमज्ञानमाह—

**अन्नयरपमाएणं असंपउत्तस्सऽणोवउत्तस्स।**
**इरियाइसु भूयत्थे अवट्टतो एयमण्णाणं ॥ ४०३७ ॥** [जी.भा.१३६]

पञ्चानां प्रमादानामन्यतरेणापि प्रमादेन **असम्प्रयुक्तस्य** अक्रोडीकृतस्य, किन्त्वेवमेवा-**नुपयुक्तस्य**, अत एव **ईर्यादिषु** समितिषु **भूतार्थेन** तत्त्वतोऽवर्त्तमानस्य यद्भवन**मेतदज्ञानम्** ॥ ४०३७ ॥

अधुना 'भीएण व। पेल्लिएण व परेण' इत्यस्य व्याख्यानमाह—

**भीतो पलायमाणो, अभियोगभएण वा वि जं कुज्जा।**
**पडितो वाऽपडितो वा, पेल्लिज्जा उ पेल्लितो पाणे॥ ४०३८ ॥**

[जीतकल्प भा.१३७]

**अभियोगभयेन भीतः पलायमानो यत् कुर्यात्** प्राणव्यपरोपणादि तद् भीतेनेति द्रष्टव्यम्। तथा परेण **प्रेरितस्सन् पतितोऽपतितो वा प्राणान्** द्वीन्द्रियादीन् एकेन्द्रियान् वा **प्रेरयेत्**॥ ४०३८ ॥

सम्प्रति व्यसनादिपदानि व्याचष्टे—

**जूयादि होइ वसणं, पंचविहो खलु भवे पमादो उ।**
**मिच्छत्त भावणा उ, मोहो तह राग-दोसा य॥ ४०३९ ॥**

[जीतकल्प भा.१३८]

**द्यूतादि भवति व्यसनम्। प्रमादः खलु** मद्यादिभेदाद् **भवति पञ्चविधः। मिथ्यात्वं भावना मोहो रागद्वेषाः** सुप्रतीताः ॥

**एएसिं ठाणाणं, अन्नयरे कारणे समुप्पन्ने।**
**तो आगमवीमंसं, करेंति अत्ता तदुभएणं ॥ ४०४० ॥** [जीतकल्प भा.१३९]

**एतेषाम्** अनन्तरोदितानां सहसाप्रभृतीनां स्थाना**नामन्यतरस्मिन् कारणे समुत्पन्ने** सति आलोचनायां प्रदत्ताय**मागमविमर्शमाप्ताः उभयेन** सूत्राऽर्थलक्षणेन **कुर्वन्ति।** यथा—अयं सहः अयमसहः, अयमेतावता शोत्स्यति अयं नेति, अथवा किमनेन सम्यगालोचितं? किं वा न? इति ॥ ४०४० ॥

साम्प्रतमागमविमर्शमेव व्याख्यानयति—

**जइ आगमो य आलोयणा य दो वि समयं तु निवयंति।**
**एसा खलु वीमंसा, जो व सहू जेण वा सुज्झे ॥ ४०४१ ॥** [जी.भा.१४०]

**यद्यागमश्च आलोचना च** एते **द्वे अपि समकं** परस्परमविसंवादितया **निपततः**, यथैव तस्याऽऽगमस्तथैवेतरस्याऽऽलोचना, यथैव तस्याऽऽलोचना तथैवाऽऽगमिन आगमः, **एष खलु** आगम**विमर्श** उच्यते। अस्मिन् सति शोधिं ददति, नान्यथा। यदि वा **यः सहो**ऽसहो **वा येन वा यः शुध्यति** एतत्परिभावनमागमविमर्शः ॥ ४०४१ ॥

सम्प्रत्याप्तशब्दव्याख्यानमाह—

**नाणमादीणि अत्ताणि, जेण अत्तो उ सो भवे।**
**राग-द्दोसपहीणो वा, जे व इट्ठा विसोधीए ॥ ४०४२ ॥** [जी.भा.१४१]

**ज्ञानादीनि** ज्ञान-दर्शन-चारित्राणि **येनाऽऽप्तानि स भवत्याप्तः**, ज्ञानादिभिराप्यते स्म आप्त इति व्युत्पत्तेः। यो **वा राग-द्वेषप्रहीणः** स आप्तः। यदि **वा ये इष्टाः विशोधौ** विशोधिविषये ते आप्ताः ॥ ४०४२ ॥

सम्प्रत्युभयशब्दव्याख्यानार्थमाह—

**सुत्तं अत्थो उभयं, आलोयण आगमो व इति उभयं।**
**जं तदुभयं ति वुत्तं, तत्थ इमा होति परिभासा ॥ ४०४३ ॥** [जी.भा.१४२]

**सूत्रमर्थ इत्युभयम्**, तेनाऽऽगमविमर्शं **कुर्वन्ति**—किमयं सहः? इत्यादि। अथवा **आलोचनमागम इत्युभयम्** तेनाऽऽगमविमर्शं विदधति—किं यथावस्थिताऽस्याऽऽलोचना किं वा न? इति। तत्र **यत् तदुभयमित्युक्तं तत्र इयं** वक्ष्यमाणा **परिभाषा भवति** ॥ ४०४३ ॥

तामेवाह—

**पडिसेवणाइयारे, जइ नाऽऽउट्टति जहक्कमं सव्वे।**
**न हु देंती पच्छित्तं, आगमववहारिणो तस्स ॥ ४०४४ ॥** [जी.भा.१४३]

[१]**पेडिसेवणाइयारे जइ आउट्टति जहक्कमं सव्वे।**
**देंति ततो पच्छित्तं, आगमववहारिणो तस्स ॥ ४०४५ ॥** [जी.भा.१४४]

**यदि प्रतिसेवनातिचारान् यथाक्रमं सर्वान्** यदि **नाऽऽकुट्टयति** नालोचयति तदा **तस्याऽऽगमव्यवहारिणः प्रायश्चित्तं न ददति** ॥ ४०४४ ॥

---

१. एषा ४०४५ गाथा मु. मध्ये नास्ति॥

**यदि** पुनः **प्रतिसेवनातिचारान् यथाक्रमं सर्वान् आकुट्टयति** आलोचयति **तदा तस्याऽऽगमव्यवहारिणः** प्रायश्चित्तं ददति ॥ ४०४५ ॥

**'कहेहि सव्वं' जो वुत्तो, जाणमाणो वि गूहति।**
**न देंति तस्स पच्छित्तं, बेंति अन्नत्थ सोहय ॥ ४०४६ ॥** [जीतकल्प भा. १४५]

सर्वमनालोचयन् **'कथय सर्वं** मा निगूहयेति' **य उक्तस्सन् जानानोऽपि गूहयति तस्य प्रायश्चित्तमागमव्यवहारिणो न ददति,** किन्तु **ब्रुवते [अन्यत्र]** अन्यस्य समीपे गत्वा **शोधय** शोधिं गृहाण ॥ ४०४६ ॥

**न संभरति जो दोसे, सब्भावा न उ मायया।**
**पच्चक्खी साहए ते उ, माइणो उ न साहए ॥ ४०४७ ॥** [जीतकल्प भा.१४६]

**यो दोषान् सद्भावतो न स्मरति, न मायया** तस्य **प्रत्यक्षी** प्रत्यक्षागमज्ञानी **कथयति, न तु मायिनः कथयति** ॥ ४०४७ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**जइ आगमो य आलोयणा य दोवि विसमं निवइयाइं।**
**न हु देंती पच्छित्तं, आगमववहारिणो तस्स ॥ ४०४८ ॥**

**यद्यागम आलोचना च एते द्वे अपि विषमं निपतिते** यथा तेनाऽऽलोचितं तथाऽऽगमज्ञानी तस्यातीचारं न प्रेक्षते, किन्त्वन्यादृशम्, ऊनमधिकं वा इत्यर्थः। तदा **तस्याऽऽगमव्यवहारिणः प्रायश्चित्तं न ददति** ॥ ४०४८ ॥

**जइ आगमो य आलोयणा य दोन्नि वि समं निवइयाइं।**
**देंति ततो पच्छित्तं, आगमववहारिणो तस्स ॥ ४०४९ ॥** [जी.भा.१४८]

**यद्यागम आलोचना च एते द्वे अपि समं** निपतिते, यथापराधमालोचनामागमज्ञानी पश्यतीत्यर्थः, **ततस्तस्याऽऽगमव्यवहारिणः प्रायश्चित्तं ददति** ॥ ४०४९ ॥

अथ कीदृश आलोचनार्हः ? कीदृशो न ? इत्याह—

**अट्ठारसहिं ठाणेहिं, जो होइ अपरिनिट्ठितो।**
**नऽलमत्थो तारिसो होइ, ववहारं ववहरित्तए ॥ ४०५० ॥** [जी.भा.१५०]



For Private And Personal

**अष्टादशसु** वक्ष्यमाणेषु **स्थानेषु,** गाथायां तृतीया सप्तम्यर्थे, **यो भवति अपरिनिष्ठितः** सम्यगपरिज्ञाता, स तादृशो **व्यवहारं व्यवहर्त्तुं नालमर्थः** पर्याप्तो न भवति ॥ ४०५० ॥

**अट्ठारसहिं ठाणेहिं, जो होइ परिनिट्ठितो।**
**अलमत्थो तारिसो होति, ववहारं ववहरित्तए ॥ ४०५१ ॥** [जी.भा.१५१]

**अष्टादशसु** वक्ष्यमाणेषु **स्थानेषु यो भवति परिनिष्ठितः** सम्यग्ज्ञाता स **तादृशो व्यवहारं व्यवहर्तुम् अलमर्थः** पर्याप्तो भवति ॥ ४०५१ ॥

**अट्ठारसहिं ठाणेहिं, जो होति अपतिट्ठितो।**
**नऽलमत्थो तारिसो होइ, ववहारं ववहरित्तए ॥ ५०५२ ॥** [जी.भा.१५२]

**अट्ठारसहिं ठाणेहिं, जो होति सुपतिट्ठितो।**
**अलमत्थो तारिसो होइ, ववहारं ववहरित्तए ॥ ४०५३ ॥** [जी.भा.१५३]

श्लोकद्वयमपि पूर्ववत्। नवरम् **अप्रतिष्ठितः** तेषु सम्यगवर्त्तमानः। **प्रतिष्ठितः** सम्यक् स्थितः ॥४०५२ ॥ ४०५३ ॥

सम्प्रति तान्येवाष्टादश स्थानान्याह—

**वयछक्कं६ कायछक्कं६, अकप्पो१ गिहिभायणं२ य पलियंको३ ।**
**गोयरनिसिज्ज४ ण्हाणे५, भूसा६ अट्ठारस ट्ठाणे ॥ ४०५४॥** [जी.भा.१५४]

**व्रतषट्कं** प्राणातिपात-मृषावादा-ऽदत्तादान-मैथुन-परिग्रह-रात्रिभोजन[विरति]लक्षणम्६। **कायषट्कं** पृथिव्यप्-तेजो-वायु-वनस्पति-त्रसलक्षणम्६। **अकल्पः** पिण्ड-शय्या-वस्त्र-पात्ररूपं चतुष्टयमकल्पनीयम्१। **गृहिभाजनं** कांस्यपात्रादि२। **पल्यङ्कः** शय्याविशेषो गृहस्थोचितः३। **गोचरनिषद्या** गोचरगतस्य निषदनम्४। **स्नानं** देशतः सर्वतो वा शरीरस्य प्रक्षालनम्५। **विभूषा** मण्डनम्६ **अष्टादशं स्थानम्** ॥ ४०५४॥

अधुना परिनिष्ठित-प्रतिष्ठितशब्दयोरर्थमाह—

**परिनिट्ठितो परिन्नाया, पतिट्ठितो जो ठितो उ तेसु भवे।**
**अविऊ सोहि न याणइ, अठितो पुण अन्नहा कुज्जा॥४०५५॥**

[जी.भा.१५५]

**परिनिष्ठितो** नाम-यथायोग्यं विधेयतया प्रतिषेध्यतया वा सम्यक् **परिज्ञाता**। **प्रतिष्ठितः यः तेषु** अष्टादशसु स्थानेष्वागमानुसारतो विधायकतया च **स्थितः**। अत्रापरिनिष्ठिते अप्रतिष्ठिते वा को दोषः ? येन तस्याऽऽलोचनार्हत्वप्रतिषेधः, तत आह—**अविद्वान्** अपरिनिष्ठितः **शोधिं न जानाति**। **अप्रतिष्ठितः** निःशूकतया 'मा ममापि गुरुतरं प्रायश्चित्तमापतेद्' इति भयतो **वाऽन्यथा** व्यवहारं **कुर्यात्**। तेनोभयोरप्यालोचनार्हत्वप्रतिषेधः ॥ ४०५५ ॥

**बत्तीसाए ठाणेसुं जो, होई अपरिनिट्ठितो।**
**नऽलमत्थो तारिसो होइ, ववहारं ववहरित्तए ॥ ४०५६ ॥**
**बत्तीसाए ठाणेसुं जो, होइ परिनिट्ठितो।**
**अलमत्थो तारिसो होइ, ववहारं ववहरित्तए ॥ ४०५७**
**बत्तीसाए ठाणेसुं जो, होइ अपतिट्ठितो।**
**नऽलमत्थो तारिसो होति, ववहारं ववहरित्तए ॥ ४०५८ ॥**
**बत्तीसाए ठाणेसुं जो, होति सुपतिट्ठितो।**
**अलमत्थो तारिसो होति, ववहारं ववहरित्तए ॥ ४०५९ ॥** [जी.भा.१५६-९]

श्लोकचतुष्टयमपि पूर्ववत् ॥ ४०५६-४०५९ ॥

सम्प्रति तान्येव द्वात्रिंशत्स्थानान्याह—

**अट्ठविहा गणिसंपय, एक्केक्का चउविहा मुणेयव्वा।**
**एसा खलु बत्तीसा, ते पुण ठाणा इमे होंति ॥ ४०६० ॥** [जी.भा.१६०]

**गणिनः** आचार्यस्य **सम्पद् अष्टविधा** अष्टप्रकारा। **एकैका** च भवति **चतुर्विधा ज्ञातव्या। एषा** च **द्वात्रिंशत्** स्थानानां भवति। तत्र यानि सम्पदोऽष्टौ **स्थानानि तानीमानि भवन्ति** ॥ ४०६० ॥ तान्येवाह—

**आयार१ सुय२ सरीरे३, वयणे४ वायण५ मती६ पयोगमती७।**
**एतेसु संपया खलु, अट्ठमिया संगहपरिण्णा८ ॥ ४०६१ ॥** [जी.भा.१६१]

**आचारे१ श्रुते२ शरीरे३ वचने४ वाचनायां५ मतौ६ प्रयोगमतौ७ एतेषु** स्थानेषु **सम्पदो भवन्ति।** ताश्च सर्वसङ्ख्यया सप्त। **अष्टमिका** सम्पत् **सङ्ग्रहपरिज्ञा८** ॥ ४०६१ ॥

**एसा अट्ठविहा खलु, एक्केक्कीए चउव्विहो भेदो।**
**इणमो उ समासेणं, वोच्छामि अहाणुपुव्वीए ॥ ४०६२ ॥** [जी.भा.१६२]

**एषा** अनन्तरोदिता **अष्टविधा** खलु सम्पत्। **एकैकस्याश्च** सम्पदश्चतुर्विधः **अयं** वक्ष्यमाणो **भेदः**। तं **समासेन यथानुपूर्व्या** परिपाट्या **वक्ष्यामि** ॥ ४०६२ ॥

प्रतिज्ञामेव निर्वाहयति—

**आयारसंपयाए, संजमधुवजोगजुत्तया पढमा१।**
**बिइय असंपग्गहिया२, अणिययवित्ती भवे तइया३ ॥४०६३ ॥** [जी.भा.१६३]

**तत्तो य वुड्ढसीले४, आचारे संपया चउद्धेसा।**
**चरणं तु संजमो ऊ, तहियं निच्चं तु उवउत्तो१ ॥ ४०६४ ॥** [जी.भा.१६४]

**आचारसम्पदि** अवान्तरभेदतश्चतस्रः सम्पदः। तद्यथा— **प्रथमा संयमध्रुवयोगयुक्तता१, द्वितीया असम्प्रग्रहिता** सम्प्रग्रहरहितता२, **तृतीया भवत्यनियतवृत्तिः३, ततश्चतुर्थी** सम्पद्

**वृद्धशीलो** वर्त्तते४। एषा **आचारे सम्पच्चतुर्द्धा।** तत्र संयमध्रुवयोगयुक्तता नाम **संयमः-चरणं तस्मिन् ध्रुवं नित्यं** योगयुक्तता-**उपयुक्तता** संयमध्रुवयोगयुक्तता१ असम्प्रग्रहिता नाम जात्यादिभिर्मदैरनुत्सिक्तता ॥ ४०६३ ॥ ४०६४ ॥

तथा चाह—

**आयरितोऽहं बहुस्सुतो, तवस्सि जच्चादिगेहि व मएहि।**
**जो होति अणुस्सित्तो, असंपगहितो भवे सो उ**२ ॥ **४०६५** ॥ [तुला-जी.भा.१६५]

**आचार्योऽहम्** '**बहुश्रुतोऽहम्' तपस्व्यहम्**, इति मदैर्जात्यादिभिर्वा **मदैर्यो भवत्यनुत्सिक्तः स भवति असम्प्रग्रहितः**, मदसम्प्रग्रहरहितत्वात्२ ॥४०६५ ॥

'अनियतवृत्तिता' अनियतचारिता, तथा चाह—

**अणिययचारी अणिययवित्ती अगिहितो व होति अणिकेतो** ३।
**निहुयसभाव अचंचल, नायव्वो वुड्ढसीलोत्ति**४ ॥ **४०६६** ॥ [जी.भा.१६६]

अनियतवृत्तिर्नाम-**अनियतचारी**, अथवा **अगृहिकोऽविद्यमाननिकेतः अनियतवृत्तिः**३। तथा **निभृतस्वभावः**। एतदेव व्याचष्टे-**अचञ्चलो वृद्धशीलो ज्ञातव्यः**४॥ ४०६६॥

उक्ता आचारसम्पच्चतुर्द्धा, सम्प्रति श्रुतसम्पदश्चातुर्विध्यमाह—

**बहुसुय१ परिचियसुत्ते२, विचित्तसुत्ते३ य होइ बोधव्वे।**
**घोसविसुद्धिकरे या४, चउहा सुयसंपया होइ ॥ ४०६७॥** [जी.भा.१६१]

**श्रुतसम्पत् चतुर्द्धा** चतुष्प्रकारा **भवति**। तद्यथा—**बहुश्रुतः**१ **परिचितसूत्रः**२ **विचित्रसूत्रः**३ **घोषविशुद्धिकरः**४। सम्पत्-सम्पद्वतोरभेदेनाभिधानम्, श्रुत-श्रुतवतोः कथञ्चिदभेदात्। एवमुत्तरत्र पूर्वं च परिभावनीयम् ॥ ४०६७॥

तत्र बहुश्रुतमाह—

**बहुस्सुय जुगप्पहाणो, अब्भिंतर बाहिरं सुयं बहुहा।**
**होइ चसद्दग्गहणा, चारित्तं पी सुबहुयं तु१॥ ४०६८॥** [जी.भा.१६८]

यस्य **बहुधा** बहुप्रकारम् **अभ्यन्तरम्** अङ्गप्रविष्टं **बाह्यम्** अङ्गबाह्यं **श्रुतं भवति** विद्यते, **चशब्दग्रहणात् सुबहुकं चारित्रमपि** यस्य स **युगप्रधानो बहुश्रुतः**१ ॥ ४०६८॥

**सगनामं व परिचियं, उक्कम-कमतो बहूहि वि गमेहिं२।**
**ससमय-परसमएहि य, उस्सग्गऽववायतो चित्तं३ ॥ ४०६९ ॥** [जी.भा.१६९]

यस्य श्रुतम् **उत्क्रमतः क्रमेण** च, तथा क्रमेण उत्क्रमेण च। एकैकपदमोचनेन द्विद्विपदमोचनेन इत्यादिभिरपि **बहुभिर्गमैः, स्वनामेव** स्वाभिधानमिव **परिचितं** स परिचितसूत्रः२। तथा यस्य **स्वसमय-परसमयाभ्यां** स्वसमय-परसमयवक्तव्यताभ्याम् **उत्सर्गापवादेन** च उत्सर्गानुविद्धमपवादानुविद्धं च **चित्रं** विचित्रं सूत्रं स विचित्रसूत्रः३ ॥ ४०६९ ॥

घोषविशुद्धिकरमाह—

**घोसा उदात्तमादी, तेहि विसुद्धं तु घोसपरिसुद्धं।**
**एसा सुतोवसंपय, सरीरसंपयमतो वोच्छं ॥ ४०७० ॥** [जी.भा.१७०]

**घोषा उदात्तादयस्तैः परिशुद्धं घोषविशुद्धम्,** तत्करणशीलो घोषविशुद्धिकरः ४। **एषा** चतुर्द्धा **श्रुतोपसम्पत्। अत** ऊद्‌र्ध्वं **शरीरोपसम्पदं वक्ष्ये** ॥ ४०७० ॥

तामेवाह—

**आरोहपरीणाहो१, तह य अणुत्तप्पया सरीरम्मि२।**
**पडिपुण्णमिंदिएहि य३, थिरसंघयणो४ य बोधव्वो॥ ४०७१॥**

[जी.भा.१७१]

**शरीरे** शरीरस्य आरोहसमः परिणाह **आरोहपरिणाहः१ तथा अनुत्रप्यता** अलज्जनीयता२। तथा **प्रतिपूर्णमिन्द्रियैः**३। **स्थिरसंहननश्चतुर्थो बोद्धव्यः**४॥ ४०७१॥

तत्राऽऽरोहपरिणाहमाह—

**आरोहो दिग्घत्तं, विक्खंभो वि जइ तेत्तितो चेव।**
**आरोहपरीणाहे, उवसंपय एस नायव्वा ॥ ४०७२॥** [जी.भा.१७२]

**आरोहो दीर्घत्वम्,** परिणाहो **विष्कम्भः** विशालता। तत्र यावानारोह**स्तावान् यदि** विष्कम्भो भवति तदा **एषा उपसम्पद् आरोहपरिणाहे ज्ञातव्या** ॥ ४०७२॥

अनुत्रप्यतामाह—

**तवु[1] लज्जाए धाऊ, अलज्जणीयो अहीणसव्वंगो।**
**होइ अणुत्तप्पेसो, अविगलइंदी उ पडिपुण्णो ॥ ४०७३ ॥** [जी.भा.१७३]

**त्रपुधातुर्लज्जायां** वर्त्तते, "**त्रपौषि लज्जायाम्**" इति वचनात्। तत उत्प्राबल्येन त्रप्यते-लज्ज्यते येन तद् उत्त्रप्यम्, न उत्त्रप्यमनुत्त्रप्यम् **अलज्जनीयम्।** तथा च शरीर-शरीरवतोर-भेदमधिकृत्याह— **अलज्जनीयः**, किमुक्तं भवति? **अहीनसर्वाङ्ग एष भवत्यनुत्त्रप्यः।** तथा अविकलानि-स्पष्टं सम्पूर्णानि इन्द्रियाणि यस्य सोऽ**विकलेन्द्रियः परिपूर्णः** परिपूर्णेन्द्रिय उच्यते ॥ ४०७३ ॥

स्थिरसंहननमाह—

**पढमगसंघयणो थिरो, बलियसरीरो व होति नायव्वो।**
**एसा सरीरसंपय, एत्तो वयणम्मि वोच्छामि ॥ ४०७४ ॥** [जी.भा.१७४]



---

१. त्रपु- पु.प्रे.। तपु-जी.भा.॥

**प्रथमसंहननः स्थिरः** स्थिरसंहननः। अथवा **बलिकशरीरः** स्थिरसंहननो **[ भवति ]** **ज्ञातव्यः**। **एषा** चतुष्प्रकारा **शरीरसम्पदुक्ता। अत** ऊर्ध्वमिदानीं **वचने** सम्पदं **वक्ष्यामि**॥ ४०७४॥

तामेवाह—

**आदेज्ज१ महुरवयणे२, अणिस्सियवयणे३ तहा असंदिद्धे४।**
**आदेज्ज गज्झवक्को, अत्थऽवगाढं भवे महुरं॥ ४०७५॥** [जी.भा.१७५]
**अथवा[१] अफरुसवयणो, खीरासवमादिलद्धिजुत्तो वा२।**
**निस्सिय कोहाईहि, अहवा वी राग-दोसेहिं३ ॥ ४०७६॥**

**आदेज्ज** त्ति पदैकदेशे पदसमुदायोपचाराद् आदेयवचन इति द्रष्टव्यम्१, एवमन्यत्रापि।

१. जीतकल्प भाष्ये ४०७६ गाथा स्थाने इमे द्वे गाथे स्त :- अहवा अफरुसवयणी खीरासवलद्धिमादिजुत्तो वा। अहवा सूसर-सूहगगंभीरजुओ महुरवक्को॥१७६॥ णिस्सिओ कोहादीहिं रागद्दोसेहिं वा वि जं वयइ। होति अणिस्सियवयणो जो वयणा एयवइरित्तं ॥१७७॥

तथा **मधुरवचनः**२ **अनिश्रितवचनः**३ **असन्दिग्धः** असन्दिग्धवचनः४। तत्र **आदेयः** आदेयवचनो नाम **ग्राह्यवाक्यः**१। **अर्थावगाढं भवति मधुरं** मधुरं वचनं यस्यासौ मधुरवचनः।

**अथवा अपरुषवचनो** यदि वा **क्षीरास्रवादिलब्धियुक्तो** मधुरवचनः२। तथा **निश्रितं क्रोधादीनाम्** अथवा **राग-द्वेषाणां** निश्रामुपगतम्, गाथायां तृतीया करणविवक्षातः निश्रितं वचनं यस्य स तथा३॥ ४०७५॥ ४०७६॥

असन्दिग्धवचनमाह—

**अव्वत्तं अफुडत्थं, अत्थबहुत्ता व होति संदिद्धं।**
**विवरीयमसंदिद्धं, वयणेसा संपया चउहा ॥ ४०७७॥** [जी.भा.१७८]

**अव्यक्तं** वचोव्यक्तताया अभावात् **अस्फुटार्थम्** अक्षराणां सन्निवेशविशेषतो विवक्षितार्थसम्पादकत्वाभावात्। **अर्थबहुत्वाद् वा भवति सन्दिग्धम्, तद्विपरीतमसन्दिग्धम्,** तद्वचनं यस्य सोऽसन्दिग्धवचनः। **एषा वचने सम्पत् चतुर्द्धा** चतुष्प्रकारा॥ ४०७७॥

सम्प्रति वाचनासम्पदं चतुष्प्रकारामाह—

**वायणभेया चउरो, विजि( चि ? )योद्देसण१ समुद्दिसणया उ२।**
**परिनिव्वविया वाए३, निज्जवणा चेव अत्थस्स४ ॥ ४०७८ ॥** [जी.भा.१७९]

**वाचनाया भेदाश्चत्वारः**। तद्यथा— **विचिन्त्य**[1] सम्यग् योग्यतां परिनिश्चित्य**योद्देशना१** विचिन्त्यैव **समुद्देशनता२** तथा **परिनिर्वाप्य वाचयति३ अर्थस्य निर्यापना च४** ॥ ४०७८ ॥

तत्र विचिन्त्योद्देशनमाह—

**तेणेव गुणेणं तु, वाएयव्वा परिक्खिउं सीसा।**
**उद्दिसति वियाणेउं, जं जस्स उ जोग्ग तं तस्स ॥ ४०७९ ॥** [जी.भा.१८०]

अयमस्य सूत्रस्य वाचनायोग्योऽयमयोग्य इति **तेनैव** वाचनाविषयेण **गुणेन शिष्याः परीक्ष्य वाचयितव्याः**, नान्यथा, यद् **यस्य योग्यं तत् तस्य विज्ञाय उद्दिशति** ॥ ४०७९ ॥

अत्रैव प्रकारान्तरमाह—

**अप्परिणामगमादी, वियाणिउ अभायणे न वाएति।**
**जह आम मट्टियघडे, अंबे व न छुब्भती खीरं ॥ ४०८० ॥** [जी.भा.१८१]



---

१. विचित्य पु.प्रे. एवमग्रेऽपि॥

**अपरिणामकादीन्**, आदिशब्दादतिपरिणामकपरिग्रहः, छेदसूत्राणाम**भाजनानि विज्ञाय न वाचयति**, नोद्दिशतीत्यर्थः। **यथा आमे** अपक्वे **मृत्तिकाघटे** यथा वा **अम्ले न क्षीरं क्षिप्यते** ॥ ४०८० ॥

**जइ छुब्भती विणस्सइ, नस्सइ वा एवमपरिणामादी।**
**नोद्दिस्से छेयसुतं, समुद्दिसे या वि तं चेव ॥ ४०८१ ॥** [जी.भा.१८२]

यद्यम्ले क्षीरं **क्षिप्यते** तदा **विनश्यति**, यदि **वा** आमे मृत्तिकाघटे घटस्य भङ्गतो **नश्यति**। **एवमपरिणामादौ** छेदसूत्रं विनश्यति, नश्यति वा स, ततो **नोद्दिशति**, एषा विचिन्त्योद्देशनता१। **समुद्दिशेदपि तमेव** योग्यम्, नान्यम्। एषा विचिन्त्यसमुद्देशनता२ ॥ ४०८१ ॥

**परिनिव्वविया वाए, जत्तियमेत्तं तु तरइ ओघेत्तुं।**
**जाहगदिट्ठंतेणं**[1]**, परिचिते तावऽन्नमुद्दिसति ॥ ४०८२ ॥** [जी.भा.१८३]

**परिनिर्वाप्य वाचयति**। किमुक्तं भवति ? **जाहकदृष्टान्तेन यावन्मात्रमवग्रहीतुं** शक्नोति

---

१. "जाहकस्तिर्यग्विशेषः तद् दृष्टान्तं यथा- पातुं थोवं थोवं, खीरं पासाणि जाहगो लिहइ। एमेव जितं काउं पुच्छति मतिमं न खेदेति॥" इति आवश्यकहारिभद्री टीका पत्र १०३॥

**तावन्मात्रमग्रेतने परिचिते उद्दिशति।** एषा परिनिर्वाप्य वाचना३ ॥ ४०८२ ॥

अर्थस्य निर्यापनामाह—

**निज्जवगो अत्थस्सा, जो उ वियाणेइ अत्थ सुत्तस्स।**
**अत्थेण व णिव्वहती,अत्थं पि कहेति जं भणियं ॥ ४०८३ ॥** [जी.भा.१८४]

**अर्थस्य निर्यापक** इति **यद् भणितं** तस्यायमर्थः— **यो** नाम **सूत्रस्यार्थं** कथ्यमानं **विजानाति,** यदि वा **अर्थेन निर्वहति,** अर्थावधारणबलेन सूत्रपाठो निर्वाहमुपयाति तस्या**र्थमपि कथयति** आस्तां सूत्रं ददातीत्यपिशब्दार्थः ॥ ४०८३ ॥

साम्प्रतं मतिसम्पदं चतुर्भेदामाह—

**मइसंपय चउभेया, उग्गह१ ईहा२ अवाय३ धारणा४ य।**
**उग्गहमति छब्भेया तत्थ इमा होति नायव्वा ॥ ४०८४॥** [जी.भा.१८५]



**मतिसम्पच्चातुर्भेदा।** तद्यथा— **अवग्रहः१ ईहा२ अवायः३ धारणा४ च।** तत्राऽवग्रहणमवग्रहः, अनिर्देश्य सामान्यमात्रग्रहणम् १। ईहनमीहा, अवगृहीतस्यार्थस्या-सद्भूतविशेषपरित्यागेन सद्भूतविशेषादानाभिमुखो बोधविशेषः २। 'अवायः' निश्चयः ३।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



'धारणा' स्मृतिः ४। **तत्रावग्रहमतिः इयं** वक्ष्यमाणा **षड्भेदा भवति ज्ञातव्या** ॥ ४०८४॥

तामेवाह—

**खिप्प१बहु२ बहुविहं३ धुव४, अनिस्सियं५ तह य होति असंदिद्धं६।**
**ओगिण्हइ१ एवीहा२, अवायमवि३ धारणा४ चेव ॥ ४०८५॥**

[जी.भा.१८६]

**क्षिप्रं१ बहु२ बहुविधं३ ध्रुवमनिश्रितम्४-५ असन्दिग्धम्६ अवगृह्णाति, एव**मवग्रहस्य षड्भेदाः। एवं षड्भेदा **ईहा अवायो धारणा**ऽपि च प्रत्येकं ज्ञातव्या ॥ ४०८५॥

तत्र क्षिप्रमवग्रहं व्याख्यानयति—

**सीसेण[१] कुतित्थीण व, उच्चारियमेत्तमेव ओगिण्हे।**
**तं खिप्पं१ बहुगं पुण, पंच व छ व सत्त गंथसया २ ॥ ४०८६॥**

[जी.भा.१८७]

गाथा ४०७८-४०८६ गणिसम्पत्

---

१. परवाइणा सिस्सेण व- जी.भा.॥



For Private And Personal

शिष्येण कुतीर्थिना वा यद् उच्चारितमात्रमेवावगृह्णाति तत् **क्षिप्रम**वग्रहणमुच्यते। **बहुकं** पुनरवग्रहणमिदम्-यत् **पञ्च षट् सप्त वा। ग्रन्थशता**न्येकवारमवगृह्णाति ॥ ४०८६ ॥

**बहुविह णेगपयारं, जह लिहतिऽवधारए गणेइ वि य।**
**अक्खाणगं कहेई, सद्दसमूहं व णेगविहं३ ॥ ४०८७॥** [जी.भा.१८८]

**बहुविध**मवग्रहणं नाम **अनेकप्रकारम्, यथा** स्वयं **लिखति,** अन्येन भण्यमान**मवधारयति,** अन्यच्च सङ्ख्येयं वस्तु **गणयति, आख्यानकं** च **कथयति,** अथवा नानापुरुषाश्रितं नानाऽऽतोद्याश्रितं वा **शब्दसमूहम् अनेकविधं** अनेकप्रकारं प्रत्येकमवगृह्णाति एतद् बहुविधमवग्रहणम्३ ॥ ४०८७ ॥

**न वि विस्सरइ धुवं तं ४, अणिस्सियं जं न पोत्थए लिहियं।**
**अणभासियमवगिण्हति५, निस्संकिय होयऽसंदिद्धं ६॥ ४०८८॥**

[जी.भा.१८९]

यद् **नैव विस्मरति तद् ध्रुवम्** ४। **अनिश्रितं** नाम **यन्न पुस्तके लिखितम**पेक्षते,

**अभाषितं** च अपरै[रनुदीरितं] व्याजेनोदीरितं वा यद**वगृह्णाति** तदनिश्रितम् ५। **निःशङ्कितं भवत्यसन्दिग्धम्** ६। एवमवग्रहस्य षड् भेदाः ॥ ४०८८॥

साम्प्रतमीहादीनां षड् भेदान् प्रत्येकं योजयन्नाह—

**उग्गहियस्स उ ईहा, ईहिते पच्छा अणंतरमवातो।**
**अवगते पच्छा धारण, तीए विसेसो इमो नवरं ॥ ४०८९॥** [जी.भा.१९०]

**अवगृहीतस्यार्थ**स्य विषये **ईहा** प्रवर्त्तते, तत ईहाया अपि उक्तप्रकारेण षड् भेदा भावनीयाः। **ईहिते** सति **पश्चाद् अनन्तरमवाय** उपजायते, ततस्तस्याप्युक्तप्रकारेण षड् भेदाः। **अवगते** सति **पश्चाद् धारणा** ततस्तस्या अपि षड् भेदाः। **नवरं तस्यां** धारणायाम् **अयं** वक्ष्यमाणो **विशेषः** ॥ ४०८९॥

तमेवाह—

**बहु१बहुविह२ पोराणं३ दुद्धर४ मणिस्सिय५ तहेव असंदिद्धं६।**
**पोराण पुरा वायित, दुद्धर नय-भंगगुविलत्ता ॥ ४०९०॥** [जी.भा.१९१]

**बहु१ बहुविधं२ पौराणं३ दुर्द्धरम्४ अनिश्रितं५ तथैवासंदिग्धं६** धरणमिति धारणायाः षड् भेदाः। तत्र बहु-बहुविधाऽनिश्रिताऽसन्दिग्धानि तथैव। **पौराणं** नाम यत् **पुरा** चिरकाले **वाचितम्। दुर्द्धरं** नाम **नयैर्भङ्गैर्वा गुपिलत्वाद्** महता कष्टेन धार्यम् ॥ ४०९० ॥

सम्प्रति प्रयोगमतिसम्पदं चतुर्भेदामाह—

**एत्तो उ पयोगमती, चउव्विहा होइ आणुपुव्वीए।**
**आय१पुरिसं२ च खेत्तं३, वत्थु४ विदिय पउंजए वायं ॥४०९१ ॥** [जी.भा.१९२]

**अत ऊर्ध्वं प्रयोगमतिश्चतुर्द्धा** [ भवति, सा च] **आनुपूर्व्या** परिपाट्या वक्ष्यते। तामेवाह-**आत्मानं१ पुरुषं२ क्षेत्रं३ वस्तु४ विदित्वा** ज्ञात्वा **वादं प्रयुङ्क्ते**, उपलक्षणमेतत्, धर्मकथादिकं वा ॥ ४०९१ ॥

तत्राऽऽत्मद्वारमाह—

**जाणति पयोगभिसजो, वाही जेणाऽऽतुरस्स छिज्जइ उ।**
**इय वातो य कहा वा, नियसत्तिं नाउ कायव्वा१ ॥ ४०९२ ॥** [जी.भा.१९३]

यथा **प्रयोगभिषग् येन** औषधेनाऽऽतुरस्य **व्याधिः छिद्यते** तद् **जानाति,** ज्ञात्वा च तत् प्रयुङ्क्ते इति। **एवम्** अमुना प्रकारेण **निजशक्तिं ज्ञात्वा वादो** धर्म**कथा वा कर्त्तव्या,** नान्यथा ॥ ४०९२॥

गतमात्मद्वारम् १। अधुना पुरुषद्वारमाह—

**पुरिसं उवासगादी, अहवा वी जाणगाइयं परिसं।**
**पुव्वं तु गमेऊणं, ताहे वातो पयोत्तव्वो२ ॥ ४०९३॥** [जी.भा.१९४]

**पुरुषमुपासकादिकम्,** अथवा **ज्ञकादिकम्,** ज्ञकामज्ञकां दुर्विदग्धां वा **पर्षदं पूर्वं गमयित्वा** पश्चाद् **वादः प्रयोक्तव्यः,** नान्यथा ॥ ४०९३॥

गतं पुरुषद्वारम्२। अधुना क्षेत्रद्वारमाह—

**खेत्तं मालवमादी, अहवा वी साहुभावियं जं तु।**
**नाऊण तहा विहिणा, वातो उ तहिं पयोत्तव्वो ॥ ४०९४॥** [जी.भा.१९५]

**क्षेत्रं मालवादिकम्, अथवा यत् साधुभावितं** तत् तथारूपेण **ज्ञात्वा विधिना** जिनभणितेन **वादः प्रयोक्तव्यः**, नान्यथा॥ ४०९४॥

गतं क्षेत्रद्वारम् ३। वस्तुद्वारमाह—

**वत्थुं[1] परवादी ऊ, बहुआगमितो न वावि णाऊणं।**
**राया वा रायमच्चो, दारुणभद्दस्सभावो त्ति ॥ ४०९५॥** [जी.भा.१९६]

**वस्तु परवादी बह्वागमिको न वा।** यदि वा **राजा राजामात्यो वा, दारुण**स्वभावो **भद्रस्वभावो वेति ज्ञात्वा** वादः प्रयोक्तव्यः ॥ ४०९५॥

तदेवमुक्ता प्रयोगमतिसम्पच्चतुष्प्रकारा। सम्प्रति सङ्ग्रहपरिज्ञां चतुष्प्रकारामाह—

गाथा ४०९५-४१०२ संग्रहपरिज्ञा-सम्पत्

**बहुजणजोग्गं खित्तं, पेहे१ तह फलग-पीढमादिण्णे।**
**वासासु एय दोन्नि वि२, काले य समाणए कालं३॥ ४०९६॥**

[जी.भा.१९८]



---
१. वत्थुं पुण पए० जी.भा.॥

**पूए अहागुरुं पि य४, चउहा एसा उ संगहपरिण्णा।**
**एएसिं तु विभागं, वोच्छामि अहाणुपुव्वीए ॥ ४०९७॥** [तुला.जी.भा.१९९]

वर्षासु **बहुजनयोग्यं क्षेत्रं प्रेक्षयति**१। **तथा फलक-पीठं** समाहारो द्वन्द्वः, पीठक-फलकानीत्यर्थः। यतो **वर्षासु एते द्वे अपि** पीठ-फलके **आचीर्णे**२। तथा **काले** स्वाध्यायादिसम्बन्धिनि प्राप्तावसरे तं **कालं** स्वाध्यायादिना **समानयति**३ ॥ ४०९६॥ तथा

**यथागुरु** रत्नाधिकतरं **पूजयति** ४। **एषा चतुर्द्धा सङ्ग्रहपरिज्ञा**। साम्प्रतम् **एतेषां** पदानां **विभागं यथानुपूर्व्या** क्रमेण **वक्ष्ये** ॥ ४०९७॥

तमेवाह—

**वासे बहुजणजोग्गं वित्थिन्नं जं तु गच्छपायोग्गं।**
**अहवा वि बाल-दुब्बल-गिलाण-आदेसमादीणं ॥ ४०९८॥** [जी.भा.२००]

बहुजनयोग्यं क्षेत्रं प्रेक्षयति। **बहुजनयोग्यं** नाम **विस्तीर्णं यत्** समस्तस्यापि **गच्छस्य प्रायोग्यम्। अथवा बाल-दुर्बल-ग्लानाऽऽदेशादीनां** प्रायोग्यं बहुजनयोग्यम् ॥ ४०९८॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



एवम्भूतक्षेत्राप्रत्युपेक्षणे दोषानाह—

**खेत्तऽसति असंगहिया ताहे वच्चंति ते उ अन्नत्थ।**
**न उ मइलेंति निसेज्जा, पीढ-फलगाण गहणम्मि ॥ ४०९९ ॥**

[जी.भा.२०१]

बहुजनयोग्यस्य **क्षेत्रस्य असति** अभावे **ते** साधवोऽ**सङ्गृहीता** भवन्ति, ततस्ते **अन्यत्र** गच्छान्तरे **व्रजन्ति**, तस्मादवश्यं बहुजनयोग्यं क्षेत्रं वर्षासु प्रत्युपेक्ष्यम्। तथा **पीठ-फलकादीनां ग्रहणे न तु** नैव **मलिनयन्ति** मलिनीभवन्ति **निषद्याः** संस्तारकादिरूपाः ॥ ४०९९ ॥

**वियरे न तु वासासुं, अन्नं काले उ गम्मतेऽन्नत्थ।**
**पाणा सीयल कुंथादिया य तो गहण वासासु ॥ ४१०० ॥**

[तुला.जी.भा.२०२]

न च **अन्यत्** संस्तारकादि **वर्षासु** साधूनां **वितरति** श्रावकजनस्तथासामाचार्यभावात्। अथ **अन्यत्र** क्षेत्रान्तरे **गम्यते** यत्र न पानीयस्यन्दस्तत आह–अन्यत्र गम्यते काले ऋतुबद्धे न



For Private And Personal

च वर्षासु, अपि च मणिकुट्टिमे वर्षासु भूमेः **शीतलतया 'प्राणाः' कुन्थ्वादयः** सम्मूर्च्छन्ति **ततो ग्रहणं वर्षासु** पीठ-फलकानाम्। एतेन 'आचीर्णे द्वे अपि वर्षासु' इत्येतद् व्याख्यातम् ॥ ४१०० ॥

सम्प्रति "काले य समाणए कालं" [गा. ४०९६] इत्यस्य व्याख्यानमाह—

**जं जम्मि होइ काले, कायव्वं तं समाणए तम्मि।**
**सज्झाय पेह उवहीउप्पायण भिक्खमादी य॥ ४१०१ ॥** [जी.भा.२०३]

**यत् स्वाध्याय** उपकरणस्य **प्रत्युपेक्षा उपधेरुत्पादनं भिक्षादिकं च यस्मिन् काले कर्त्तव्यं तत् तस्मिन्** काले **समानयति** समाप्तिं नयति। एष तृतीयः सङ्ग्रहपरिज्ञाभेदः ॥ ४१०१ ॥

चतुर्थमाह—

**अहागुरु जेण पव्वावितो उ, जस्स उ अहीत पासम्मि।**
**अहवा अहागुरु खलु, हवंति रायाणियतरा उ ॥ ४१०२ ॥** [जी.भा.२०४]

**येन प्रव्राजितो यस्य वा पार्श्वे अधीतः** स **यथागुरुः। अथवा यथागुरवो** नाम-ये तस्य रत्नाधिकतराः ॥ ४१०२॥

तेषां पूजनामाह

**तेसिं अब्भुट्ठाणं[१], दंडग्गह तह य होइ आहारे।**
**उवहीवहणं विस्सामणं च संपूयणा एसा ॥ ४१०३॥** [जी.भा.२०५]

**तेषां** यथागुरूणा**मेषा सम्पूजना-** आगच्छता**मभ्युत्थानम् दण्डस्य ग्रहणम्,** तथा भवति **आहारे** आहारस्य काले प्रायोग्यस्य सम्पादनम्, **उपधेर्वहनं विश्रामणं च** ॥ ४१०३॥

उपसंहारमाह—

**एसा खलु बत्तीसा, एयं जाणाति[१] जो ठितो वेत्थ।**
**ववहारे अलमत्थो, अहवा वि भवे इमेहिं तु ॥ ४१०४॥** [जी.भा.२०६]

**एषा** अनन्तरोदिता खलु स्थानानां **द्वात्रिंशत्।** एतां **यो जानाति** यो **वाऽत्र स्थितः** स

१. ति पतिट्ठतो एत्थं - जीतकल्पभाष्ये गा. २०६॥

**व्यवहारे अलमर्थः** पर्याप्तः। **अथवा एषु** षट्त्रिंशत्सङ्ख्येषु वक्ष्यमाणेषु स्थानेषु ज्ञाता **स्थितो वा** व्यवहारे समर्थो **भवति** ॥ ४१०४ ॥

एतदेवान्वय-व्यतिरेकत आह—

**छत्तीसाए ठाणे, जो होइ अपरिनिट्ठितो।**
**नऽलमत्थो तारिसो होइ, ववहारं ववहरित्तए ॥ ४१०५॥**

**छत्तीसाए ठाणेहिं जो होति परिनिट्ठितो।**
**अलमत्थो तारिसो होति, ववहारं ववहरित्तए ॥ ४१०६॥**

**छत्तीसाए ठाणेहिं जो होति अपतिट्ठितो।**
**नऽलमत्थो तारिसो होति, ववहारं ववहरित्तए ॥ ४१०७॥**

**छत्तीसाए ठाणेहिं जो होति सुपतिट्ठितो।**
**अलमत्थो तारिसो होति, ववहारं ववहरित्तए ॥ ४१०८॥**

[जी.भा.२०७-२१०]

श्लोकचतुष्टयमपि प्राग्वत् ॥ ४१०५-४१०८ ॥

सम्प्रति तामेव षट्त्रिंशतमाह—

**जा भणिया बत्तीसा, तम्मि य छोढूण विणयपडिवत्तिं।**
**चउभेयं ता होही, छत्तीसा एस ठाणाणं ॥ ४१०९ ॥** [जी.भा.२११]

**या पूर्वं** स्थानानां **द्वात्रिंशदुक्ता** तस्यां **चतुर्भेदां विनयप्रतिपत्तिं प्रक्षिप्यते, तत एषा स्थानानां षट्त्रिंशद् भवति** ज्ञातव्या ॥

**बत्तीस वण्णिचिय, वोच्छं चउभेय विणयपडिवत्तिं।**
**आयरियंते वासिं, जह विणइत्ता भवे निरिणो ॥ ४११० ॥** [जी.भा.२१२]

**द्वात्रिंशत्** प्राग् **वर्णितैव**। ततः सम्प्रति **वक्ष्यामि चतुर्भेदां विनयप्रतिपत्तिम् यथाऽऽचार्योऽन्तेवासिनं विनयित्वा** विनयं ग्राहयित्वा **निरिणो** [अनृणः] **भवति** ॥ ४११० ॥

तामेव चतुर्भेदां विनयप्रतिपत्तिमाह—

**आयारे१ सुयविणए२, विक्खिवणे३ चेव होइ बोधव्वे।**
**दोसस्स य निग्घाए४, विणए चउहेस पडिवत्ती ॥ ४१११ ॥** [जी.भा.२१३]

**आचारे** विनयः आचारविनयः१ **श्रुतविनयः२ विक्षेपणे चैव** विनयो **भवति बोद्धव्य** इति विक्षेपणाविनयः३ **दोषे निर्घातविनयश्च४। एषा चतुर्द्धा विनये प्रतिपत्तिः** ॥ ४१११ ॥

तत्राऽऽचारविनयमाह—

**आयारे विणयो खलु, चउव्विहो होइ आणुपुव्वीए।**
**संजमसामायारी१, तवे२ य गणविहरणा३ चेव ॥ ४११२ ॥**
**एगल्लविहारे या४, सामायारी उ एस चउभेया।**
**एयासिं तु विभागं, वोच्छामि अहाणुपुव्वीए ॥ ४११३ ॥**

[जी.भा.२१४-२१५]

**आचारे** आचारविषयः खलु **विनयश्चतुर्विधो भवति आनुपूर्व्या** परिपाट्या। तद्यथा—

**संयमसामाचारी१** **तपः**सामाचारी२ **गणविहरण**सामाचारी३ **एककविहारसामाचारी**४ च। एवमेषा **चतुर्भेदा सामाचारी।** **एतासां** सामाचारीणां **विभागं यथानुपूर्व्या वक्ष्यामि**॥ ४११२॥ ४११३॥

तत्र संयमसामाचारीमाह—

**संजममायरति सयं, परं च गाहेति संयमं नियमा।**
**सीयंते थिरीकरणं, उज्जयचरणं च उववूहे१ ॥ ४११४॥** [जी.भा.२१६]

**स्वयं संयममाचरति१ परं च नियमात् संयमं ग्राहयति**२ तथा संयमविषये **सीदति स्थिरीकरणं** विधत्ते३ **उद्यतचरणं तु उपबृंहयति**४। एषा संयमसामाचारी ॥ ४११४॥

सम्प्रति संयममेव कथयति—

**सो सत्तरसो पुढवादियाण घट्ट परिताव उद्दवणं।**
**परिहरियव्वं नियमा, संजमगो एस बोधव्वो१ ॥ ४११५॥** [जी.भा.२१७]

**स** संयमः **सप्तदशः** सप्तदशप्रकारो विस्तरतः। सङ्क्षेपतः पुनः **पृथिव्यादीनां** षण्णां

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



कायानां **घट्टनं परितापनमपद्रावणं च नियमात् परिहर्त्तव्यमिति। एष संयमो बोद्धव्यः।** संयमक इति प्राकृतत्वात् स्वार्थे कप्रत्ययः ॥ ४११५॥

उक्ता संयमसामाचारी१। तपःसामाचारीमाह—

**पक्खिय-पोसहिएसुं, कारयति तवं सयं करोति य।**
**भिक्खायरियाए तहा, निजुंजति परं सयं चावी ॥ ४११६॥** [जी.भा.२१८]

**पाक्षिके** अर्द्धमासपर्वणि **पौषधिकेषु** च अष्टम्यादिषु पर्वषु परं **तपः** [1]**कारयितुमुद्यतो** भवति, **स्वयमपि** च **करोति। तथा भिक्षाचर्यायां परं नियुङ्क्ते,** प्रयोजनमपेक्ष्य **स्वयमपि** भिक्षाचर्यां गच्छति॥ ४११६॥

**सव्वम्मि बारसविहे, निउंजइ परं सयं च उज्जुत्तो २।**
**गणसामायारीए, गणं विसीयंत चोदेति ॥ ४११७॥** [जी.भा.२१९]

---

१. कारयति स्वयमपि - मु. ॥



For Private And Personal

**सर्वस्मिन् द्वादशविधे** तपसि यथायोगं **परं नियुङ्क्ते स्वयं च** सर्वत्र यथाशक्ति उद्युक्तः। एषा तपःसामाचारी २। **गणसामाचार्यां गणं विषीदन्तं चोदयति** ॥ ४११७॥

कथम्? इत्याह—

**पडिलेहण-पप्फोडण-बाल-गिलाणाइ वेयावच्चेसु।**
**सीयंतं गाहेई, सयं च उज्जुत्तो एएसु ३ ॥ ४११८ ॥** [जी.भा.२२०]

**प्रत्युपेक्षणं** चक्षुषा निरीक्षणम्, **प्रस्फोटनम्** आखोटादिकम्, एतयोः **बालग्लानादि-वैयावृत्त्ये** च **सीदन्तं** प्रत्युपेक्षणादि **ग्राहयति** कारयति, **स्वयं च एतेषु** स्थानेषु सतत**मुद्युक्तः**। उक्ता गणसामाचारी ३॥ ४११८॥

साम्प्रतमेककविहारसामाचारीमाह—

**एगल्लविहारादी पडिमा पडिवज्जती सयण्णं च।**
**पडिवज्जावे एवं, अप्पाण परं च विणएती ॥ ४११९॥** [जी.भा.२२१]

**एककविहार** आदिर्यासां ता एककविहारादयः, आदिशब्दात् प्रतिमागताशेषानुष्ठानपरिग्रहः। एवम्भूताः **प्रतिमाः स्वयं** प्रतिपद्यते, **अन्यं** च **प्रतिपादयति। एवमाचारविनयेनाऽऽत्मानं परं**

**च विनयति।** गत आचारविनयः ॥ ४११९ ॥

सम्प्रति श्रुतविनयमाह—

**सुत्तं अत्थं च तहा, हिय निस्सेसं तहा पवाएति।**
**एसो चउव्विहो खलु, सुयविणओ होइ नायव्वो ॥ ४१२० ॥** [जी.भा.२२३]

**सूत्रं** प्रवाचयति, **तथा अर्थम्।** तमपि **हितं** यद् यस्योचितं तत् तं **प्रवाचयति,** नेतरत्। **तथा निःशेषं** परिपूर्णम्। **एष चतुर्विधः खलु श्रुतविनयो भवति ज्ञातव्यः** ॥ ४१२० ॥

एतमेव व्याचष्टे—

**सुत्तं गाहेइ उज्जुत्तो, अत्थं च सुणावए पयत्तेणं।**
**जं जस्स होइ जोग्गं, परिणामगमाइणं तु हियं ॥ ४१२१ ॥**
**निस्सेसमपरिसेसं, जाव समत्तं तु ताव वाएइ।**
**एसो सुयविणतो खलु, वोच्छं विक्खेवणा विणयं॥ ४१२२ ॥**

[जी.भा.२२४-५]

**उद्युक्तस्सन्** शिष्यं **सूत्रं ग्राहयति,** एष सूत्रग्राहणाविनयः। तथा **प्रयत्नेन** शिष्य**मर्थं श्रावयति,** एषोऽर्थश्रावणविनयः। **परिणामकादीनां यद् यस्य भवति योग्यं** तत् तु तस्य **हितं** सूत्रतोऽर्थतश्च ददाति। एष हितप्रदानविनयः। तथा **निःशेषम् [अपरिशेषम्]** किमुक्तं भवति ? **यावत् समाप्तं** भवति **तावद् वाचयति** एष निःशेषवाचनाविनयः। उपसंहारमाह—

**एष** चतुष्प्रकारः **खलु श्रुतविनयः**। अत ऊर्द्ध्वं **विक्षेपणाविनयं वक्ष्ये** ॥ ४१२१ ॥ ४१२२ ॥

प्रतिज्ञातमेव करोति—

**अद्दिट्ठं दिट्ठं खलु**१, **दिट्ठं साहम्मियत्तविणएणं** २।

**चुयधम्म धम्मे ठावइ** ३, **तस्सेव हियट्ठमब्भुट्ठे**४ ॥ **४१२३** ॥ [जी.भा.२२६]

गाथा ४१२३-४१२९ विक्षेपणा-विनयादिः

**अदृष्टं** अदृष्टधर्माणं **दृष्टमिव** दृष्टपूर्वमिव धर्मं ग्राहयति १। **दृष्टं** दृष्टपूर्वं श्रावकं **साधर्मिकत्वविनयेन** विनयति, प्रव्राजयतीत्यर्थः २। तथा **च्युतधर्मं** धर्मात् परिभ्रष्टं पुनः **धर्मे स्थापयति** ३। तथा **तस्यैव** चारित्रधर्मस्य वृद्धये **हितमभ्युत्तिष्ठति** ॥४१२३ ॥

तत्र प्रथमभेदव्याख्यानार्थमाह—

**विन्नाणाभावम्मी, खिव पेरणे विक्खिवित्तु परसमया।**
**ससमयंतेणमभिछुभे अदिट्ठधम्मं तु दिट्ठं वा ॥ ४१२४॥** [जी.भा.२२७]

**विशब्दो नानाभावे, क्षिप प्रेरणे, परसमयाद् विक्षिप्य** नानाप्रकारं प्रेर्य **अदृष्टधर्माणं दृष्टं वा** इति वाशब्द उपमायाम् दृष्टधर्माणमिव **स्वसमयान्तेन** स्वसमयाभिमुख**मभिक्षिपति** ॥ ४१२४॥

एनमेव चरमपादं व्याचष्टे—

**धम्मसभावो सम्म-दंसण तं जेण पुव्विं ण उ लद्धं।**
**सो होयऽदिट्ठपुव्वो, तं गाहइ पुव्वदिट्ठमिव ॥ ४१२५॥** [जी.भा.२२८]

**धर्म स्वभावः सम्यग्दर्शन**मित्येकार्थम्। तत् सम्यग्दर्शनं **येन पूर्वं न लब्धं स भवति अदृष्टपूर्वः** अदृष्टपूर्वधर्मः। **तं पूर्वदृष्टमिव** अतीव चित्ते विश्रान्ततया पूर्वोपलब्धमिव धर्मं **ग्राहयति** ॥ ४१२५॥

अदृष्टं दृष्टमित्यस्यान्यथा व्याख्यानमाह—

**जह भायरं व पियरं, व मिच्छदिट्ठिं पि गाहि सम्मत्तं।**
**दिट्ठपुव्वं सावग, साहम्मि करेति पव्वावे ॥ ४१२६ ॥** [जी.भा.२२९]

अदृष्टं अदृष्टपूर्वं दृष्टमिव दृष्टपूर्वमिव धर्मं ग्राहयति। किमुक्तं भवति ? **यथा भ्रातरं पितरं वा** सम्यक्त्वं ग्राहयति एवमदृष्टपूर्वं **मिथ्यादृष्टिमपि सम्यक्त्वं ग्राहयति**। 'दिट्ठं साहम्मियत्तविणएणं' [गा.४१२३] इत्यस्य व्याख्यानमाह-दृष्टो नाम-**दृष्टपूर्वः**, स च **श्रावकः**, तं साधर्मिकत्वविनयेन शिक्षयति, **साधर्मिकं करोति, प्रव्राजयती**त्यर्थः ॥ ४१२६ ॥

"चुतधम्म धम्मे ठावइ" [गा. ४१२३] इत्यस्य व्याख्यानार्थमाह—

**चुयधम्मो भट्ठधम्मो, चरित्तधम्मातो दंसणातो वा।**
**तं ठावेइ तहिं चिय, पुणो वि धम्मे जहोद्दिट्ठे ॥ ४१२७ ॥** [जी.भा.२३०]

**च्युतधर्मो** नाम **भ्रष्टधर्मः**। धर्मात् च्युतश्च्युतधर्मः, धर्मात् भ्रष्टो भ्रष्टधर्मः, राजदन्तादिदर्शनाद् धर्मशब्दस्य परनिपातः। कस्मात् च्युतः? इत्याह— **चारित्रधर्माद् दर्शनाद्वा तं** च्युतधर्मं **तत्रैव [ धर्मे ]** चारित्रधर्मे सम्यग्दर्शने वा **यथोद्दिष्टे पुनः स्थापयति** ॥ ४१२७॥

एष तृतीयभेदः ३। चतुर्थभेदमाह—

**तस्सत्ती तस्सेव उ, चरित्तधम्मस्स वुड्डिहेतुं तु।**
**वारेयऽणेसणादी, न य गिण्हे सयं हियट्ठाए ॥ ४१२८ ॥** [जी.भा.२३१]

'तस्सेव हियट्ठमब्भुट्ठे' [गा. ४१२३] इति **तस्येति तस्यैव चारित्रधर्मस्य वृद्धिहेतोरनेषणादि वारयति** हितार्थमभ्युत्तिष्ठतीति, **हितार्थाय न च स्वयमनेषणादि गृह्णाति।** हितार्थायेत्युपलक्षणम्, तेन हिताय सुखाय क्षमाय निःश्रेयसाय आनुगामिकायाभ्युत्तिष्ठतीति द्रष्टव्यम् ॥ ४१२८ ॥ ततो हितादिपदानां व्याख्यानमाह—

**जं इह-परलोगे वा हियं सुहं तं खमं मुणेयव्वं।**
**निस्सेयस-मोक्खाय उ, अणुगामऽणुगच्छते जं तु ॥ ४१२९ ॥**

[जी.भा.२३२]

**यद्** यस्मात् कारणात् तदभ्युत्थान**मिहलोके परलोके वा हितं** तेन हितमित्युच्यते। **सुखम्,** परलोके सुखकरणात्। **क्षमम्** ऐहिक-पारत्रिकप्रयोजनक्षमत्वात्। **निःश्रेयसं** कल्याणकारित्वात्। **अनुगामि यद् मोक्षाय अनुगच्छति** ॥ ४१२९ ॥

सम्प्रति दोषनिर्घातविनयमभिधित्सुः प्रथमतो दोषनिर्घातशब्दार्थमाह—

**दोसा कसायमादी, बंधो अहवा वि अट्ठ पयडीओ।**
**नियय व निच्छियं वा, घातो विणासो य एगट्ठा ॥ ४१३० ॥** [जी.भा.२३४]

**दोषाः क्रोधादयः**, अथवा **बन्धो**ऽष्टप्रकारः, यदि वा पूर्वबद्धा **अष्टौ कर्मप्रकृतयो** दोषाः, तेषां **नियतं निश्चितं वा घातो विनाश इत्येकार्थं** दोषनिर्घातः ॥ ४१३० ॥ साम्प्रतमस्य भेदानाह—

**कुद्धस्स[१] कोहविणयण१ दुट्ठस्स य दोसविणयणं जं तु२।**
**कंखिय कंखा छेदो ३ आयप्पणिहाण४ चउहेसो ॥ ४१३१ ॥** [जी.भा.२३५]

**कुद्धस्य क्रोधविनयनम्१, दुष्टस्य यद् दोषविनयनम्२, काङ्क्षिते काङ्क्षाछेदः** ३, तथा **आत्मप्रणिधानम्** ४ इति। **एष** दोषनिर्घात**श्चतुर्द्धा** ॥ ४१३१ ॥

तत्र प्रथमभेदमाह—

---

१. रुट्ठस्स - जी. भा.॥



For Private And Personal

**सीयघरं पिव दाहं, वंजुलरुक्खो व्व जह य उरगविसं।**
**कुद्धस्स तहा कोहं पविणेती उवसमेति त्ति ॥ ४१३२ ॥** [जी.भा.२३६]

**शीतगृहमिव** जलयन्त्रगृहमिव **दाहम्, यथा वा वञ्जुलवृक्ष उरगविषं** प्रविनयति, **तथा क्रुद्धस्य क्रोधं प्रविनयति,** किमुक्तं भवति ? **उपशमयति** ॥ ४१३२ ॥

**दुट्ठो कसाय-विसएहि माण-माया सभावदुट्ठो वा।**
**तस्स पविणेइ दोसं, नासयते धंसए व त्ति ॥ ४१३३ ॥** [जी.भा.२३७]

**कषायैर्विषयैर्यदि** वा **मान-मायाभ्यामथवा स्वभावेन दुष्टस्तस्य दोषं प्रविनयति।** अस्यैवार्थमाह-**नाशयति ध्वंसते इति** ॥ ४१३३ ॥

तृतीयभेदव्याख्यानार्थमाह—

**कंखा उ भत्त-पाणे, परसमए अहव संखडीमादी।**
**तस्स पविणेइ कंखं, संखडिमन्नावएसेणं [१] ॥ ४१३४ ॥** [जी.भा.२३८]



---

१. इतोऽग्रे जीतकल्पभाष्ये अधिका गाथा २३९ इत्थं - चरगाइमाइएसु तु अहिंसमक्खोव्व अत्थि जा कंखा। तं हेउ-कारणेहिं विणयउ जह होइ णिकंखे ॥ २३९ ॥

यस्य **भक्त-पाने काङ्क्षा, परसमये वा, अथवा सङ्खड्यादौ, तस्य काङ्क्षा 'प्रविनयति'** स्फेटयति। सङ्खड्यां **सङ्खडी**काङ्क्षा**मन्यापदेशेना**पनयति ॥ ४१३४॥

चतुर्थमात्मप्रणिधानरूपं भेदमाह—

**जो एएसु न वट्टइ, कोहे दोसे तहेव कंखाए।**

**सो होति सुप्पणिहितो, सोहणपणिहाणजुत्तो वा ॥ ४१३५॥** [जी.भा.२४०]

**य एतेषु क्रोधे दोषे तथा काङ्क्षायां न वर्त्तते** स भवति **सुप्रणिहितः** आत्मप्रणिधानवान् शोभनप्रणिधानवान् वा ॥ ४१३५॥

उपसंहारमाह—

**छत्तीसेयाणि ठाणाणि भणियाणऽणुपुव्वसो।**

**जो कुसलो एएहिं, ववहारी सो समक्खातो ॥ ४१३६॥** [जी.भा.२४१]

**एतानि** अनन्तरोदितानि **स्थानानि षटत्रिंशद् आनुपूर्व्या** क्रमेण **भणितानि। य एतेषु कुशलः सः व्यवहारी** आगमव्यवहारी **समाख्यातः** ॥ ४१३६॥

पुनरपि यादृशा आगमव्यवहारिणस्तादृशानाह—

**अट्ठहिं अट्ठारसहिं, दसहि य ठाणेहि जे अपारोक्खा।**

**आलोयणदोसेहिं, छहि य अपारोक्खविन्नाणा ॥ ४१३७॥** [जी.भा.२४२]

**आलोयणागुणेहिं, छहि य ठाणेहि जे अपारोक्खा।**

**पंचहि य नियंठेहिं, पंचहि य चरित्तमंतेहिं ॥ ४१३८॥** [जी.भा.२४३]

**अष्टसु** आचारवत्त्वप्रभृतिषु **स्थानेषु अष्टादशसु** व्रतषट्कप्रमुखेषु **दशसु च** प्रायश्चित्तस्थानेषु **ये अपरोक्षाः** प्रत्यक्षज्ञानिनः, तथा **दशसु आलोचनादोषेषु षट्सु च** व्रतेषु कायेषु वा **ये अपरोक्षविज्ञानाः** प्रत्यक्षज्ञानिनः, तथा **दशस्वालोचनागुणेषु षट्सु** च स्थानेषु' अनन्तभागवृद्धादिषु ये '**अपरोक्षाः**' साक्षाद् ज्ञानिनस्तथा **पञ्चसु निर्ग्रन्थेषु** पुलाकादिषु **पञ्चसु चारित्रवत्सु** सामायिकादिसंयमवत्सु ये प्रत्यक्षज्ञानिनस्ते आगमव्यवहारिणः ॥ ४१३७॥ ४१३८॥

एतदेव गाथाद्वयं व्याचिख्यासुराह—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**अट्ठाऽऽयारवमादी, वयछक्कादी हवंति अट्ठारस ।**

**दसविहपायच्छित्ते, आलोयणदोस दसहिं च ॥ ४१३९ ॥** [जी.भा.२४४]

**अष्टौ** स्थानानि **आचारवत्त्वादीनि,** तानि च प्रागभिहितानि । एतानि चाऽऽलोचनार्हत्व-निबन्धनानि। तथा चोक्तं **स्थानाङ्गे** – "**अट्ठहिं ठाणेहिं जति संपन्ने भवति तो आलोयणारिहे। तं जहा— "आयारव"** मित्यादि। **अष्टादश** स्थानानि **व्रतषट्कादीनि भवन्ति**। पुनरष्टादश-ग्रहणमेतेषु ये अपराधास्तेषु प्रायश्चित्तविधिपरिज्ञानप्रतिपत्त्यर्थम्। दश स्थानानि **दशविधम्** "आलोयण पडिक्कमणे" [गा. ४१६०] इत्यादिरूपं **प्रायश्चित्तम्। आलोचनादोषेषु** दशसु "आकंपयित्ता" [गा. ] इत्यादिरूपेषु ॥ ४१३९ ॥

तथा—

**छहि काएहि वएहि व, गुणेहि आलोयणाए दसहिं च ।** [जी.भा.२४५]

**छट्ठाणावडिएहिं, छहिं चेव उ जे अपारोक्खा ॥ ४१४० ॥** [जी.भा.२५६]



For Private And Personal

**षट्स्विति कायेषु व्रतेषु वा,** तथा **आलोचनायाः** सम्बन्धिषु **गुणेषु दशसु** जातिसम्पन्नप्रभृतिषु। उक्तं च **स्थानाङ्गे**-''**दसहिं ठाणेहिं सम्पन्ने अरिहति अन्नदोसमालोइत्तए। तं जहा— जातिसंपन्ने कुलसंपन्ने**'' इत्यादि । तथा '**षट्सु** स्थानेष्विति' **षट्स्थानपतितेषु** स्थानेषु **ये अपरोक्षा** साक्षाद्वेदितारः ॥ ४१४० ॥

कियन्ति षट्स्थानपतितानि स्थानानि? इति, अत आह—

**संखादीया ठाणा, छहि ठाणेहि पडियाणि ठाणाणि ।**
**जे संजया सरागा, सेसा एक्कम्मि ठाणम्मि ॥ ४१४१ ॥** [तुला.जी.भा.२५३]

**'षट्सु स्थानेषु'** अनन्तभागवृद्धाऽ**सङ्ख्यात**भागवृद्ध-सङ्ख्यातभागवृद्ध-सङ्ख्यातगुणवृद्धाऽसङ्ख्यातगुणवृद्धा-ऽनन्तगुणवृद्धेषु यानि **पतितानि स्थानानि** तेषां सम्बन्धिनो **ये सरागाः संयतास्ते** वेदितव्याः, षट्स्थानपतितेषु स्थानेषु सरागसंयता वर्त्तन्ते इति भावः। तेषां च तानि षट्स्थानपतितानि स्थानानि संयमस्थानानि सङ्ख्यातीतानि असङ्ख्येयलोकाकाशप्रदेशप्रमाणानि। अत एव सरागसंयतानां केषाञ्चिद् वर्द्धते, केषाञ्चिद् हीयते, केषाञ्चिद् वर्द्धते हीयते च। ये तु **शेषा** वीतरागसंयतास्ते **एकस्मिन् स्थाने**। तथाहि— न तेषां चारित्रं वर्द्धते नापि

हानिमुपगच्छति, कषायाणामभावात्, किन्त्ववस्थितमेकमेव परमप्रकर्षप्राप्तं संयमस्थानमिति। एतेषां वस्तूनां ये साक्षाद् वेदितारस्ते आगमव्यवहारिणः ॥ ४१४१ ॥

तथा चाह—

**एयाऽऽगमववहारी पण्णत्ता राग-दोसनीहूया ।**
**आणाए जिणिंदाणं, जे ववहारं ववहरंति ॥ ४१४२ ॥** [जी.भा.२५४]

['**एते**'] अनन्तरोदिताः '**राग-दोषनिभृ[र्धू]ताः**' राग-द्वेषव्यापाररहिता **आगमव्यवहारिणः प्रज्ञप्ताः, ये जिनेन्द्राणामाज्ञया व्यवहारं व्यवहरन्ति** ॥ ४१४२ ॥

**एवं भणिते भणती, ते वोच्छिन्ना उ संपयं इहइं ।**
**तेसु य वोच्छिन्नेसुं, नत्थि विसुद्धी चरित्तस्स ॥ ४१४३ ॥** [जी.भा.२५५]

**देंता वि न दीसंती, न वि य करेंता उ संपयं केई ।**
**तित्थं च नाणदंसण, निज्जवगा चेव वोच्छिन्ना ॥ ४१४४ ॥**

'**एवं**' प्रागुक्तेन प्रकारेण **भणिते** चोदको **भणति—व्यवच्छिन्नाः** खलु '**इह**' भरतक्षेत्रे **साम्प्रत**मागम-व्यवहारिणः। **तेषु च व्यवच्छिन्नेषु चारित्रस्य विशुद्धिर्नास्ति,** सम्यक्परिज्ञानाभावतो यथावस्थित-शुद्धिदायकाभावात् । अन्यच्च मासिकं पाक्षिकमित्यादि प्रायश्चित्तं **ददतोऽपि न केचिद् दृश्यन्ते,** नापि केचित् तथारूपं प्रायश्चित्तं कुर्वन्तः, ततो ददतां कुर्वतां चाऽभावे **सम्प्रति तीर्थं 'ज्ञान-दर्शनं'** ज्ञान-दर्शनात्मकमनुवर्त्तते, न तु चारित्रात्मकम्, यतश्चारित्रस्य पर्यन्तसमये '**निर्यापका एव**' यथावस्थितशोधिप्रदानत उत्तरोत्तरचारित्रनिर्वाहका एव **व्यवच्छिन्नाः** ॥ ४१४३ ॥ ४१४४ ॥

सम्प्रत्येतदेव विभावयिषुः प्रथमतश्चारित्रस्य शुद्धिर्नास्तीति भावयति—

**चोद्दसपुव्वधराणं, वोच्छेदो केवलीण वोच्छेदे ।**
**केसिंची आदेसो,पायच्छित्तं पि वोच्छिन्नं ॥ ४१४५ ॥** [जी.भा.२५६]

**केवलिनां व्यवच्छेदे** सति तदनन्तरं स्तोकेन कालेन **चतुर्दशपूर्वधराणामपि व्यवच्छेदो** भवति। ततः शोधिदायकाभावान्नास्ति शुद्धिश्चारित्रस्य। अन्यच्च **केषाञ्चिदयमादेशः**, यथा—**प्रायश्चित्तमपि व्यवच्छिन्नम्** ॥ ४१४५ ॥ एतदेव भावयति—

**जं जत्तिएण सुज्झइ पावं तस्स तह देंति पच्छित्तं ।**
**जिण चोद्दसपुव्वधरा, तव्विवरीया जहिच्छाए ॥ ४१४६ ॥** [जी.भा.२५७]

'**जिनाः**' केवलिप्रभृतय**श्चतुर्दशपूर्वधराश्च**। **यत्** पापं यस्य **यावता** प्रायश्चित्तेन **शुध्यति तस्य** तथा तावन्मात्रं **प्रायश्चित्तं ददति**। ये तु **तद्विपरीताः कल्प-व्यवहार-निशीथधरास्ते** आगमव्यवहाराभावतो **यदृच्छया** प्रायश्चित्तं दद्युः, कदाचिन्न्यूनं कदाचिदधिकं वा ।ततः परमार्थतः सम्प्रति प्रायश्चित्तं व्यवच्छिन्नम्। तद्व्यवच्छेदान्निर्यापका अपि चारित्रस्य व्यवच्छिन्नाः ॥ ४१४६ ॥

एतदेव भावयति—

**पारगमपारगं वा, जाणंते, जस्स जं च करणिज्जं ।**
**देइ तहा पच्चक्खी, घुणक्खरसमो उ पारोक्खी ॥ ४१४७ ॥** [जी.भा.२५८]

एष संवरितुकामः पारगामी भविष्यति, एष नेति, **पारगमपारगं वा [ प्रत्यक्षी ]** प्रत्यक्षागमव्यवहारिणः सम्यग् **जानते**। **यच्च यस्य करणीयं,** कर्तुं शक्यं तस्य तद् ज्ञात्वा तदेव **तथा ददति**। तथा ते पारगाऽपारगादिज्ञानसमन्वितास्ततस्तादृशमुपायमुपदिशन्ति येन स पारगामी

भवति, यथा चाराधक उपजायते। यस्तु '**परोक्षी**' परोक्षज्ञानी स **घुणाक्षरसमः**। किमुक्तं भवति ? – घुणाक्षरवद् यदृच्छया, ततः कदाचित् पापशुद्धिः, नावश्यमिति ॥ ४१४७॥

अन्यच्च तस्य परोक्षज्ञानिनः प्रायश्चित्तं ददतो महत् पापम्, तथा चाह—

**जा य ऊणाहिए दाणे, वुत्ता मग्गविराहणा ।**

**न सुज्झे तीइ देंतो उ, असुद्धो किह सोहए ?॥ ४१४८॥** [जी.भा.२५९]

स हि परोक्षज्ञानी यदृच्छया व्यवहरन् कदाचिदूनमधिकं वा प्रायश्चित्तं दद्यात्। ततो **या ऊनाऽधिके**प्रायश्चित्त**दाने' मार्गविराधना** 'मोक्षपथ-सम्यग्दर्शन-ज्ञान-चारित्रविराधनाजिनै**रुक्ता तया** स दाता **न शुध्यति,** स्वयमशुद्धश्च कथमन्यं **शोधयेत्?** इति भावः ॥ ४१४८॥

अथसोऽपिसूत्रबलेनप्रायश्चित्तंददातिततःकथंनशोधयति ?तदप्यसम्यक्, अर्वाक्श्रुतधराणां सम्यक्सूत्रार्थस्यापरिज्ञानात्। तथा चाह—

**अत्थं पडुच्च सुत्तं, अणागयं तं तु किंचि आमुसति ।**

**अत्थो वि कोइ सुत्तं, अणागयं चेव आमुसति ॥ ४१४९ ॥** [जी.भा.२६४]

**अर्थं प्रतीत्य किञ्चित् सूत्रमनागतमेव** भवति, किञ्चित् पुनः सूत्रं स्वस्थानगतमर्थ**मामृशति,** "**विचित्रा सूत्रस्य प्रवृत्तिः**" इति वचनात्। **अर्थोऽपि कश्चित् सूत्रमनागतमेवाऽऽमृशति,** एतच्च सम्यग् जानन्ति चतुर्दशपूर्वधराः, नान्ये, ततः सम्प्रति सूत्रार्थस्याप्यपरिज्ञानान्न प्रायश्चित्तदानशुद्धिः, तदभावाच्च निर्यापकाणामप्यसिद्धिः ॥ ४१४९ ॥

सम्प्रति "देंता वि न दीसंती" इत्यादिव्याख्यानार्थमाह—

**देंता वि न दीसंती, मास चउमासियातो सोहीतो ।**
**कुणमाणा य विसोहिं, न पासिमो संपयं केई ॥ ४१५० ॥** [जी.भा.२६०]

**मासिकीं चातुर्मासिकीम्** , उपलक्षणमेतत्, पञ्चमासिक्यादिकामपि वा **शोधिं** सम्प्रति केचिद् **ददतोऽपि न दृश्यन्ते**, नापि कांश्चित् मासिकीं चातुर्मासिकीं वा [ **विशोधिं** ] **कुर्वाणान् सम्प्रति पश्यामः** ॥४१५० ॥

**सोहीए य अभावे, देंताण करेंतगाण य अभावे ।**
**वट्टइ संपइ काले, तित्थं सम्मत्त-नाणेहिं ॥ ४१५१ ॥** [जी.भा.२६१]

उक्तप्रकारेण **शोधेरभावे,** शोधिं **ददतां कुर्वतां चाऽभावे सम्प्रति काले तीर्थं वर्त्तते सम्यक्त्व-ज्ञानाभ्याम्** ॥ ४१५१ ॥

**एवं तु चोइयम्मी, आयरिओ भणति न हु तुमे नायं ।**
**पच्छित्तं कहियं तू?, किं धरती? किं व वोच्छिन्नं? ॥ ४१५२ ॥**

[जी.भा.२६३]

**'एवं तु'** उक्तेन प्रकारेण **'चोदिते'** प्रश्ने कृते सति **आचार्यो ब्रूते—'न हु'** नैव त्वया **ज्ञातम्,** यथा—**प्रायश्चित्तं** प्रथमतः **क्वोक्तम्** ? **किं** वा सम्प्रति प्रायश्चित्तस्य **'धरते'** विद्यते ? **किं वा व्यवच्छिन्नम्?** ॥ ४१५२ ॥

तत्र प्रथमतो यत्र प्रायश्चित्तमभिहितं तदभिधित्सुराह—

**सव्वं पि य पच्छित्तं, पच्चक्खाणस्स ततियवत्थुम्मि ।**
**तत्तो च्चिय निज्जूढं, पकप्प कप्पो य ववहारो ॥ ४१५३ ॥** [जी.भा.२६५]

**सर्वमपि प्रायश्चित्तं** नवमस्य **प्रत्याख्यानाभिधस्य** पूर्वस्य **तृतीये वस्तुनि, तत एव च निर्यूढं** दृब्धं **प्रकल्पः** निशीथाध्ययनं, **कल्पो व्यवहारश्च** ॥ ४१५३॥

सम्प्रति "किं धरती? किं व वोच्छिन्न"मित्यस्य व्याख्यानार्थं द्वारगाथामाह—

**सपयपरूवण अणुसज्जणा य दस चोद्दस अट्ठ दुप्पसहे ।**
**अत्थि न दीसइ धणिएण विणा तित्थं च निज्जवए ॥ ४१५४॥**

[जी.भा.२६७]



**स्वपदं** नाम-निजं स्थानम् , तच्च प्रज्ञापकस्य प्रायश्चित्तम्। तथाहि— चारित्रस्य प्रवर्त्तकः प्रज्ञापक उच्यते, प्रज्ञापनं चातीवाप्रायश्चित्तदानत इति स्वपदं प्रज्ञापकस्य प्रायश्चित्तम्, तस्य **प्ररूपणा** कर्त्तव्या १। तथा यावत् **चतुर्दश**पूर्वाणि तावद् **दशा**नामपि प्रायश्चित्तानाम**नुषञ्जना**। **अष्टा**नामन्तिम-विकल्पानां यावद् **दुष्प्रसभ** आचार्यस्तावदनुषञ्जना। यदप्युच्यते—ददतः कुर्वाणा वा शोधिं **न** दृश्यन्ते केचनेति तदप्ययुक्तम्, यत आह- **अत्थि** त्ति सन्ति तेऽपि केचन, **दृश्यन्ते** च उपायेन, वहनात्। अत्र च **विणे** ति दृष्टान्तो **धनिकेन** वक्तव्यः। तथा **तीर्थं** च चारित्रसहितमनुवर्त्तते। यदप्युक्तं निर्यापको नास्तीति तदप्ययुक्तम्, यत आह- **निज्जवगे**

त्ति निर्यापकोऽस्ति। एष द्वारगाथासङ्क्षेपार्थः ॥ ४१५४॥

साम्प्रतमेनामेव विवरीषुः 'सपयपरूवणे' त्यस्य व्याख्यानमाह—

**पण्णवगस्स उ सपयं, पच्छित्तं चोयगस्स तमणिट्ठं ।**
**तं संपयं पि विज्जइ, जहा तहा मे निसामेहि ॥ ४१५५॥** [जी.भा.२७१]

**प्रज्ञापकस्य स्वपदं प्रायश्चित्तम्**, एतत् प्रागेव भावितम् । **तत् चोदकस्याऽनिष्टं** नास्तीति आरूढं तच्चायुक्तम्, यतः **साम्प्रतमपि तद् विद्यते यथा** च **तद्** विद्यते कथ्यमानं [तत् तथा] **निशामय** ॥४१५५॥

**पासायस्स उ नेम्मं लिहावियं चित्तकारगेहिं जहा ।**
**लीलविहूणं नवरं, आगारो होइ सो चेव ॥ ४१५६॥** [जी.भा.२७१]

चक्रवर्त्तिनो वर्द्धकिरत्नेन प्रासादो निर्मापितः, तमन्ये राजानो दृष्ट्वा आत्मीयान् आत्मीयान् प्रधानवर्द्धकीनादिशन्ति— 'यथा चक्रवर्त्तिनः प्रासादः ईदृशानस्माकं प्रासादान् कुरुत'। ते ब्रुवते-'देव! स तादृशः प्रासादोऽस्माभिर्न दृष्टस्ततः क्वाप्यालेख्य दर्शयन्तु येन तं दृष्ट्वा

तदनुरूपान् प्रासादान् निर्मापयामः'। ततस्तै राजभिश्चक्रवर्त्तिनगरे प्रेषितैः स्वकीयैश्चित्रकरैः **प्रासादस्य निर्मापणं** फलकेषु **लेखापितम्,** लेखाप्य च निजनिजप्रधानवर्द्धकीनां समर्पितम्। तैरपि तदनुरूपाः प्रासादा निर्मापिताः, परं यादृशी लीला चक्रवर्त्तिप्रासादस्य न तादृशी तेषाम्। तथा चाह— तेषां प्राकृतवर्द्धकिनिष्पादितानां प्रासादानां निर्मापणं **नवरं लीलाविहीनं** जातम्, **आकारः पुनर्भवति स एव** यादृशश्चक्रवर्त्तिप्रासादस्य ॥ ४१५६ ॥

एतदेव किञ्चिद् भावयति—

**भुंजइ चक्की भोए, पासाए सिप्पिरयणणिम्मविए ।**
**किं व न कारेइ तहा, पासाए पागयजणो वि? ॥ ४१५७॥** [जी.भा.२६९]

**चक्री** चक्रवर्त्ती **शिल्पिरत्ननिर्मापिते** वर्द्धकिरत्ननिष्पादिते **प्रासादे** स्थितस्सन् **भोगान् भुङ्क्ते**। तं च तथा दृष्ट्वा **किं प्राकृतजनोऽपि** प्राकृतराजलोकोऽपि **तथा प्रासादान् न कारयति** ? कारयत्येवेति भावः। परं न तादृशस्तेषां रूपविशेषः ॥ ४१५७ ॥

ततः किम्? इत्याह—

**जह रूवादिविसेसा, परिहीणा होंति पागयजणस्स ।**
**न य ते न होंति गेहा, एमेव इमं पि पासामो ॥ ४१५८ ॥** [जी.भा.२७२]

**यथा प्राकृतजनस्य** प्राकृतवर्द्धकिलोकस्य तथारूपसम्यक्परिज्ञानाभावतो **रूपादिविशेषाः** कर्त्तव्यतया **परिहीनाः** प्रासादानां **भवन्ति, न च ते न भवन्ति गेहाः** प्रासादाः। एवम् **इदमपि** प्रायश्चित्तं **पश्यामः** ॥ ४१५८ ॥

एतदेव भावयति—

**एमेव य पारोक्खी, तयाणुरूवं तु सो वि ववहरइ ।**
**किं पुण ववहरियव्वं ?, पायच्छित्तं इमं दसहा ॥ ४१५९ ॥** [जी.भा.२७३]

**एमेव वर्द्धकिदृष्टान्त**गतेन प्रकारेण **तदनुरूपं** प्रत्यक्षागमव्यवहारानुरूपं **परोक्षी** 'परोक्षज्ञानी **व्यवहरति। किं पुनः व्यवहर्त्तव्यम्** ? उच्यते— '**इदं**' वक्ष्यमाणं **दशधा** दशप्रकारं **प्रायश्चित्तम्** ॥ ४१५९ ॥

तदेवाह—

**आलोयण१ पडिकमणे२, मीस३ विवेगे४ तहा विउस्सग्गे ५।**
**तव६ छेय७ मूल८ अणवट्ठया९य पारंचिए१० चेव ॥ ४१६०॥** [जी.भा.२७४]

**आलोचना** प्रायश्चित्तम्१। **प्रतिक्रमणं** मिथ्यादुष्कृतप्रदानलक्षणम्२। **मिश्रम्** आलोचनाप्रति-क्रमणात्मकम्३। **विवेकः** परिष्ठापनम्४। **व्युत्सर्गः** कायोत्सर्गः५। **तपः** चतुर्थादिषण्मास-पर्यन्तम्६। **छेदः** प्रव्रज्यापर्यायस्य दिनैर्मासैर्वा परिहानिः७। **मूलं** पुनर्व्रतारोपणम्८। **अनवस्थाप्यं९ पाराञ्चितं१० च**। अमीषां च दशानां प्रायश्चित्तानां स्वरूपं प्रपञ्चतः **पीठिकायामुक्तं कल्पाध्ययने** वा ततस्तस्मादवधार्यम् ॥ ४१६०॥

तदेवं "सपयपरूवणे" ति गतम् १। अधुना "अणुसज्जणा य दस चोद्दस, अट्ठ दुप्पसहे" इत्यस्य व्याख्यानमाह—

**दस ता अणुसज्जंती, चोद्दसपुव्वी य पढमसंघयणं ।**
**तेण परेणऽट्ठविहं, जा तित्थं ताव बोद्धव्वं ॥ ४१६१॥** [जी.भा.२७६]

यावत् **प्रथमं संहननं चतुर्दशपूर्वी** च **तावद् दश** प्रायश्चित्तानि **अनुषजन्ति** स्म । एतौ

च प्रथमसंहनन-चतुर्दशपूर्विणौ समकं व्यवच्छिन्नौ। तयोश्च व्यवच्छिन्नयोरनवस्थाप्यं पाराञ्चितं च व्यवच्छिन्नम् । **ततः परेण** अनवस्थाप्य-पाराञ्चितव्यवच्छेदादर्वाग् **अष्टविधं** प्रायश्चित्तं **तावदनुषजद्**- अनुवर्त्तमानं **बोद्धव्यं यावत् तीर्थम्** । तीर्थव्यवच्छेदकाले च **दुष्प्रसभो** नाम सूरिर्भविष्यति, तस्मिन् कालगते तीर्थं चारित्रं च व्यवच्छेत्स्यति ॥ ४१६१ ॥

यदप्युक्तम् "देंता वि न दीसंति" इत्यादि तत्राह—

**दोसु य वोच्छिन्नेसुं, अट्ठविहं देंतया करेंता य ।**
**न वि केई दीसंती, वयमाणे भारिया चउरो ॥ ४१६२ ॥** [जी.भा.२७९]

**द्वयोः** अनवस्थाप्य-पाराञ्चितयोरथवा प्रथमसंहनन-चतुर्दशपूर्विणो**र्व्यवच्छिन्नयोरष्टविधं** प्रायश्चित्तं **ददतः कुर्वतो वा केचिन्न दृश्यन्ते** इति **वदति** परस्मिन् प्रायश्चित्तं **चत्वारो भारिताः** गुरुका मासाः ॥ ४१६२ ॥

**दोसु वि वोच्छिन्नेसू, अट्ठविहं देंतया करेंता य ।**
**पच्चक्खं दीसंते जहा तहा मे निसामेहि ॥ ४१६३ ॥** [जी.भा.२८०]

**द्वयोः** अन्तिमयोः प्रायश्चित्तयोः प्रथमसंहनन-चतुर्दशपूर्विणोर्वा **व्यवच्छिन्नयोरष्टविधं** प्रायश्चित्तं **ददतः कुर्वन्तश्च प्रत्यक्षं दृश्यन्ते यथा तथा मम** कथयतो **निशमय** ॥ ४१६३ ॥

**पंचेव नियंठा खलु, पुलाग१ बकुसा२ कुसील३ निग्गंथा४ ।**
**तह य सिणाया५ तेसिं, पच्छित्त जहक्कमं वोच्छं ॥ ४१६४ ॥** [जी.भा.२८१]

**पञ्चैव खलु निर्ग्रन्थाः** भवन्ति । तद्यथा- **पुलाको१ बकुशः२ कुशीलः३ निर्ग्रन्थः४ स्नातकश्च५**। एतेषां च स्वरूपं **व्याख्याप्रज्ञप्ते**रवसेयम् । **एतेषां प्रायश्चित्तं यथाक्रमं वक्ष्ये** ॥४१६४॥ प्रतिज्ञां पूरयति-

**आलोयण१ पडिक्कमणे२ मीस३ विवेगे४ तवे५ विउस्सग्गे६ ।**
**एए छ प्पच्छित्ता, पुलगनियंठस्स बोधव्वा ॥ ४१६५ ॥** [तुला.जी.भा.२८२]

**आलोचना१ प्रतिक्रमणं२ मिश्रं३ विवेकः४ तपः५ व्युत्सर्गः६, एतानि षट् प्रायश्चित्तानि पुलाकनिर्ग्रन्थस्य बोद्धव्यानि** ॥ ४१६५ ॥

**बउस-पडिसेवगाणं, पायच्छित्ता हवंति सव्वे वि।**
**थेराण भवे कप्पे, जिणकप्पे अट्ठहा होति॥ ४१६६॥** [जी.भा.२८३]

**बकुश-प्रतिसेवकयोः** बकुशस्य प्रतिसेवनाकुशीलस्य च **सर्वाण्यपि** दशापि **प्रायश्चित्तानि भवन्ति**। तौ च बकुश-प्रतिसेवनाकुशीलौ **स्थविराणां कल्पे भवतः** जिनकल्पे, उपलक्षणमेतत्, यथालन्दकल्पे च। नवरं **जिनकल्पे** यथालन्दकल्पे च तयोः प्रायश्चित्त**मष्टधा भवति**, अनवस्थाप्यपाराञ्चितयोरभावात् ॥ ४१६६॥

**आलोयणा१ विवेगो२ य, नियंठस्स दुवे भवे।**
**विवेगो य सिणायस्स, एमेया प्रडिवत्तीतो ॥ ४१६७॥** [जी.भा.२८४]

**आलोचना**प्रायश्चित्तं १ **विवेक**प्रायश्चित्त२ मित्येते **द्वे प्रायश्चित्ते निर्ग्रन्थस्य भवतः**। **स्नातकस्य** केवल एको **विवेकः**। **एवमेताः** पुलाकादिषु **प्रतिपत्तयः** ॥ ४१६७॥

**पंचेव संजया खलु, नायसुएण कहिया जिणवरेणं।**
**तेसिं पायच्छित्तं, जहक्कमं कित्तयिस्सामि ॥ ४१६८॥** [जी.भा.२८५]

ज्ञातसुतेन जिनवरेण वर्द्धमानस्वामिना पञ्चैव खलु संयताः कथिताः । तेषामहं यथाक्रमं प्रायश्चित्तं कीर्त्तयिष्यामि ॥ ४१६८ ॥

तदेव कीर्त्तयति—

**सामाइसंजयाणं, पच्छित्ता छेद-मूलरहियऽट्ठ ।**
**थेराण जिणाणं पुण, तवमंतं छव्विहं होति ॥ ४१६९ ॥** [जी.भा.२८६]

**सामायिकसंयतानां स्थविराणां** स्थविरकल्पिकानां **छेद-मूलरहितानि** शेषाण्यष्टौ **प्रायश्चित्तानि** भवन्ति। **जिनानां** जिनकल्पिकानां **पुनः** सामायिकसंयतानां **तपःपर्यन्तं षड्विधं** प्रायश्चित्तं **भवति** ॥ ४१६९ ॥

**छेदोवट्ठावणिए, पायच्छित्ता हवंति सव्वे वि ।**
**थेराण जिणाणं पुण, मूलंतं अट्ठहा होइ ॥ ४१७० ॥** [जी.भा.२८७]

**छेदोपस्थापनीये** संयमे वर्त्तमानानां **स्थविराणां सर्वाण्यपि प्रायश्चित्तानि भवन्ति** । **जिनकल्पिकानां पुनर्मूलपर्यन्तमष्टधा भवति** ॥

**परिहारविसुद्धीए, मूलंता अट्ठ होंति पच्छित्ता ।**
**थेराण जिणाणं पुण, छव्विह छेयादिवज्जं च ॥ ४१७१ ॥** [जी.भा.२८८]

परिहारविशुद्धिके संयमे वर्त्तमानानां **स्थविराणां मूलान्तान्यष्टौ प्रायश्चित्तानि भवन्ति। जिनानां पुनश्छेदादिवर्जं षड्विधम्** ॥ ४१७१ ॥

**आलोयणा१विवेगो२य, तइयं तु न विज्जई।**
**सुहुमे य संपराए, अहक्खाए तहेव य ॥ ४१७२ ॥** [जी.भा.२८९]

**सूक्ष्मसम्पराये यथाख्याते च** संयमे वर्त्तमानाना**मालोचना विवेक** इत्येवंरूपे द्वे प्रायश्चित्ते भवतः, **तृतीयं तु न विद्यते** ॥ ४१७२ ॥

ततः प्रस्तुते किमायातम् ? इति चेत्, अत आह—

**बउस-पडिसेवया खलु, इत्तरि-छेया य संजया दोन्नि ।**
**जा तित्थऽणुसज्जंती, अत्थि हु तेणं तु पच्छित्तं ॥ ४१७३ ॥** [जी.भा.२९०]

निर्ग्रन्थचिन्तायां **बकुशः प्रतिसेवकः** प्रतिसेवनाकुशील इत्येतौ द्वौ निर्ग्रन्थौ, संयतचिन्तायाम् **इत्वरी** इत्वरसामायिकवान् **छेदः** छेदोपस्थाप्यश्चेति द्वौ **संयतौ यावत् तीर्थं** तावद् **अनुषजतः** अनुवर्तेते, **तेन** ज्ञायते—**अस्ति** सम्प्रत्यपि **प्रायश्चित्तम्** ॥ ४१७३ ॥

गतमस्तीति द्वारमधुना "न दीसइ धणिएण विणे"ति व्याख्यानार्थमाह—

**जइ अत्थि न दीसंती केति करेंतऽत्थ धणियदिट्ठंतो ।**
**संतमसंते विहिणा, मोयंता दो वि मुच्चंति[१] ॥ ४१७४ ॥** [तुला-जी.भा.२९१]

चोदकः प्राह—**यद्यस्ति** प्रायश्चित्तं ततः कस्मात् **केचित् कुर्वन्तो न दृश्यन्ते** ?। सूरिराह—उपायेन कुर्वन्ति ततो न दृश्यन्ते । तथा चात्र **धनिकेन दृष्टान्तः**— धारके **सत्यसति** च विभवे तौ च धारकौ **द्वावपि** सद्विभवाऽसद्विभवौ **विधिना मोच्यमानौ** ऋणान्मुच्येते ॥ ४१७४ ॥

एतदेव भावयति—

१. इतोऽग्रे जीतकल्पभाष्ये २९२ गाथा इत्थम्- 'जह धणियो सावेक्खो णिखेक्खो चेव होइ [ दुविहो ]तु। घरणगसंतविभवो असंतविभवो य सो दुविहो ॥'

**संतविभवो उ जाहेव मग्गितो देति ताहे तं सव्वं ।**
**जो पुण असंतविहवो, तत्थ विसेसो इमो होइ ॥ ४१७५ ॥** [जी.भा.२९३]

धनिकस्य द्वौ धारकौ सम्भवतः। तद्यथा—असद्विभवः१ सद्विभवश्च २। तत्र यः **सद्विभवः** स **यदैव याच्यते तदैव तत् सर्वं** दातव्यं **ददाति । यः पुनरसद्विभवस्तत्र अयं** वक्ष्यमाणो **विशेषो भवति** ॥ ४१७५ ॥

तमेवाह—

**निरवेक्खो तिण्णि चयती, अप्पाण१धणागमं२ च धारणगं३ ।**
**सावेक्खो पुण रक्खइ,अप्पाण१धणं२ च धारणगं३ ॥ ४१७६ ॥**

[जी.भा.२९४]

धनिको द्विधा—सापेक्षः१ निरपेक्षश्च२। तत्र सापेक्षो नाम— यो धारकादसद्विभवाद् धनमुपायेन गृह्णाति१। निरपेक्षः[1] **धनस्य ग्रहणे कर्कशः ग्रहीता२** [इत्यर्थ]। तत्र **निरपेक्षः त्रीणि त्यजति**। तद्यथा- **आत्मानं१ धनागमं२ धारणकं३ च । सापेक्षः पुनः त्रीण्यपि रक्षति—आत्मानं१ धनं२ धारणकं३ च** ॥ ४१७६ ॥

१. **क्षः कर्कशः ग्रहणे धनस्य ग्रहीता**

कथम्? इत्याह—

**जो उ असंते विभवे, पाए घेत्तूण पडइ पाडेण ।**
**सो अप्पाण१ धणं२ पि य, धारणगं३ चेव नासेति ॥ ४१७७॥**

[जी.भा.२९५]

**यो** धनिको निरपेक्षो**ऽसद्विभवे**ऽसद्विभवस्य **पादौ गृहीत्वा** आत्मीय**पादेन** सह बद्ध्वा पातेन **पतति स आत्मानं १ धनं २ धारणकं ३ च नाशयति**। यतः स तथा क्लिश्यमानो धनिकं जीवितात् व्यपरोप्य नश्येत्, यदि वाऽऽत्मानं विनाशयेत्, यद्वा उभयमपि, ततस्त्रयस्यापि विनाशः ॥ ४१७७॥

**जो पुण सहती कालं सो, अत्थं लभति रक्खई तं च ।**
**न किलिस्सइ य सयं पी, एव उवातो उ सव्वत्थ ॥ ४१७८॥**

[जी.भा.२९६]

**यः पुन**र्धनिको धारणकमसद्विभवं ज्ञात्वा उपायेन अस्माद् धनमुपादेयम् इति विचिन्त्य

**कालं सहते** वक्ष्यमाणप्रकारेण कालं विलम्बयति **सोऽर्थं लभते, तं च** धारणकं **रक्षति, न च स्वयमपि क्लिश्यति । एवमुपायः** पुरुषेण **सर्वत्र** कर्त्तव्यः ॥ ४१७८ ॥

अथ कथं कालं सहते? इत्याह—

**जो उ धारेज्ज वड्ढंतं, असंतविभवो सयं ।**
**कुणमाणो उ कम्मं तु, निव्विसे करिसावणं ॥ ४१७९ ॥**

**अणमप्पेण[1] कालेणं, सो तगं तु विमोयए ।**
**दिट्ठंतेसो भणितो, अत्थोवणतो इमो तस्स ॥ ४१८० ॥** [जी.भा.२९७-८]

**यः** धारणको रूपकशतं दातव्यं धनिकानुमत्या प्रतिदिवसं प्रतिमासं वा काकिनीवृद्ध्या **वर्द्धमानं धारयति, स्वयं चाऽसद्विभवो** धनिकस्य गृहे **कर्म कुर्वन् कार्षापणं निवेशयति** धनिकस्य प्रवेशयति, **सोऽल्पेन कालेन तद् ऋणं मोचयति** ॥ ४१७९ ॥ ४१८० ॥

एष दृष्टान्तः। अयमर्थोपनयस्तस्य—

---

१. अत्र ४१७९ गाथायां पूर्वार्धे अनुष्टुप् उत्तरार्धे आर्या छन्दः ॥

**संतविभवेहि तुल्ला धिति-संघयणेहि जे उ संपन्ना।**

**ते आवण्णा सव्वं वहंति निरणुग्गहं धीरा ॥ ४१८१॥** [जी.भा.२९९]

**ये धृति-संहननाभ्यां सम्पन्नाः** युक्ताः **सद्विभवैस्तुल्याः । ते धीराः सर्वमापन्न**प्रायश्चित्तं **निरनुग्रहम्** अनुग्रहरहितं **वहन्ति** ॥ ४१८१॥

**संघयण-धितीहीणा असंतविभवेहि होंति तुल्ला उ ।**

**निरवेक्खो जइ तेसिं देति ततो ते विणास्संति ॥ ४१८२॥** [जी.भा.३००]

ये पुनः **धृति-संहननाभ्यां हीनास्ते असद्विभवैस्तुल्याः। तेषां यदि निरपेक्षस्सन्** निरवशेषं प्रायश्चित्तं **ददाति ततस्ते विनश्यन्ति**। तथाहि—ते तत् प्रायश्चित्तं निरवशेषं वोढुमशक्नुवन्तः तपसा कृशीकृता जीवितादपगच्छेयुः ॥ ४१८२॥

**ते तेणं परिचत्ता, लिंगविवेगं तु काउ वच्चंति ।**

**तित्थुच्छेदो अत्ता, एगाणियतेण चत्तो यं[१] ॥ ४१८३॥** [जी.भा.३०१]

---

१. इतोऽग्रे जीतकल्प भाष्ये ३०२ गाथा-''ते उद्वेत्तु पलाणा, पच्छा एकाणियो तयो होंति। ताहे किंतु करेतू? एवं अप्पा परिच्चत्तो॥''

यदि वा **ते** प्रायश्चित्तभग्ना **लिङ्गविवेकं कृत्वा व्रजन्ति ततस्तेन** निरवशेषप्रायश्चित्तदात्रा **परित्यक्ताः**। यथैवमेके, एवमन्येऽपि, एवमपरेऽपि, ततः सर्वसाधुव्यपगमतस्**तीर्थस्योच्छेदः**। तथा तेनाऽऽचार्येण निरवशेषं प्रायश्चित्तं साधूनां ददता प्रायश्चित्तभङ्गभयात् साधूनामपगमत **आत्मा** एकाकीकृतः, **एकाकितया च त्यक्तः**। चशब्दाद् गच्छोऽपि त्यक्तः। तथाहि—साधूनामपगमे बाल-वृद्ध-ग्लानादीनामुपग्रहे न कोऽपि वर्त्तते ततस्तेऽपि तेन तत्त्वतः परित्यक्ताः। तथा अवधाविताः सन्तो ये दीर्घकालं संसारमाहिण्डिष्यन्ते सोऽपि तन्निमित्त इति तस्य महत् पापम् ॥४१८३॥

तदेवं निरपेक्षस्य दोष उक्तः । सम्प्रति सापेक्षस्य गुणमाह—

**सावेक्खो पवयणम्मी, अणवत्थपसंगवारणाकुसलो ।**

**चारित्तरक्खणट्ठा अव्वोच्छित्तीय उ विसुज्झे ॥ ४१८४॥** [जी.भा.३०३]

यः पुनराचार्यः **प्रवचने सापेक्षोऽनवस्थाप्रसङ्गवारणाकुशलः** स **चारित्ररक्षणार्थं**

तीर्थस्याऽ**व्यवच्छित्त्या** च **विशोधयति**, यथा चारित्रस्य रक्षा भवति तीर्थस्य चाव्यवच्छेदस्तथोपायेन शोधयति इत्यर्थः ॥ ४१८४ ॥

उपायमेवाह—

**कल्लाणगमावन्ने, अतरंते जहक्कमेण काउं जे ।**
**दस कारेंति चउत्थे, तब्बिगुणायऽऽयंबिलतवे वा ॥ ४१८५॥**

**एक्कासण पुरिमड्ढा, निव्विगती चेव बिगुणबिगुणा उ ।**
**पत्तेयाऽसहु दाणं, कारेंति व सन्निगासं तु ॥ ४१८६॥** [जी.भा.३०४-५]

पञ्च अभक्तार्थाः, पञ्च आयामाम्लानि, पञ्चैकासनकानि, पञ्च पूर्वार्द्धानि, पञ्च निर्विकृतिकानि, एतत् पञ्चकल्याणकं तद् ज्येष्ठापन्ना **यथाक्रमेण** च **कर्तुमशक्नुवन्त**स्तान् **दश चतुर्थान् कारयन्ति** तथाऽप्यशक्नुवतस्त**द्द्विगुणाचाम्लतपः** कारयन्ति, विंशतिमाचाम्लानि कारयन्तीत्यर्थः ॥

एव**मेकाशन-पूर्वार्द्ध-निर्विकृतीर्द्विगुणद्विगुणाः** कारयन्ति। किमुक्तं भवति ?—

विंशत्याचाम्लकरणाशक्तौ चत्वारिंशतमेकाशनकानि कारयन्ति, तत्राप्यशक्तौ अशीतिं पूर्वार्द्धानि कारयन्ति, तत्राप्यशक्तौ षष्ट्यधिकं शतं निर्विकृतिकानां कारयन्ति। एतत् पञ्चसु कल्याणेष्वेकैकं कल्याणं **प्रत्येक**मव्यवच्छित्त्या कर्त्तुम् **असहस्य** असमर्थस्य **दानमुक्तम्**। अथवाऽयमन्यो विकल्पः-**कारेंति व सन्निगासं तु सन्निकाशं** सन्निभं वा **कारयन्ति** । इयमत्र भावना— यत् तत् पञ्च**कल्याणकमापन्नं** तन्मध्यादाद्यं द्वितीयं तृतीयं वा कल्याणकमेकतरं यथाक्रमेण वहति, शेषमायामाम्लादिभिः प्रवेशयति ॥ ४१८५ ॥ ४१८६ ॥

पुनरन्यथाऽनुग्रहप्रकारमाह—

**चउ-तिग-दुगकल्लाणं, एगं कल्लाणं च कारेंती ।**
**जं जो उ तरति तं तस्स, देंति असहुस्स झोसंति ॥ ४१८७ ॥** [जी.भा.३०६]

यदि वा पञ्चकल्याणकमुक्तस्वरूपं यथाक्रमेणाव्यवच्छित्त्या कर्तुमशक्नुवन्तं तं **चतुष्कल्याणकं** कारयन्ति। तदप्यशक्नुवन्तं **त्रिकल्याणकम्**, तथाप्यसमर्थतया **द्विकल्याणकम्**, तदप्यशक्नुवन्त-**मेककल्याणकं कारयति** । किं बहुना ? **यद् यः** कर्तुं **शक्नोति तस्य तद् ददति**, नाधिकम्, आबाधासम्भवात्। अथैकमपि कल्याणकं कर्तुं न शक्नोति तदा तस्या**ऽसहस्य**

सर्वं **झोषयित्वा** एकमभक्तार्थं दीयते, अथवा एकमायाम्लम्, यदि वा एकमेकाशनकम्, अथवैकं पूर्वार्द्धम्, अथवा निर्विकृतिकम् । अथ न किञ्चिद् ददति तदाऽनवस्थाप्रसङ्गः ॥ ४१८७॥

एतदेव स्पष्टयति—

**एवं सदयं दिज्जति, जेणं सो संजमे थिरो होति ।**
**न य सव्वहा न दिज्जति, अणवत्थपसंगदोसाओ ॥ ४१८८॥**

**एवम्** अमुना प्रकारेण **सदयं** सानुकम्पं **दीयते** प्रायश्चित्तम्, **येन स संयमे स्थिरो भवति, न च सर्वथा न दीयते, अनवस्थाप्रसङ्गदोषात्।** अत्र दृष्टान्तो बालकतिलस्तेनकद्वयेन—



एगो कप्पट्ठितो अंगोहलिं काऊण रमंतो तिलरासिम्मि निम्मज्जितो । बाल त्ति काऊण न केणइ वारितो, तिला सरीरम्मि लग्गा। ततो सो सतिलो घरमागतो जणणीए तिला दिट्ठा, पप्फोडिया गहिया य। ततो तिललोभेण पुणो पुणो अंगोहलेऊण दारगं पेसेइ। ततो कालेण तिले वि तेणावेइ। ततो सो पसंगदोसेण तेणो जातो, रायपुरिसेहिं गहितो मारितो य। 'माउदोसेण बालो वि एस तेणो जातो' त्ति माऊ थणच्छेयाइमवराहं पाविया।

बितितो कप्पट्ठगो तहेव अंगोहलिं काऊण रमंतो तिलरासिम्मि निमज्जितो सतिलो घरमागतो। माऊए वारितो- मा पुणो एवं कुज्जा, तिला य पप्फोडेऊण तिलरासिम्मि पक्खित्ता। सो कालंतरेण जीवियभोगाण आभागी जातो। नेव य जणणी थणछेयादियमवराहं पत्ता॥ ४१८८॥

एतदेवाह—

**[1]दिट्ठंतो तेणएणं, पसंगदोसेण जह वहं पत्तो ।**
**पावेंति [2]अणंताइं, मरणाइं अवारियपसंगा ॥ ४१८९॥**

अनवस्थाप्रसङ्गदोषे दृष्टान्तः। **'स्तेनकेन' बालकेन** तिलापहारिणा । **यथा स प्रसङ्गदोषतो वधं प्राप्त**स्तथा साधवोऽप्यनिवारितप्रसङ्गा **अनन्तानि मरणानि प्राप्नुवन्ति** ॥ ४१८९॥

**निब्भच्छणाए बितियाए वारितो जीवियाण आभागी ।**
**नेव य थणछेयादी, पत्ता जणणी य अवराहं ॥ ४१९०॥**

१. तिलहारगदिट्ठंतो पसंग- इति जीतकल्प भाष्ये ३०८॥ २. अणेगाइं-पु.प्रे.मु.॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**इय अणिवारियदोसा संसारं दुक्खसागरमुवेंती ।**
**विणियत्तपसंगा खलु, करेंति संसारवोच्छेयं ॥ ४१९१ ॥**

[जी.भा.३०९-१०]

**द्वितीयया** बालकस्तिलान् शरीरलग्नानादाय समागतो **निर्भर्त्सनया वारितः**, ततः सः **जीवितानां** जीवितसुखानामाभागी जातः, **नैव च जननी स्तनच्छेदादिकमपराधं प्राप्ता।** इति एवममुना दृष्टान्तद्वयगतेन प्रकारेण **अनिवारितदोषाः संसारं दुःखसागरमुपयन्ति।** **विनिवृत्तप्रसङ्गाः खलु** पुनः **कुर्वन्ति संसारव्यवच्छेदम्** ॥ ४१९० ॥ ४१९१ ॥

**एवं धरती सोही, देंत करेंता वि एव दीसंति ।**
**जं पि य दंसणनाणेहिं [1]जाति तित्थं ति तं सुणसु ॥ ४१९२ ॥** [जी.भा.३११]

**एवम्** अमुना प्रकारेण **धरते** विद्यते **शोधिः**, तदा **ददतः कुर्वन्तश्च** शोधिम् **एवम्** उक्तप्रकारेण **दृश्यन्ते । यदपि** चोक्तम् **दर्शन-ज्ञानाभ्यां तीर्थं यातीति** तदप्ययुक्तं यथा

१. भाति-जीतकल्प भाष्ये ॥



For Private And Personal

भवति तथा **शृणुत** ॥ ४१९२॥

अयुक्ततामेव कथयति—

**एवं तु भणंतेणं, सेणियमादी वि थाविया समणा ।**

**समणस्स [२] य जुत्तस्स य, नत्थी निरएसु उववातो ॥ ४१९३॥** [जी.भा.३१२]

यदि नाम ज्ञान-दर्शनाभ्यां तीर्थं तर्हि प्रवचनं तच्च श्रमणेष्ववस्थितं तत **एवं भणता** त्वया **श्रेणिकादयोऽपि श्रमणा व्यवस्थापिताः**, तेषामपि ज्ञान-दर्शनभावात्। न चैतदुपपन्नम्, यत् **श्रमणस्य** श्रमणगुणैर्**युक्तस्य नास्ति नरकेषूपपातः**, अथ च श्रेणिकादीनां सोऽभवत् ॥४१९३॥

**जं पि य हु एक्कवीसं, वाससहस्साणि होहिती तित्थं ।**

**तं मिच्छा सिद्धी वि य, सव्वगतीसुं तु होज्जाहि[१] ॥ ४१९४॥** [जी.भा.३१३]

**यदपि च** सूत्रे भणितम्— **एकविंशतिर्वर्षसहस्राणि तीर्थ**मनुवर्त्तमानं **भविष्यति** इति **तदपि** त्वन्मतेन **मिथ्या** प्राप्नोति, षट्स्वपि समासु ज्ञान-दर्शन भावतश्चिरकालमपि

१. उ सुत्तम्मी- जीतकल्प भाष्ये॥

तीर्थानुषञ्जनप्रसक्तेः। तथा **सर्वास्वपि च गतिषु सिद्धिरप्येवमनिवारितप्रसरा भवेत्,** सम्यग्दर्शन-ज्ञानयुक्तानां चारित्ररहितानां सर्वगतिष्वपि जीवानां भावात् । ये चानुत्तरोपपातिनो देवास्ते नियमतस्तद्भव-सिद्धिगामिनो भवेयुः, तेषामनुत्तरज्ञान–दर्शनोपेतत्वात् । न चैतदिष्टम् ॥ ४१९४ ॥

तस्मादिदमागतम्—

**पायच्छित्ते असंतम्मि, चरित्तं पी ण चिट्ठती ।**
**चरित्तम्मि असंतम्मि, तित्थे नो सचरित्तया ॥ ४१९५ ॥** [जी.भा.३१५]

**असति** अविद्यमाने **प्रायश्चित्ते चारित्रं न तिष्ठति,** प्रायश्चित्तमन्तरेण चारित्रस्य शुद्धेरभावात्। **चारित्रे** वा **असति तीर्थस्य न सचारित्रता** ॥ ४१९५ ॥

**अचरित्तयाए तित्थस्स, नेव्वाणम्मि न गच्छति ।**
**निव्वाणम्मि असंतम्मि, सव्वा दिक्खा निरत्थिया ॥ ४१९६ ॥** [जी.भा.३१६]

**तीर्थस्याचारित्रतायां** साधुर्निर्वाणं **न गच्छति। असति च निर्वाणे सर्वा दीक्षा निरर्थिका** ॥ ४१९६ ॥

**न विणा तित्थं नियंठेहिं, नियंठा वा [ न ] अतितित्थिगा ।**
**छक्कायसंजमो जाव ताव अणुसज्जणा दोण्हं ॥ ४१९७॥** [जी.भा.३१७]

**निर्ग्रन्थैर्विना तीर्थं न** भवति, नापि ते **निर्ग्रन्था अतीर्थिकाः** तीर्थरहिता भवन्ति, परस्पर-व्यवस्थिततया एकस्यापरस्य [च] भावात् । निर्ग्रन्थग्रहणं संयतानामुपलक्षणम्, तत एतदपि द्रष्टव्यम्— संयतैर्विना न तीर्थम्, नापि तीर्थमन्तरेण संयताः। निर्ग्रन्थाः संयताश्च प्रथमसंहनन-चतुर्दशपूर्वधर-व्यवच्छेदेऽपि विद्यन्ते, यतो **यावत् षट्कायसंयमस्तावद् द्वयानामपि अनुषञ्जना** अनुवर्त्तना समस्ति। षट्कायसंयमश्च प्रत्यक्षतोऽद्याप्युपलभ्यते, ततः सन्ति निर्ग्रन्थाः, सन्ति संयता इति प्रतिपत्तव्यम्। तत्सत्त्वप्रतिपत्तौ च तीर्थं सचारित्रमित्यपि प्रत्येतव्यम्। चारित्रे च सति प्रायश्चित्तमिति॥ ४१९७॥

अन्यच्च—

**सव्वन्नूहि परूविय, छक्काय महव्वया य समितीतो ।**
**सच्चेव य पन्नवणा, संपतिकाले वि साहूणं ॥ ४१९८॥**

**तं नो वच्चति तित्थं, दंसण-नाणेहि एवं सिद्धं तु ।**
**निज्जवगा वोच्छिन्ना, जं पि य भणियं तु न तहा॥ ४१९९॥**

[जी.भा.३१८-९]

पूर्वं साधूनां **सर्वज्ञैश्चारित्रस्य** प्रतिपत्तये रक्षणाय च **षट् काया महाव्रतानि समितयश्च प्ररूपिताः। सैव च प्रज्ञापना** सम्यगाराध्यतया **सम्प्रतिकालेऽपि साधूनामस्ति** । तत उपपन्नं सम्प्रत्यपि चारित्रमस्ति। **एवं च सिद्धं न तीर्थं ज्ञान-दर्शनाभ्यां व्रजति,** किन्तु ज्ञान-दर्शन-चारित्रैरिति। **यदप्युक्तम्— निर्यापका व्यवच्छिन्ना** इति तदपि **न तथा** ॥ ४१९८॥ ४१९९॥

कथम्? इति चेद् , अत आह—

**सुण जह निज्जवगऽत्थी, दीसंति जहा य निज्जविज्जंता ।**
**इह दुविहा निज्जवगा, अत्ताणे१ परे२ य बोधव्वा॥ ४२००॥**

[जी.भा.३२०]

**शृणु—यथा निर्यापकार्थिनो दृश्यन्ते, यथा च** तैर्निर्यापकै**र्निर्याप्यमाणाः। इह**

**द्विविधा निर्यापकाः**, तद्यथा— **आत्मनः१ परस्य२ च** ॥ ४२०० ॥

उभयानप्याह—

**पातोवगमे इंगिणि, दुविहा खलु होंति आयनिज्जवगा ।**
**निज्जवणा उ परेण उ, भत्तपरिन्नाए बोधव्वा ॥ ४२०१ ॥** [जी.भा.३२१]

**आत्मनिर्यापकाः खलु द्विविधा भवन्ति** । तद्यथा **पादपोपगमे१ इङ्गिनीमरणे२** च । **परेण पुनर्निर्यापना भक्तपरिज्ञायां बोद्धव्या** ॥ ४२०१ ॥

**पाओवगमं इंगिणि, दोण्णि वि चिट्ठंतु ताव मरणाइं ।**
**भत्तपरिण्णाए विहिं, वोच्छामि अहाणुपुव्वीए ॥ ४२०२ ॥** [जी.भा.३२२]

पादपस्येवोपगमो यस्य तत् **पादपोपगमम्**, **इङ्गिनी**मरणं च, **द्वे अपि तावद् मरणे तिष्ठताम्**, पश्चाद् वक्ष्यमाणत्वात्। सम्प्रति **भक्तपरिज्ञाया विधिमानुपूर्व्या वक्ष्यामि** ॥ ४२०२ ॥

प्रतिज्ञातमेव निर्वाहयति—

**पव्वज्जादी काउं, नेयव्वं ताव जा अवोच्छित्ती ।**
**पंच तुलेऊण य सो भत्तपरिण्णं परिणतो उ ॥ ४२०३॥**

[जी.भा.३२३,नी.भा.३८२२]

**प्रव्रज्यामादिं कृत्वा तावन्नेतव्यं यावदव्यवच्छित्तिः।** किमुक्तं भवति ? प्रथमतः प्रव्रज्या, तदनन्तरं ग्रहणाऽऽसेवनरूपां शिक्षाम्, ततः परं पञ्च महाव्रतानि, तदनन्तरमर्थग्रहणम्, ततोऽनियतो वासः, ततः परिपूर्णां गच्छस्य निष्पत्तिं कृत्वा, तदनन्तरं "तवेण सत्तेण सुत्तेण एगत्तेण बलेण य" [गा. ] इत्येवंरूपाभिः **पञ्च**भिस्तुलनाभिरात्मानं **तोलयित्वा स भक्तपरिज्ञां** प्रति **परिणतो** भवति।। ४२०३॥

**सपरक्कमे१ य अपरक्कमे२ य वाघाए आणुपुव्वीए ।**
**सुत्तऽत्थजाणएणं समाहिमरणं तु कायव्वं ॥ ४२०४॥** [नी.भा.३२४]

भक्तपरिज्ञारूपं नाम मरणं द्विधा— **सपराक्रमम्१ अपराक्रमं२** च, तत्र सपराक्रमं द्विविधम्—**व्याघातिमं१** निर्व्याघातं२ च । अपराक्रममपि द्विधा-व्याघातिमं१ निर्व्याघातं२

च। तत्र सपराक्रमे अपराक्रमे [च] एकैकस्मिन् व्याघाते कर्मणि घञ् प्रत्ययानयनाद् व्याघातिमे चशब्दान्निर्व्याघाते च समुपस्थिते **सूत्रार्थज्ञायकेन समाधिमरणं कर्त्तव्यम्**॥ ४२०४॥

एतदेव व्याचष्टे—

**भिक्ख-वियारसमत्थो, जो अण्णगणं च गंतु वाएइ।**
**एस सपरक्कमो खलु१,तव्विवरीतो भवे इयरो२॥ ४२०५॥** [जी.भा.३२५]

**यः** स्वस्य परस्य च निमित्तं **भिक्षायां विचारे** च गन्तुं **समर्थः**, यदि **चान्यगणं गत्वा वाचयति स** भक्तप्रत्याख्यानं प्रतिपित्सुः **सपराक्रमः**१। **तद्विपरीतः** भिक्षादावसमर्थो **भवति इतर** अपराक्रमः२। तद्गतं मरणमपि यथाक्रमं सपराक्रममपराक्रमं च ॥ ४२०५॥

**एक्केक्कयं च दुविहं, निव्वाघायं१ तहेव वाघायं२।**
**वाघातो वि य दुविहो, कालतियारो१ व इयरो२ वा[1] ॥ ४२०६॥**

[जी.भा.३२६]

१. जीतकल्प भाष्ये ३२७ गाथा इत्थं-सपरक्कमं तु तहियं णिव्वाघायं तहेव वाघातं। वोच्छामि समासेणं॥

तत् सपराक्रममपराक्रमं च मरण**मेकैकं द्विविधम्— निर्व्याघातं१ व्याघातं**२ च । तत्र व्याघातो नाम-यथा अच्छभल्लेन कर्णावोष्ठौ च खादितौ, अथवा रोगेण व्याघातः, ततो मरणं प्रतिपद्यते। निर्व्याघातं यथोक्तव्याघातरहितम्। **व्याघातोऽपि च द्विविधः कालातिचार इतरश्च।** कालमतिचरति- अतिक्रामतीति कालातिचारः कालसहः, यतश्चिरेण मरणम् , यथा पूतिगोनसेन दष्टस्य तं दष्टकालमतीत्य विंशतिरात्रिन्दिवादिषु मरणम्१। इतरः-कालानतिचारः, यत् तद्दिवसमेव-मर्तुकामो भक्तं प्रत्याचष्ट इति॥ ४२०६॥

**तं पुण अणुगंतव्वं, दारेहि इमेहिं आणुपुव्वीए।**
**गणनिसिरणादिएहिं, तेसि विभागं तु वोच्छामि॥ ४२०७॥** [जी.भा.३२८]

**तत् पुनः** निर्व्याघातिमं मरणम् **एभिः** वक्ष्यमाणै**र्गणनिसिरणादिभिर्द्वारैः आनुपूर्व्या** क्रमेणा**नुगन्तव्यम्। तेषां** च द्वाराणां **विभागं वक्ष्यामि** ॥ ४२०७ ॥

तमेव वक्तुकाम आह—

**गणनिसिरणा१ परगणे२, सिति३ संलेह४ अगीय५ असंविग्गे६।**
**एगा७ऽऽभोगण८अन्ने९, अणपुच्छ१० परिच्छ११ आलोए१२॥ ४२०८॥**

**ठाण-वसहीपसत्थे१३-१४, निज्जवगा१५ दव्वदायणा चरिमे१६ ।**
**हाणि१७ अपरितंत१८ निज्जर१९, संथारु२० व्वत्तणादीणि२१ ॥४२०९॥**

**सारेऊण य कवयं२२, निव्वाघाएण चिंधकरणं तु२३ ।**
**अंतो-बहि वाघाते, भत्तपरिण्णाए कायव्वो २४॥ ४२१०॥**

[ गा.भा. ३२९-३३१ ]

**गणात्**— स्वगणाद् **निस्सरणा** वक्तव्या१ । **परगणे** गमनम्२ । तथा **सितित्ति** द्रव्य-भावरूपा निःश्रेणिर्वक्तव्या३ तथा **संलेखः** संलेखना४। तथा **अगीतस्य** अगीतार्थस्य पार्श्वे न भक्तं प्रत्याख्यातव्यम्५। तथा **असंविग्गे** ति असंविग्नस्यापि समीपे न प्रत्याख्यातव्यम्६। तथा **एगत्ति** एको निर्यापको न कर्त्तव्यः किन्तु बहवः७। तथा स्वतः परतो वा भक्तं प्रत्याख्यातुकामस्य विषये **आभोगनं** कर्त्तव्यम्८। तथा **अन्यो** यदि भक्तं प्रत्याख्यातुमुद्यतस्तर्हि यदि निर्यापकाः पूर्यन्ते तदा स प्रतीष्यते, शेषकालं नेति ९। तथा आचार्येण गच्छस्या**नापृच्छया**

स भक्तप्रत्याख्यानं न प्रतिपादयितव्यः१०। तथा तेन भक्तं प्रत्याख्यातुकामेन गच्छस्य गच्छेनापि तस्य **परीक्षा** कर्त्तव्या ११॥ तथा भक्तपरिज्ञां प्रतिपत्तुकामेन नियमत **आलोचना** दातव्या १२ ॥ ४२०८॥

तथा **प्रशस्ते स्थाने** प्रशस्तायां **वसतौ** [च] भक्तपरिज्ञा प्रतिपत्तव्या १३-१४। तथा **निर्यापका** गुणसम्पन्नाः समर्पणीयाः १५। तथा **चरम**काले तस्य भक्तं प्रत्याख्यातुकामस्य **द्रव्यदर्शन** प्रधानसमस्ताहारद्रव्योपदर्शनं विधेयम् १६। **हाणि**त्ति भक्तं प्रत्याख्यातुकामस्य प्रतिदिवसमाहारस्य हानिर्विधेया १७ तथा **अपरितान्ताः** अपरिश्रान्ताः सर्वकर्मणि प्रतिचारका वर्त्तन्ते१८। **निज्जर**त्ति निर्जरा वक्तव्या १९। तथा **संस्तारको** यादृशो भवति कृतभक्तप्रत्याख्यानस्य कर्त्तव्यस्तादृशो वक्ष्यते २०। तथा तस्य कृतभक्तप्रत्याख्यान**स्योद्वर्त्तनादीनि** यथासमाधि करणीयानि २१। तथा प्रथम-द्वितीयपरीषहाभ्यां जितस्य **स्मारयित्वा** स्वं स्वरूपं माऽनर्थत्वादिलक्षणं (गीतार्थाऽगीतार्थादित्राणं) **कवचं** कवचभूतमशनं प्रयोक्तव्यम् २२। तथा जीवतो मृतस्य च तस्य **चिह्नकरणं** विधेयम् २३। एतद् **निर्व्याघातेन** भक्तपरिज्ञाव्याघाताभावेन प्रतिपत्तव्यम्। 'अथ' **अन्तर्ग्रामादिषु बहिः** उद्यानादिषु **भक्तपरिज्ञाया व्याघात**स्संज्ञातस्ततो गीतार्थानामुपायो

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



भवति **कर्त्तव्यः** २४ एष द्वारगाथात्रयसमासार्थः ॥ ४२०९ ॥ ४२१० ॥

साम्प्रतमेतदेव विविरीषुः प्रथमतो 'गणनिस्सरण'द्वारमाह—

**गणनिस्सरणम्मि विही, जो कप्पे वण्णितो उ सत्तविहो ।**
**सो चेव निरवसेसो, भत्तपरिण्णाए दसमम्मि**[1] ॥ दारं १ ॥ **४२११** ॥

[जी.भा.३३२]

**गणनिस्सरणे यो विधिः कल्पे** कल्पाध्ययने **सप्तविधः** सप्तप्रकारो **वर्णित स एव** व्यवहारे **दशमे** उद्देशके **भक्तपरिज्ञायां** भक्तपरिज्ञाधिकारे **निरवशेषो** वक्तव्यः ॥ ४२११ ॥

गणनिस्सरणद्वारं गतम् १। इदानीं 'परगण'द्वारम्। परगणे गत्वा भक्तप्रत्याख्यानं कर्त्तव्यम्—

**किं कारणऽवक्कमणं?, थेराण इहं तवोकिलंताणं।**
**अब्भुज्जयम्मि मरणे, कालुणिया झाणवाघातो** ॥ **४२१२** ॥ [जी.भा.३३४]

१. जीतकल्प भाष्ये ३३३ गाथा इत्थं-'णिसिरित्तु गणं वीरो गंतूण य परगणं तु सो सोहे। कुणति दढव्ववसाओ भत्तपरिण्णं परिणयो अ'॥



For Private And Personal

**किं कारणं** स्वगणाद**पक्रामणं** क्रियते? सूरिराह- **स्थविराणां** आचार्याणां संलेखनात**तपोभिः क्लान्तानाम्** इह स्वगणे **अभ्युद्यते** भक्तपरिज्ञालक्षणे **मरणे** समुपस्थितानां शिष्या आचार्यानुरागेण रोदन-क्रन्दनादीनि कुर्युः । रोदनादिकं च तेषामाकर्ण्य अश्रुप्रपातं च दृष्ट्वा तेषामुपरि **कारुण्य**मुपजायते। ततो **[ध्यान]व्याघातः**॥ ४२१२॥

अन्यच्च—

**सगणे आणाहाणी, अप्पत्तिय होइ एवमादीयं ।**
**परगणे गुरुकुलवासो, अप्पत्तियवज्जितो होइ ॥ ४२१३॥** [जी.भा.३३५]

यो गणधरः स्थापितस्तस्याऽऽज्ञां केचित् कुर्वन्ति केचिन्न कुर्वन्ति, तथा केषाञ्चिदुपकरण-निमित्तमप्रीतिः, आदिशब्दाद् गणभेदो बालादीनामुचिताद्यकरणदर्शनमित्यादिपरिग्रहः, तत एवं **स्वगणे आज्ञाहानिरप्रीतिरित्येवमादिकं** ध्यानव्याघातकारणमुपतिष्ठते ततः **परगणे** गत्वा भक्तप्रत्याख्यानं प्रतिपद्यते, यत एवं **गुरुकुलवास** आसेवितो भवति। किंविशिष्टः? इत्याह- **अप्रीतिवर्जितः** अप्रीतिश्च समस्ताऽपि परिहृता **भवतीति** भावः॥ ४२१३॥

अप्रीत्यादिकं यथा स्वगणे भवति तथा दर्शयति—

**उवगरण-गणनिमित्तं, तु वुग्गहं दिस्स वा वि गणभेयं ।**

**बालादी थेराण व, उचियाकरणम्मि वाघातो ॥ ४२१४॥** [जी.भा.३३६]

**उपकरणनिमित्तं** साधूनामाचार्ये कृतभक्तप्रत्याख्याने **व्युद्ग्रहः** कलहो भवति। अथवा तं गणधरं [केचिद् मन्यन्ते] केचिन्न मन्यते ततः स्वस्वपक्षपरिग्रहतो गणभेदः। तत एवमुपकरण-**निमित्तं व्युद्ग्रहणं गणनिमित्तं** गणच्छेदं [च] **दृष्ट्वा** उपलभ्य, तथा बालादीनां **बाल**-वृद्धा-ऽसह-ग्लानादीनां **स्थविराणां** वा **उचिताकरणे** उचितकरणादर्शने अप्रीतिरुपजायते, तया चाप्रीत्या ध्यान**व्याघातः** ॥ ४२१४॥

अयं च परगणे प्रतिपन्ने गुणः—

**सिणेहो पेलवो होइ, निग्गते उभयस्स वि।**

**आहच्च वावि वाघाते, नो सेहादिविउब्भमो ॥ ४२१५॥** दारं २॥

[जी.भा.३३७]

स्वगणा**न्निर्गते उभयस्यापि** गणस्याऽऽचार्यस्य च **स्नेहः** परस्परं **पेलवः** प्रतनु**र्भवति**। अन्यच्च **आहच्च** कदाचित् प्रथमपरिषहेण त्याजितस्य भक्तपरिज्ञायाः **व्याघातः** विलोपः स्यात्। तस्मिन् **व्याघाते न** स्वगण**शैक्षकादीनां व्युद्भ्रमः** विपरिणामो जायते व्याघातपरिज्ञानाभावात्, अन्यथा विपरिणामोऽपि स्यात्। तथाहि— स्वगणे स्थितं भग्नप्रतिज्ञं जानन्ति, ज्ञात्वा च 'सर्वा अपि प्रतिज्ञा एतेषामीदृश्य एव' इति विपरिणामं गत्वा संयमं लोपयन्ति २॥ ४२१५॥

सम्प्रति सितिद्वारमाह—

**दव्वसिती भावसिती, अणुओगधराण जेसिमुवलद्धा।**
**न हु उड्डगमण कज्जे, हेट्ठिल्लपयं पसंसंति॥ ४२१६॥**

**संजमठाणाणं कंडगाण लेसाण ठितिविसेसाणं।**
**उवरिल्लपयक्कमणं, भावसिती केवलं जाव** दारं ३॥ **४२१७॥**

[जी.भा.३३८-३४०]

**सिति**र्नाम ऊद्‌र्ध्वमधो वा गच्छतः सुखोत्तारावतारहेतुः काष्ठादिमयः पन्थाः । सा द्विधा—**द्रव्ये** भावे च । तत्र द्रव्ये सितिः-निःश्रेणिः, सा द्विधा उद्‌र्ध्वगमने अधोगमने च । तत्र ययाऽधस्ताद् भूमिगृहादिष्ववतीर्यते सा अधोगमने १ यया तूपरिमाले आरुह्यते सा उद्‌र्ध्वगमने २ **भावसीति**रपि द्विधा—प्रशस्ता अप्रशस्ता च। तत्र यैर्हेतुभिः **संयमस्थानानां** संयम**कण्डकानां लेश्या**परिणाम-विशेषाणां **स्थितिविशेषाणां** अधस्तात् संयमस्थानेष्वभिगच्छति सा अप्रशस्ता भावसितिः१ । यैः पुनर्हेतुभिस्तेषामेव संयमादिस्थानानामुपरितनेषूपरितनेषु विशेषेष्वध्यारोहति सा प्रशस्ता २। **उच्चोपरितनपदक्रमणं** भावसीत्या तावद् द्रष्टव्यं **यावत् केवलज्ञान**म्। तत्र **येषामनुयोग-धराणा**माचार्याणामेवं द्रव्ये भावे च सिति**रुपलब्धा** भवति ते **न हु** नैव **उद्‌र्ध्वगमने कार्ये** कर्त्तव्ये **अधस्तनपदं प्रशंसन्ति,** नाशुभपदगमनाय अशुभाध्यवसायप्रवृत्तिमातन्वते, किन्तु शुभेष्वध्यवसायेष्वारोहन्ति ॥ ४२१६ ॥ ४२१७ ॥

गतं सितिद्वारम् ३। 'संलेखनाद्वार'माह—

**उक्कोसा य जहन्ना, दुविहा संलेहणा समासेण।**
**छम्मासा उ जहन्ना, उक्कोसा बारससमा उ॥ ४२१८॥** [तुला.जी.भा.३४१]

**संलेखना समासेन द्विविधा** प्रज्ञप्ता। तद्यथा— **उत्कृष्टा जघन्या च**। चशब्दाद् मध्यमा च। तत्र **जघन्या षण्मासा। उत्कृष्टा द्वादशसमा** द्वादशवर्षा ॥ ४२१८॥

**चिट्ठउ ताव जहन्ना, उक्कोसं ताव तत्थ वोच्छामि।**
**जं संलिहिऊण मुणी, साहेंती अत्तणो अट्ठं ॥ ४२१९॥** [जी.भा.३४२]

'तत्र' तयोर्जघन्योत्कृष्टयोर्मध्ये **जघन्या तावत् तिष्ठतु** पश्चाद् वक्ष्यमाणत्वात्। उत्कृष्टां **तावद् वक्ष्यामि**। यदित्यव्ययं, यया **मुनय** आत्मानं **संलिख्याऽऽत्मनोऽर्थं साधयन्ति**॥४२१९॥

तामेवाह—

**चत्तारि विचित्ताइं, विगतीनिज्जूहियाइं चत्तारि।**
**एगंतरमायामे, णातिविगिट्ठे विगिट्ठे य॥ ४२२०॥**



**चत्वारि** वर्षाणि **विचित्राणि** विचित्रतपांसि करोति । किमुक्तं भवति?— चत्वारि वर्षाणि यावत् कदाचिच्चतुर्थम्, कदाचित् षष्ठम्, कदाचिदष्टमम् एवं दशम-द्वादशादीन्यपि

करोति, कृत्वा च पारणकं सर्वकामगुणितेनाऽऽहारेण पारयति। ततः परमन्यानि **चत्वारि** वर्षाण्युक्तप्रकारेण विचित्रतपांसि करोति, परं **विकृतिनिर्यूहितानि** । किमुक्तं भवति? विचित्रं तपः कृत्वा पारणके निर्विकृतिकम्, भुक्तौ उत्कृष्टरसवर्जं च । ततः परतोऽन्ये द्वे वर्षे **एकान्तरमायामेन** करोति एकान्तरं चतुर्थं कृत्वा आयामेन पारयति। एवमेतानि दश वर्षाणि गतानि। एकादशस्य वर्षस्याऽऽदिमान् षण्मासान् **नातिविकृष्टं** तपः कृत्वा आयामेन परिमितं भुङ्क्ते । नातिविकृष्टं नाम तपश्चतुर्थं षष्ठं वाऽवगन्तव्यम्। ततः परमन्यान् षण्मासान् **विकृष्टं** तपः कृत्वा 'मा शीघ्रमेव मरणं यायासम्' इति कृत्वा पारणके परिपूर्णध्राण्याऽऽयामं करोति। विकृष्टं नाम अष्टम-दशमा-दिकम् ॥४२२०॥

साम्प्रतमेतदेव व्याचिख्यासुराह—

**संवच्छराणि चउरो, होति विचित्तं चउत्थमादीयं।**
**काऊण सव्वगुणियं, पारेई उग्गमविसुद्धं ॥ ४२२१॥** [जी.भा.३४४]

**आदिमानि चत्वारि संवत्सराणि विचित्रं** तपश्चतुर्थादिकं **भवति,** तच्च **कृत्वा पारयति** भुङ्क्ते **सर्वगुणितं** सर्वकामगुणितमाहारमुद्गमविशुद्धम्॥ ४२२१॥

**पुणरवि चउरण्णे ऊ, विचित्त काऊण विगतिवज्जं तु।**
**पारेइ सो महप्पा, निद्धं पणियं च वज्जेइ॥ ४२२२॥** [जी.भा.३४५]

**पुनरप्यन्यानि चत्वारि** वर्षाणि **विचित्रं** तपः **कृत्वा** स महात्मा **विकृतिवर्जं पारयति।** तत्रापि **स्निग्धं प्रणीतं** चोत्कृष्टरसं **वर्जयति**॥ ४२२२॥

**अन्नातो दोन्नि समा, चउत्थ काऊण पारे आयामं ।**
**कंजीएणं तु ततो, अन्नेक्कसमं इमं कुणइ॥ ४२२३॥** [जी.भा.३४६]

**अन्ये द्वे समे** वर्षे **चतुर्थं कृत्वा आयामं पारयति।** एवं दश वर्षाणि गतानि। **ततः परमन्यामेकां समां** वर्षम् **इमां** वक्ष्यमाणां **काञ्जिकेन** आयामपारणकेन **करोति** ॥ ४२२३॥

कथम्? इत्याह—

**तत्थेक्कं छम्मासं, चउत्थ छट्ठं तु काउ पारेति।**
**आयंबिलेण नियमा, बिइए छम्मासिए विगिट्ठं ॥ ४२२४ ॥**

**अट्ठम दसम दुवालस, काऊणाऽऽयंबिलेण पारेइ।**
**अन्नेक्कहायणं तू, कोडीसहियं तु काऊणं[१] ॥ ४२२५॥** [जी.भा.३४७-८]

**तत्र** एकादशे वर्षे **एकम्** आद्यं **षण्मासं** यावत् चतुर्थं षष्ठं वा **कृत्वा नियमादायामेन पारयति। द्वितीये षण्मासे विकृष्टमष्टमं दशमं द्वादशं वा कृत्वा आयामाम्लेन पारयति।** एवमेकादश वर्षाणि गतानि। **अन्यम् एकं द्वादशं हायनं कोटीसहितं कृत्वा** ॥ ४२२४॥ ४२२५॥

किम्? इत्याह—

**आयंबिल [२]उसुणोदेण, परिहावंतो उ आणुपुव्वीए।**
**जह दीवे तेल्लवत्तीखतो समं तह सरीराऽऽउं[३] ॥ ४२२६॥** [जी.भा.३५०]

**आयामे च उष्णोदकेन** पारयति। अयमत्र सम्प्रदायः-द्वादशे वर्षे कोटीसहितं प्रत्याख्यानं

१. इतोऽग्रे जीतकल्प भाष्ये ३४९ गाथा इत्थम्- 'आयाम चउत्थादी काऊण अपारिए पुणो अण्णं। जं कुणयाऽऽयामादी तं भण्णति कोडिसहितं तु॥' २. उसिणोएण-जी.भा॥ ३. इतोऽग्रे जीतकल्प भाष्ये ३५९ गाथा इत्थम्- 'बारसम्मिय वरिसे जे मासा उवरिमा उ चत्तारि। पारणए तेसिं तू एक्कतरतं इमं धारे'॥

चतुर्थादिविषयं कृत्वा प्रथमं पारणकमायामेनोष्णोदकेन करोति, द्वितीयं पारणकं निर्विकृतिकेन, तृतीयं पुनरायामेन यथोक्तरूपेण,चतुर्थं निर्विकृतिकेन, एवमेकान्तरितं पारणकेष्वायामं करोति। कोटीसहितं-नाम प्रथमदिवसे अभक्तार्थः कृतः, द्वितीयेऽपि दिवसे पुनरभक्तार्थं कृत्वा पारयति, एतच्चतुर्थकोटीसहितं प्रत्याख्यानम्। एवं षष्ठाऽष्टमादिकोटीसहितान्यपि भावनीयानि। अथवाऽयमन्यो द्वितीयः प्रकारः- एकस्मिन् दिने चतुर्थं कृत्वा द्वितीये दिवसे पारयति, तृतीयदिवसे पुनश्चतुर्थं करोति, चतुर्थे दिवसे पारयति, एतच्चतुर्थकोटीसहितम्। षष्ठकोटीसहितमेवम्— षष्ठं कृत्वा पारयति, पुनः षष्ठं करोति ततः पारयति। एवमष्टमादिकोटीसहितान्यपि भावनीयानि। **[परि]हावेंतो आणुपुव्वीए** इति, तस्मिन् द्वादशे वर्षे पारणकेषु यथाक्रममेकैकं कवलं हापयन् पारयति यावदेकं कवलम्। ततः शेषेषु पारणकेषु क्रमश एकेन सिक्थेनोनमेकं कवलमाहारयति, द्वाभ्यां सिक्थाभ्याम्, त्रिभिः सिक्थैः,एवं यावदन्ते एकसिक्थमाहारयति। कस्मादेवं करोति? इति चेद् अत आह— **यथा दीपे सममेककालं तैल-वर्त्तिक्षयो** भवति **तथा शरीराऽऽयुषोः** समकं क्षयः स्यादिति हेतोः ॥ ४२२६॥

**पच्छिल्लहायणे तू, चउरो धारेत्तु तेल्लगंडूसं ।**
**निसिरेज्ज खेलमल्ले, किं कारण? गल्लधरणं तु॥ ४२२७॥**

[तुला-जी.भा.३५२]

**लुक्खत्ता मुहजंतं, मा हु खुभेज्जत्ति तेण धारेति।**
**मा हु नमोक्कारस्सा, अपच्चलो सो हविज्जाहि॥ ४२२८॥** [जी.भा.३५३]

तस्मिन् **पश्चिमे** द्वादशे **हायने** ये अन्तिमाश्चत्वारो मासास्तेष्वेकैकस्मिन् पारणके एकान्तरितं **तैलगण्डुषं** चिरकालं धारयति, **धारयित्वा** खेलमल्लके सक्षारे **निसृजति** त्यजति, ततो वदनं प्रक्षालयति। **किं कारणं गल्ले** गण्डूषस्य **धारणं** क्रियते? उच्यते— **मा मुखयन्त्रं रूक्षत्वाद्** वातेन **क्षुभ्येत** एकत्र सम्पिण्डीभूयात्। तथा च सति **मा स नमस्कारस्य** भणने **अप्रत्यलः** असमर्थो **भवेदिति** हेतोर्गल्ले तैलधारणं करोति ॥ ४२२७॥ ४२२८॥

**उक्कोसगा उ एसा, संलेहा मज्झिमा जहण्णा य ।**
**संवच्छर छम्मासा, एमेव य मास-पक्खेहिं॥ ४२२९॥** [जी.भा.३५४]

**एषा** अनन्तरोदिता **संलेखा** संलेखना **उत्कृष्टा** भणिता। **मध्यमा** संलेखना **संवत्सर**प्रमाणा

एवं प्रागुक्तेन प्रकारेण द्वादशभिर्मासैः परिभावनीया। **जघन्या षण्मासा** द्वादशभिः पक्षैः, वर्षस्थाने **मासान् पक्षांश्च** स्थापयित्वा तपोविधिः प्रागिव निरवशेष उभयत्रापि भावनीय इति भावः ॥ ४२२९ ॥

**एत्तो एगतरेणं, संलेहेणं खवेत्तु अप्पाणं।**
**कुज्जा भत्तपरिण्णं, इंगिणि पातोवगमणं वा ॥ ४२३० ॥** दारं ४॥

[जी.भा.३५५]

**एतेषामुत्कृष्ट**-मध्यम-जघन्यानां संलेखनाना**मेकतरेण संलेखेनाऽऽत्मानं क्षपयित्वा कुर्यात् भक्तपरिज्ञामिङ्गिनीमरणं पादपोपगमनं वा** ॥ ॥ गतं संलेखनाद्वारम् ॥ ४२३० ॥

अधुना 'अगीतद्वार'माह—

**अग्गीयसगासम्मी, भत्तपरिण्णं तु जो करेज्जाहि ।**
**चउगुरुगा तस्स भवे, किं कारण? जेणिमे दोसा ॥ ४२३१ ॥** [जी.भा.३५६]

**अगीतार्थस्य समीपे** भक्तं न प्रत्याख्यातव्यम् । **यस्तु** 'अगीतस्य' अगीतार्थस्य 'सकाशे'

समीपे **भक्तपरिज्ञां** भक्तप्रत्याख्यानं **करोति तस्य** प्रायश्चित्तं **चत्वारो गुरुकाः। किं कारणम्**? उच्यते— **येन** कारणेन '**इमे**' वक्ष्यमाणा **दोषास्तेन** कारणेन ॥ ४२३१ ॥

तत्र तानेव दोषानाह—

**नासेती अग्गीतो, चउरंगं सव्वलोयसारंगं ।**
**नट्ठम्मि य चउरंगे, न हु सुलहं होति चउरंगं ॥ ४२३२ ॥**

[जी.भा.३५७, नि.भा.३८२६]

**अगीतः** अगीतार्थो निर्यापकस्तस्य कृतभक्तप्रत्याख्यानस्य **चतुरङ्गं** चतुर्णामङ्गानां समाहारश्चतुरङ्गं वक्ष्यमाणम्। कथम्भूतम्? इत्याह—**सर्वलोकसाराङ्गं** अङ्गं वरं प्रधानमित्यनर्थान्तरम् , सर्वेषामपि-त्रयाणामपि लोकानां यानि अङ्गानि तेषां सारम्-अतिविशिष्टमङ्गं प्रधानं सर्वलोकसाराङ्गम् [ **नाशयति** ]। **नष्टे च चतुरङ्गे न पुनः सुलभं** सुप्रापं **भवति चतुरङ्गम्**, किन्तु चुल्लकादिदृष्टान्तैरतिशयेन दुष्प्रापम्, ततोऽगीतार्थसमीपे भक्तं न प्रत्याख्येयम् ॥ ४२३२ ॥

**किं पुण तं चउरंगं, जं नट्ठं दुल्लभं पुणो होति ?।**

**माणुस्सं१ धम्मसुती२, सद्धा३ तव-संजमे विरियं४ ॥ ४२३३ ॥** [जी.भा.३५८]

**किं पुनस्तच्चतुरङ्गं यन्नष्टं** सत् **पुनर्दुर्लभं भवति**? सूरिराह- **मानुष्यं** मानुषत्वं **धर्मश्रुतिः** धर्मश्रवणं **श्रद्धा तपसि संयमे** च **वीर्यमिति** ॥ ४२३३ ॥

**किह नासेति अगीतो ?, पढम-बितिएहि अद्दितो सो उ।**

**ओहासे कालियाए, तो निद्धम्मो त्ति छड्डेज्जा ॥ ४२३४ ॥** [जी.भा.३५९]

**कथं** केन प्रकारेण सोऽगीतार्थस्तस्य चतुरङ्गं **नाशयति**? सूरिराह **प्रथम-द्वितीयाभ्यां** क्षुत्पिपासालक्षणाभ्यां परिषहाभ्याम्, **अर्दितः** पीडितः **स** भक्तप्रत्याख्याता कदाचित् **कालिकायां** रात्रौ भक्तं पानं च **अवभाषे**त याचेत, ततः सोऽगीतार्थो न कल्पते इति कृत्वा न दद्यात्, चिन्तयति च भक्तं प्रत्याख्याय पुनर्याचते भक्तम्, तत्रापि रात्रौ, **तत** एष **निर्द्धर्मा** असंयतीभूत इति कृत्वा तं **त्यजेत्** त्यक्त्वा गच्छेत् ॥ ४२३४॥

**अंतो वा बाहिं वा, दिया व रातो व सो विवित्तो उ ।**

**अट्टदुहट्टवसट्टो, पडिगमणादीणि कुज्जाहि॥ ४२३५॥** [जी.भा.३६०]

**अन्तः** उपाश्रयस्य यदि **वा बहिः** उपाश्रयाद् **दिवा वा रात्रौ वा** तेनागीतार्थेन **विविक्तः** परित्यक्तः सन् **आर्त्तदुःखार्त्तवशार्त्तः स प्रतिगमनादीनि** प्रतिगमनं नाम-प्रतिभञ्जनं व्रतमोक्षण-मित्यर्थः, आदिशब्दाद् मृत्वा कुगतिविनिपातान् वा **कुर्यात्**॥ ४२३५॥

तत्र कुगतिविनिपातानेवाह—

**मरिउणऽट्टज्झाणो, गच्छे तिरिएसु वणयरेसुं वा।**

**संभरिऊण य रुट्ठो, पडिणीयत्तं करेज्जाहि ॥ ४२३६॥** [जी.भा.३६१]

**स आर्त्तध्यानो मृत्वा तिर्यक्षु वा** तिर्यग्योनिषु **गच्छेत्,** यदि वा **वनचरेषु** वाणमन्तरेषु मध्ये समुत्पद्य तत्र च जातिं **स्मृत्वा** 'त्यक्तोऽहं तस्यामवस्थायामिति' **रुष्टस्सन्** बहुविधं **प्रत्यनीकत्वं कुर्यात्**॥ ४२३६॥

**अहवा वि सव्वरीए, मोयं दिज्जाहि जायमाणस्स।**

**सो दंडियादि होज्जा, रुट्ठो साहे निवादीणं ॥ ४२३७॥**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**कुज्जा कुलादिपत्थारं, सो वा रुट्ठो उ गच्छे मिच्छत्तं ।**

**तप्पच्चयं च दीहं, भमेज्ज संसारकंतारं ॥ ४२३८ ॥** [जी.भा.३६२-३]

**अथवा शर्वर्यां** पानीयं **याचमानस्य** रात्रौ पानीयं नास्ति इति **मोकं** प्रश्रवणं सोऽगीतार्थो **दद्यात् स** च **दण्डिकादिः** दण्डिकादीनां सम्बन्धी निष्क्रान्तः स्यात् , ततः स धातुवैषम्येण **रुष्टः** सन् अवधावेत्,अवधाव्य च **नृपादीनां कथयेत्** , तत प्रवचनस्य महानुड्डाहः, यदि वा स राजादिस्तत्पक्षपतितः ततः **सोऽ**पि वा स्वयं **रुष्टः कुलादिप्रस्तारं** कुलस्य गणस्य वा विनाशं कुर्यात्। यद्यपि च एवमादयो दोषा न भवन्ति तथा[ऽपि] प्रथम-द्वितीयपरीषहाभ्यां परितप्यमानोऽसमाधिना मृतो दुष्करमपि कृत्वाऽन्तक्रियां कल्पविमानोपपत्तिं वा न प्राप्नुयात्, किन्तु वानमन्तरादिषूपपद्यते। यदि वा कषायपीडितो दृष्टिविषः सर्पो जायेत। **गच्छे मिच्छत्तं** इति इहभवे परभवे वा **मिथ्यात्वं गच्छेत्** , **तत्प्रत्ययं च दीर्घं संसारकान्तारं भ्रमेत्** ॥ ४२३७ ॥ ४२३८ ॥



For Private And Personal

**सो उ विविंचिय दिट्ठो, संविग्गेहिं तु अन्नसाहूहिं।**
**आसासियमणुसिट्ठो, मरणजढ पुणो वि पडिवण्णं॥ ४२३९॥**

[जी.भा.३६४]

**सः** प्रत्याख्यातभक्तो भक्तं याचमानोऽगीतार्थैः साधुभिः **विविक्तः** परित्यक्तोऽ**न्यैः** संविग्नैः गीतार्थैः **साधुभिर्दृष्टस्ततस्तैराश्वासितः, आश्वास्य च अनुशिष्टः** अतिशयेन दूरमुत्साहितः, ततो यद् अभ्युद्यत**मरणं त्यक्तं** तत् **पुनरपि** तेन **प्रतिपन्नम्,** ततः सुगतिभागी जातः॥ ४२३९॥

**एए अन्ने य तहिं, बहवे दोसा य पच्चवाया य।**
**एएहिं कारणेहिं, अगीयत्थ न कप्पति परिन्ना॥ ४२४०॥** [जी.भा.३६५]

यस्माद् **एते** अनन्तरोदिताः **अन्ये** वा अनुक्ता **बहवो दोषाः प्रत्यवायाश्चा**गीतार्थस्य समीपे भक्तपरिज्ञाप्रतिपत्तौ । तस्मादे**तैः कारणैरगीतार्थस्य** समीपे **परिज्ञा** भक्तपरिज्ञा **न कल्पते**। संविग्नगीतार्थानां च समीपे बहवो गुणास्तस्मात् तन्मार्गणा कर्त्तव्या ॥ ४२४०॥

सा च द्विधा— क्षेत्रतः कालतश्च । तत्र क्षेत्रत आह–

**पंच व छ व सत्त सए, अहवा एत्तो वि सातिरेगतरे।**

**[1]गीयत्थपायमूलं, परिमग्गिज्जा अपरितंतो ॥ ४२४१ ॥** [जी.भा.३६६]

**पञ्च षट् सप्त** वा योजनशतानि, **अथवा इतोऽपि सातिरेकतराणि** योजनशतानि गत्वा **संविग्नपादमूलम् अपरितान्तः** अनिर्वृतो **मृगयेत** ॥ ४२४१ ॥

उक्ता क्षेत्रतो मार्गणा। कालत आह—

**एक्कं व दो व तिन्नि व, उक्कोसं बारसेव वासाणि।**

**गीयत्थपायमूलं, परिमग्गिज्जा अपरितंतो॥ ४२४२ ॥**

[जी.भा.३६७, नी.भा. ३८३१]

**एकं द्वे त्रीणि वा उत्कर्षतो द्वादश वर्षाणि यावद् अपरितान्तः** अनिर्विण्णो **गीतार्थपादमूलं परिमृगयेत** ॥ ४२४२ ॥

---

१. अग्रे ४२४९ गाथायां संविग्गपाय° इति पाठः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**गीयत्थदुल्लभं खलु, कालं तु पडुच्च मग्गणा एसा ।**
**ते खलु गवेसमाणा, खेत्ते काले य परिमाणं ॥ ४२४३॥**

[जी.भा.३६८, नी.भा.३८३२]

गीतार्थो दुर्लभो यस्मिन् काले तं **गीतार्थदुर्लभं कालं प्रतीत्य** आश्रित्य **एषा** अनन्तरोदिता क्षेत्रतः कालतश्च **मार्गणा**ऽभिहिता। **ते खलु** गीतार्थं **गवेषयन्तः क्षेत्र**विषये **काल**विषये **च परिमाण**मुत्कृष्टमेतावत् कुर्वन्ति ॥ ४२४३ ॥

**तम्हा गीयत्थेणं, पवयणगहियत्थसव्वसारेणं।**
**निज्जवगेण समाही, कायव्वा उत्तमट्ठम्मि ॥४२४४॥** दारं ५॥

[जी.भा.३६९,नि.भा.३८३३]

यस्मात् क्षेत्रतः कालतश्च गीतार्थमार्गणायामेतावानादरः कृतस्**तस्मात्** तेन **गीतार्थेन प्रवचन-गृहीतार्थसर्वसारेण** प्रवचनस्य गृहीतोऽर्थस्य सर्वसारो येन स तथा तेन **निर्यापकेन उत्तमार्थे** व्यवस्थितस्य **समाधिः कर्त्तव्या** ॥ ४२४४॥



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



गतमगीतार्थद्वारम् ५। 'असंविग्नद्वार'माह—

**असंविग्गसमीवे वी, पडिवज्जंतस्स होंति गुरुगा उ।**
**किं कारणं तु ? तहियं, जम्हा दोसा हवंति इमे॥ ४२४५ ॥** [जी.भा.३७०]

**असंविग्नसमीपेऽपि** भक्तपरिज्ञां **प्रतिपद्यमानस्य भवन्ति** चत्वारो **गुरुकाः** प्रायश्चित्तम्। **किं कारणम्? तत्र यस्माद् इमे** वक्ष्यमाणा **दोषा भवन्ति** ॥ ४२४५ ॥

तानेवाह—

**नासेति असंविग्गो, चउरंगं सव्वलोयसारंगं ।**
**नट्ठम्मि य चउरंगे, न हु सुलभं होति चउरंगं॥ ४२४६ ॥**

[जी.भा.३७१,नि.भा.३८३४]



**नाशयत्यसंविग्नः चतुरङ्गं** मानुषत्वादिरूपं **सर्वलोकसाराङ्गं** सर्वलोकप्रधानतरम्। **नष्टे च चतुरङ्गे न हु** नैव **सुलभं** सुप्रापं **भवति चतुरङ्गम्** ॥ ४२४६ ॥

For Private And Personal

कथं नाशयति? इत्यत आह–

**आहाकम्मिय पाणग, पुप्फा सीया य बहुजणे णायं ।**
**सेज्जा संथारो वि य, उवही वि य होति अविसुद्धो ॥ ४२४७॥**

[जी.भा.३७२,नि.भा.३८३५]

असंविग्नो **बहुजनस्य** यथा तथा वा **ज्ञातं** करोति, यथा एष कृतभक्तप्रत्याख्यानः। ततः स **आधाकर्मिकं पानक**मानयति, **पुष्पाणि** वा ढौकयति, [**सीया** शिबिकां वाऽऽनयति] सेचनं च चन्दनादिना करोति, तथा **शय्या संस्तारक उपधिश्च** तेनाऽऽनीतो**ऽविशुद्धो भवति** ॥ ४२४७ ॥

**एते अन्ने य तहिं, बहवे दोसा य पच्चवाया य ।**
**एएण कारणेणं, असंविग्गे न कप्पति परिण्णा ॥ ४२४८॥**

[जी.भा.३७३,नि.भा.३८३६]

एते अनन्तरोदिता **अन्ये** च अनुक्ता **बहवो दोषाः प्रत्यवायाश्च**, तत्र प्रत्यवायाः

प्रागिवासमाधि-मरणतो वानमन्तरेषूत्पादतो नृपादिकथनतो वा वेदितव्याः । **एतेन कारणेन असंविग्ने** असंविग्नस्य समीपे **परिज्ञा** भक्तपरिज्ञा **न कल्पते,** किन्तु संविग्नस्यान्तिके ।। ४२४८ ॥

ततः क्षेत्रतः कालतश्च तन्मार्गणामाह—

**पंच व छ व सत्त सए, अहवा एत्तो वि सातिरेगतरे ।**
**संविग्गपायमूलं, परिमग्गिज्जा अपरितंतो ॥ ४२४९ ॥**

[जी.भा.३७४,नि.भा.३८३७]

इयं क्षेत्रतः।। ४२४९ ॥ कालत आह-

**एक्कं व दो व तिन्नि व, उक्कोसं बारसेव वासाणि।**
**संविग्गपायमूलं, परिमग्गिज्जा अपरितंतो ॥ ४२५० ॥**
**संविग्गदुल्लभं खलु कालं तु पडुच्च मग्गणा एसा ।**
**ते खलु गवेसमाणा खेत्ते काले य परिमाणं॥ ४२५१ ॥**

[जी.भा.३७५-६,नि.भा.३८३८-९]

यस्मादेवं क्षेत्रतः कालतश्च तन्मार्गणायामादरः कृतः-

**तम्हा संविग्गेणं, पवयणगहियत्थसव्वसारेणं ।**
**निज्जवगेण समाही, कायव्वा उत्तमट्ठम्मि ॥ ४२५२॥** दारं ६॥

[जी.भा.३७७,नि.भा.३८४०]

गाथाचतुष्टयमपि प्राग्वत् ॥ ४२४९-४२५२॥ गतमसंविग्नद्वारम् ६। इदानीं 'मेकद्वारम्'— एको निर्यापको न कर्त्तव्यः, किन्तु बहवः, अन्यथा विराधनादोषप्रसङ्गः। तमेवोपदर्शयति-

गाथा ४२४९-४२५५ एकनिर्यापके दोषाः

**एक्कम्मि उ निज्जवगे, विराहणा होइ कज्जहाणी य ।**
**सो सेहा वि य चत्ता, पावयणं चेव उड्डाहो[1] ॥ ४२५३॥** [जी.भा.३७८]

---

१. निशीथभाष्ये ३८४१ गाथा इत्थं- 'एते उ कज्जहाणी सो वा सेहा य पवयणं चत्तं। तच्चणिए निमित्ते चत्तो चत्तो य उड्डाहो॥'



For Private And Personal

**एकस्मिन् निर्यापके** संयम**विराधना** आत्मविराधना च **भवति** । तथाहि— कृतभक्त-प्रत्याख्याननिमित्तं पानकग्रहणायाटन् यदा क्वापि न लभते तदा 'मा भूत् पश्चाद् ग्लानस्यासमाधिः' इत्याधाकर्मिकमपि पानकं गृह्णीयादिति संयमविराधना। निरन्तरमेकस्य क्लिश्यमानस्याऽऽत्म-विराधना, तथा **कार्यहानिश्च** भवति । तथाहि— मरणसमये समाध्युत्पादनाय सोऽपेक्ष्यते, स च कदाचित् तत्समये पानकादिनिमित्तमन्यत्र गतो भवेत् , तथा च **स** भक्तप्रत्याख्याता त्यक्तः, **शैक्षा अपि च त्यक्ताः**, **प्रवचनं** त्यक्तम्, **उड्डाह**श्चोपजायते ॥ ४२५३ ॥

एतद्विभावनार्थमाह—

**तस्सऽड्डुगतोहासण[१], सेहादि अदाणे सो य परिचत्तो।**
**दाउं व अदाउं वा, भवंति सेहा व निद्धम्मा ॥ ४२५४॥**

[जी.भा.३७९,नि.भा.३८४२]

**तस्य** प्रत्याख्यातभक्तस्या**ऽर्थाय** पानकादीनां मार्गणाय **गतो** निर्यापकः,तस्य समीपे



---

१. भासण- ला.जी.भा. ॥

शैक्षकोऽपरिणतो वा मुक्तः, तस्य समीपे तेन **ओहासण** इति भक्तं याचितम् , ते च **शैक्षकादयो** 'न कल्पते एतस्य भक्तम्, कृतप्रत्याख्यानत्वाद्' इति न ददति। **अदाने** च सोऽसमाधिना मरणं प्राप्नुयादिति स **परित्यक्तः**। ते च **शैक्षा दत्त्वा अदत्त्वा वा निर्द्धर्माणो भवन्ति** । तथाहि तेषामेवं चित्तमुपजायते, यथा-स्थापनामात्रं प्रत्याख्यानम्, यथा चैतदेवम्, एवं हिंसादिप्रत्याख्यानान्यपि, ततः कल्पन्ते हिंसादयोऽपि इति निर्द्धर्माणो जायन्ते ॥ ४२५४॥

**कूयइ अदिज्जमाणे, मारेंति बल त्ति पवयणं चत्तं ।**
**सेहा य जं पडिगया, जणे अवण्णं पयासंति॥ ४२५५।।** दारं ७॥

[जी.भा.३८०,नि.भा.३८४३]

तैः शैक्षकै**रदीयमाने** भक्ते स महता शब्देन **कूजति**, यथा मामेते **बलान्मारयन्ति**। 'इति' एवमुक्तेन प्रकारेण **प्रवचनं त्यक्तम्**, तथा **शैक्षा** ये **प्रतिगताः** प्रतिभग्नाः सन्तो **जने** अवर्णं **प्रकाशयन्ति** एष उड्डाहः ॥ ४२५५॥

गतमेकद्वारम् ७। 'आभोगनद्वार'माह—

**परतो सयं व नच्चा, पारगमिच्छंति अपारगे गुरुगा ।**
**असती खेम-सुभिक्खे, निव्वाघातेण पडिवत्ती ॥ ४२५६ ॥**

[जी.भा.३७३,नि.भा.३८४४]

भक्तं प्रत्याख्यातुकामः कोऽपि समागतः, तत आचार्येणाऽऽभोगः कर्त्तव्यः— यावदेतस्य भक्तप्रत्याख्यानं समाप्तिमुपयाति तावदशिवाद्युपद्रवो नगरादीनां चोत्थानं भविष्यति? किं वा न? इति। तच्च कथं ज्ञातव्यम्? उच्यते- स्वयं आचार्यस्यातिशयोऽस्ति तेन ज्ञातव्यम्, यदि वा निमित्तमाभोगनीयम्, अथवा स्वयं देवता कथयति, यथा-''कंचण''[गा.४५२] इत्यादि। अथ स्वतोऽतिशयो निमित्तं वा नास्ति तर्हि येषां ते स्तस्ते प्रष्टव्याः। एवं **स्वतः परतो वा** अशिवादीनां नगरोत्थानादीनां वा भावमवबुध्य पुनरिदं ज्ञातव्यम्— किमेष प्रत्याख्यानस्य पारगो भविष्यति? किं वा न? इति। तत्र यदि पारग इति ज्ञायते ततस्तं **पारगमिच्छन्ति**। अथापारगः, नेच्छन्ति। तथा **अपारगे** इष्यमाणे प्रायश्चित्तं चत्वारो **गुरुकाः**। अथ स्वस्य परस्य वाऽतिशयादिर्न विद्यते ततः **असति** अविद्यमाने आभोगे यदि **क्षेमं सुभिक्षं** तदा **निर्व्याघातेन प्रतिपत्तिः** कारयितव्या, वर्षारात्रे प्रतिपत्तिः कार्यत इत्यर्थः॥ ४२५६ ॥

एतदेवाह–

**सयं चेव चिरं वासो, वासावासे तवस्सिणं ।**
**तेण तस्स विसेसेण, वासासु पडिवज्जणा ॥ ४२५७॥**

[जी.भा.३८४,नि.भा.३८४५]

वर्षारात्रे वर्षोदक-कर्दमादिकारणतश्चतुरः पञ्च षड् वा मासान् ग्रामादीनाम् उत्थानं न भवति, क्षेमं सुभिक्षं च स्वभावतो वर्त्तते, **तपस्विनां** च **वर्षावासे चिरं वासः स्वयमेव** प्रवृत्तः, **तेन** कारणेन **तस्य** भक्तं प्रत्याख्यातुकामस्य **विशेषतो [ वर्षासु ]** भक्तप्रत्याख्यान-**प्रतिपादना** कर्त्तव्या ॥ ४२५७॥

पूर्वमिदमुक्तं 'स्वयं वा देवता कथयति' तत्र निदर्शनमाह—

**कंचणपुर गुरु सन्ना, देवयरुवणा य पुच्छ कहणा य।**
**पारणग खीर रुहिरं, आमंतण संघनासणया ॥ ४२५८॥**

[जी.भा.३८२,नि.भा.३८४६]

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



कलिङ्गेषु जनपदेषु **काञ्चनपुरे** नगरे बहुश्रुता बहुशिष्यपरिवाराः केचिदाचार्या विहरन्ति। तेऽन्यदा शिष्येभ्यः सूत्रपौरुषीमर्थपौरुषीं च दत्त्वा **संज्ञाभूमौ** गताः। तत्र पथि गच्छन्तोऽपान्तरालेऽतिशयेन महतः पादपस्याधः काञ्चिद् **देवतां** स्त्रीरूपेण **रुदन्तीं** पश्यन्ति। एवं द्वितीयदिनेऽपि। ततो गुरुभिर्जातशङ्कैः **पृष्टम्** कस्माद् रोदिषि?। तया **कथितम्**–अहमेतस्य नगरस्याधिष्ठात्री, एतच्च सर्वं नगरमचिराज्जलप्रवाहेन विनङ्क्ष्यति, अत्र च बहवः साधवः स्वाध्यायन्तो वर्त्तन्ते, ततो रोदिमि – कोऽत्र प्रत्ययः? इति पृष्टे सा प्राह— अमुकस्य क्षपकस्य **पारणके क्षीरं रुधिरं** भविष्यति, तच्च यत्र गतानां स्वभावीभूतं भविष्यति तत्र क्षेममवसातव्यमिति। एवमुक्त्वा असौ अगात्। द्वितीयदिने क्षपकस्य पारणके क्षीरं रुधिरीभूतम्। ततः समस्तस्यापि सङ्घप्रधानवर्गस्याऽऽ**मन्त्रणं** पर्यालोचनम्। ततो **नशनं** समस्तस्यापि **सङ्घस्येति** ॥ ४२५८ ॥

यदि पुनरशिवाद्युत्थाने ज्ञातेऽपि भक्तं प्रत्याख्यापयति तदा स गच्छः साधवः प्रवचनं च तेन त्यक्तम्—

**[1]असिवादीहि वहंता, तं उवकरणं च संजया चत्ता।**
**उवहिं विणा य छड्डुणे, चत्तो सो पवयणं चेव ॥ ४२५९ ॥** दारं ८।

[जी.भा.३८६]



---

**१. निशीथभाष्ये ३८४७ गाथा इत्थम्- 'असिवादिकारणेहिं वहमाणा संजया परिच्चत्ता। उवधिविणासो जेछताण चत्तो स पवयणं चेवा॥'**

For Private And Personal

यदि **अशिवाद्यु**पद्रवं ग्रामाद्युत्थानं च ज्ञात्वा भक्तं प्रत्याख्यापयति तदा तस्मिन्ननिर्यापिते एवाशिवाद्युत्थाने जाते यदि संयतास्तत्प्रतिबन्धतो न निर्गच्छन्ति, गच्छन्तो वा यदि **तं** कृतभक्तप्रत्याख्यानं तस्योपकरणं च वहन्ति तदा ते **संयता** अशिवादिभिः कारणैस्त**मुपकरणं** च **वहन्तस्त्यक्ताः**। **अथोपधिं** न वहन्ति त्यक्त्वा वा सर्वथा पलायन्ते तदा स भक्तप्रत्याख्याता परित्यक्तः। **स च त्यक्तः** सन् उड्डाहं कुर्यात्—'मां त्यक्त्वा ते गता' इति, तदा प्रवचनस्य महती हीलनेति **प्रवचनं** त्यक्तम्। तस्मादशिवाद्युत्थाने अपारगे च तस्मिन् ज्ञाते स भक्तं न प्रत्याख्यापयितव्यः॥ ४२५९॥

गतमाभोगनद्वारम् ८ । इदानीं 'मन्यद्वारमाह'—

**एगो संथारगतो, बिइतो संलेहे तइय पडिसेहो ।**

**अपहुपंतऽसमाही, तस्स व तेसिं व असतीए ॥ ४२६०॥**

[जी.भा.३८७,नि.भा.३८४८]

यदि तत्र द्वौ जनावग्रे स्तः। तद्यथा—**एकः संस्तारकगतो** नाम संलिख्य, कृतभक्तप्रत्याख्यानः **द्वितीयः संलिखति** संलेखनां करोति, तथा **तृतीयो** यद्यन्य उपतिष्ठति तर्हि तस्य तृतीयस्य **प्रतिषेधः** कर्त्तव्यः। किं कारणम्? इति चेद्, अत आह— **अपहुपंते**त्यादि, न प्रभवन्ति न प्राप्यन्ते त्रयाणामपि योग्या निर्यापकाः, न च संस्तरन्ति, ततोऽप्रभवः अप्राप्यमाणेषु तेषु संस्तरणस्यास्य **वाऽसति तस्य** तृतीयस्य तयोर्वाग्रेतनयोः **तेषां वा** निर्यापकाणा**मसमाधि**रुपजायते। अथ सन्ति बहवो निर्यापकाः संस्तरन्ति च तदा न कश्चिदनन्तरो दोषः प्रसजतीति तृतीयमपि प्रतीच्छन्ति ॥ ४२६० ॥

**हवेज्ज जइ वाघातो, बितियं तत्थ थावए।**
**चिलिमिली अंतरा चेव, बहिं वंदावए जणं॥ ४२६१ ॥** दारं ९।

[जी.भा.३८८,नि.भा.३८४९]



**यदि** तस्य कृतभक्तप्रत्याख्यानस्य **भवेद् व्याघातः**, व्याघातो नाम-प्रत्याख्यातेनासंस्तरणम्। स च बहिः सर्वत्र ज्ञातो दृष्टश्च भूयसा लोकेन 'एष कृतभक्तप्रत्याख्यानः' इति, तदेयं यतना कर्त्तव्या- योऽसौ **द्वितीयः** संलेखनां कुर्वन् तिष्ठति स च **तत्र स्थाप्यते,** तस्याऽन्तरा **चिलिमिली**

कर्त्तव्या, ततो यदि यैर्ज्ञातो दृष्टश्च ते वन्दका समागच्छेयुस्तदा स तेषां न दर्शयितव्यः, किन्तु ते भण्यन्ते- 'बहिःस्थिताः यूयं वन्दध्वमिति' । एवं **बहिः**स्थितं **जनं वन्दापयेत्** ॥ ४२६१ ॥

गतमन्यद्वारम् ९। इदानीम् 'अनापृच्छाद्वारमाह'—

**अणापुच्छाए गच्छस्स, पडिच्छे तं जती गुरू।**
**गुरुगा चत्तारि विन्नेया, गच्छमणिच्छंते जं पावे ॥ ४२६२ ॥** [जी.भा.३८९]

**गच्छस्यानापृच्छया यदि तं** भक्तप्रत्याख्यातुकामं **गुरुः प्रतीच्छति** अभ्युपगच्छति तदा तस्य प्रायश्चित्तं **चत्वारो गुरुका विज्ञेयाः** । **गच्छे चानिच्छति** स भक्तप्रत्याख्याता **यत् प्राप्नोति** असमाधिप्रभृतिकं तन्निमित्तमपि तस्य प्रायश्चित्तम्। तस्मादवश्यं गच्छ आप्रष्टव्यः। किं कारणम्? इति चेद् , उच्यते—गच्छसाधवः सर्वत्र परिभ्रमन्तो जानते, यथा—एतस्मिन् क्षेत्रे एतत् सुलभम्, एतद् दुर्लभम्, ततो गुरवः पृच्छन्ति—किमेतस्मिन् क्षेत्रे यानि कृतभक्तप्रत्याख्यानस्य समाधिकारकाणि द्रव्याणि तानि सुलभानि? किं वा दुर्लभानि?, तत्र यदि सुलभानि ततः स भक्तप्रत्याख्यानं प्रतिपाद्यते। अथ दुर्लभानि तर्हि प्रतिषिध्यते— 'अन्यत्र गत्वा प्रतिपद्यस्वेति' ॥ ४२६२॥ अनापृच्छायां दोषमाह-

**पाणगादीणि जोग्गाणि, जाणि तस्स समाहिए।**
**अलंभे तस्स जा हाणी, परिक्केसो य जायणे ॥ ४२६३॥**

**असंथरे अजोग्गा य, जोगवाही व ते भवे ।**
**एसणाए परिक्केसो, जा य तस्स विराहणा॥ ४२६४॥** दारं १०।

[जी.भा.३९०-१]

गणस्यानापृच्छायां **यानि तस्य** कृतभक्तप्रत्याख्यानस्य **समाहिते** समाधाननिमित्तानि **पानकादीनि योग्यानि,** आदिग्रहणेन भक्तपरिग्रहः, तेषा**मलाभे** तस्य प्रत्याख्यातुः **या हानिः** समाधिपरिभ्रंश उपजायते, यश्च गच्छसाधूनां योग्यपानकादे**र्याचने** परिमार्गणे **परिक्लेशः** ॥ ४२६३ ॥ तथा—

**असंस्तरे** संस्तरणाभावे यः परिक्लेशो **अयोग्या** वा तत्र निर्यापका **भवेयुः योगवाहिनो वा ते,** तत्र योगवाहिनां समाधिकारकाणि पानकादीन्युद्गमादिशुद्धानि **मृगयमाणानां** यः **परिक्लेशः,या** वा योग्यनिर्यापकासम्पर्कतः **तस्य** कृतभक्तप्रत्याख्यानस्य **विराधना** अनागाढा-

दिपरितापना असमाधिमरणादिकं तत् सर्वं तन्निमित्तम्। अतो गच्छस्य पृच्छा कर्त्तव्या॥ ४२६४॥

गतमनापृच्छाद्वारम् १० । अधुना 'परीक्षाद्वारमाह'—

**अपरिच्छणम्मि गुरुगा, दोण्ह वि अन्नोन्नयं जहाकमसो ।**
**होइ विराधण दुविहा, एक्को एक्को व जं पावे॥ ४२६५॥** [जी.भा.३९२]

यो भक्तं प्रत्याख्यातुकामस्तेन गच्छसाधवः परीक्षितव्याः– किमेते भाविता उत न ? इति गच्छसाधुभिरपि स परीक्षापणीयः– किमेष निस्तारको भवेत्? किं वा न ? इति। आचार्येणापि स परीक्षितव्यः। **अन्योन्यं** पुनः **यथाक्रमशः** वक्ष्यमाणक्रमेणा**परीक्षणे द्वयोरपि** गच्छस्य भक्तं प्रत्याख्यातुकामस्य च प्रायश्चित्तं चत्वारो गुरुकाः। तथा अपरीक्षणे **भवति द्विधा विराधना** आत्मविराधना संयमविराधना च। तत्र गच्छस्याऽऽत्मविराधना असमाधिमरणतः प्रत्यवायसम्भवात्, भक्तप्रत्याख्यातुरात्मविराधना असमाध्युत्पादात्। संयमविराधना गच्छस्याभावितत्वेन एषणाया असम्भवात्। **एक्को एक्को** व जं पावे **एकः** गच्छो यमनर्थं **प्राप्नोति एको** वा स भक्तप्रत्याख्याता तन्निमित्तमपि तस्य प्रायश्चित्तमापद्यते॥ ४२६५॥

**तम्हा परिच्छणं तू, दव्वे भावे य होइ दोण्हं पि ।**
**संलेह पुच्छ दायण, दिट्ठंतो अमच्च-कोंकणए ॥ ४२६६ ॥**

[तुला-नि.भा.३८५२]

यत एवमपरीक्षणे प्रायश्चित्तं दोषाश्च **तस्माद् द्वयोरपि** परस्परं **द्रव्ये भावे च भवति परीक्षणम्**। तच्चैवम्— भक्तं प्रत्याख्यातुकामेन परीक्षानिमित्तं गच्छसाधवो भणिताः, यथा- 'आनयत मम योग्यं कलमशालिकूरम् क्वथितं च क्षीरम्, ततो भोक्ष्ये अथवा अन्यद् भोजनं प्रणीतं यत् स्वभावतो रुचिकरं तद् आनयतेति' याचते । तत्रैवं याचिते यदि हसन्ति कृष्णमुखा वा जायन्ते तदा ज्ञातव्यम् 'अभाविता एते' इति तेषां समीपे न प्रत्याख्यातव्यम्। अथ ते ब्रुवते- 'यद् भणसि तत् कुर्म' इति, तदा ज्ञातव्यम्-योग्या एते इति । तत्र गच्छसाधुभिः परीक्षानिमित्तं कलमशालिकूरप्रभृतिकमुत्कृष्टं द्रव्यमानीतम् , तस्मिन्नानीते यदि स ब्रूते- 'अहो! सुन्दरमानीतम् , भुञ्जेऽहमिति', तदा ज्ञातव्यम्-एष आहारलुब्ध इति न निस्तरिष्यति, वक्तव्यश्च सः- 'यदा त्वमाहारगृद्धिं त्यजसि तदा ते भक्तपरिज्ञायां योग्यता भविष्यति, नान्यदा'। अथ स तमुपनीतमाहारं जुगुप्सते— 'किं ममैतेनाऽऽहारितेन? पर्याप्तम् , नाहमाहारयामीति', तदा ज्ञातव्यम् — एष निस्तरिष्यति, तस्मिन् वक्तव्यम् —'प्रत्याख्याहि, वयं ते निर्यापका'

इति। इह यद् याचितस्य द्रव्य(स्य)सम्पादनमसम्पादनं वा सा(तद्) गच्छस्य द्रव्यतः परीक्षणं, यत् पुनः सकषायित्वमकषायित्वं वा ज्ञायते तद् भावपरीक्षणम्। तथा भक्तप्रत्याख्यातुरप्युपनीतसुन्दराहारस्य ग्रहणमग्रहणम् वा द्रव्यतः परीक्षणम् , भावतो गृद्धि-अगृद्धिपरिज्ञानमिति। आचार्यस्य तत् परीक्षणमाह- **संलेह पुच्छ** इत्यादि, यदा आचार्याणामुपस्थितो भवति भक्तप्रत्याख्यानेनाहं तिष्ठामि' तदा स आचार्येण प्रष्टव्यः- 'किमार्य संलिखितं त्वया न वा?' इति, ततः स चिन्तयति पश्यति मे अस्थि-चर्मावशेषं शरीरं तथापि प्रश्नयति संलिखितं न वा ? इति एवं चिन्तयित्वा क्रोधवशात् क्षिप्रमङ्गुलिं भङ्क्त्वा दर्शयति— 'पश्य! यत्र किञ्चिन्मेद्यं मांसं वा द्रक्ष्यसि भवति संलिखितं किं वा नेति,' एवमुक्ते गुरुराह— 'न ते द्रव्यसंलेखं पृच्छामि, कृशशरीरस्य प्रत्यक्षत एवोपलभ्यमानत्वात्, किन्तु भावसंलेखम्। स चाद्यापि न विद्यते इति तं भावसंलेखं कुरु।' श्रूयतां चात्र **दृष्टान्तोऽमात्य-कोङ्कणकविषये** ॥ ४२६६ ॥ साम्प्रतमेनामेव गाथां व्याचिख्यासुः प्रथमतो भक्तप्रत्याख्यातुर्गच्छपरीक्षामाह-

**कलमोयण-पयकढियादिदव्वे आणेह मे त्ति इति उदिते ।**
**भावे कसाइज्जंती, तेसि सगासे न पडिवज्जे ॥ ४२६७॥**

[तुला-जी.भा.३९४-५]

**कलमौदनं** कलमशालिकूरं **पयः** दुग्धं **क्कथितम्** , आदिशब्दादन्यस्याप्यभीष्टस्य भोजनस्य परिग्रहः, मम योग्य**मानयतेति** द्रव्ये **उदिते** यदि **भावे** भावतः **कषाययन्ति** कषायं कुर्वन्ति, ततस्तेषां **समीपे** भक्तपरिज्ञां **न प्रतिपद्यते,** अयोग्यत्वात्॥ ४२६७॥

**अह पुण विरूवरूवे, आणीए दुगुंछिते भणंतऽन्नं ।**
**आणेमु त्ति ववसिए, पडिवज्जति तेसि तो पासे ॥ ४२६८॥** [जी.भा.३९६]

**अथ पुनः विरूपरूपे** अनेकप्रकारे आहारे **आनीते जुगुप्सिते भणन्ति**— **अन्यमाहारमानयामः**, तथैव चाऽऽनेतुं **व्यवसिताः। तेषां पार्श्वे प्रतिपद्यते,** यथाभिलषित-वस्तुसम्पादकतया तेषां योग्यत्वात् ॥ ४२६८॥

सम्प्रति गच्छस्य तत्परीक्षामाह-

**कलमोयणो य पयसा, अन्नं व सभाव अणुमयं जस्स ।**
**उवणीयं जो कुच्छति, तं तु अलुद्धं पडिच्छंति ॥ ४२६९॥**

[जी.भा.३९८, नि.भा.३८५४]

**कलमौदनः**, कलमशालिकूरं **पयसा** सहोपनीतम् , **अन्यद्वा** [यद्] **यस्य स्वभावतोऽनुमतं** तस्य तदुपनीतं सद् **यः कुत्सते** निन्दति- 'किं ममैतेन कार्यम्?' इति, **तमलुब्धमिति** ज्ञात्वा **प्रतीच्छन्ति** । यस्तु कलमौदनादिके उपनीते 'अहो! सुन्दरम् अहं भुञ्जे' इति स लुब्ध इति न प्रत्येषणीयः ॥ ४२६९ ॥

आचार्यस्य तत्परीक्षामाह—

**अज्जो! संलेहो ते किं कतो न कतो? त्ति एवमुदियम्मि ।**

**भंत्तुं अंगुलिं दावे, पेच्छेह [ता] किं कतो? न कतो? ॥ ४२७० ॥**

[तुला–जी.भा.३९९–४००]

**आर्य! संलेखस्त्वया किं कृतः? न कृतो वा इत्येवमुदिते अङ्गुलिं भङ्क्त्वा दर्शयति प्रेक्षस्व किं कृतः?** किं वा **न कृतः?** इति ॥ ४२७० ॥

तत आचार्य आह–

**न हु ते दव्वसंलेहं, पुच्छे पासामि ते किसं ।**
**कीस ते अंगुली भग्गा ?, भावं संलिह माउरो[१] ॥ ४२७१ ॥** [जी.भा.४०१]

'**न हु** नैव **ते** तव **द्रव्यसंलेखं पृच्छामि,** यतः पश्यामि **ते कृशं** शरीरम् , तस्मात् **किमिति त्वया अङ्गुलिर्भग्ना ?** महानुभाव! पृच्छामि **भावं संलेखं मा** क्रोधवशादातुरो भव' ॥ ४२७१ ॥

सम्प्रति 'दिट्ठंतोऽमच्चकोंकणए' [गा.४२६६]इत्येतद् भावयति—

**रन्ना कोंकणगाऽमच्चा, दोवि निव्विसया कया।**
**दोण्हिए कंजियं छोढुं, कोंकणो तक्खणा गतो ॥ ४२७२ ॥**
**भंडीउ बइल्लए काए, अमच्चो जा भरेति उ ।**
**ताव पुन्नं तु पंचाहं, नलिए निहग्गं गतो ॥ ४२७३ ॥**

[जी.भा.४०३-४००,नि.भा.३८५६-७]



---

१. इतोऽग्रे जीतकल्प भाष्ये ४०२ गाथा इत्थम्- 'भावेच्चिय एत्थं तू संलिहियव्वो सदा पयत्तेणं। तेणाऽयट्टं साहे दिट्ठंतोऽमच्च कोंकणए॥'

केनापि **राज्ञा** एकः **कोङ्कणकोऽपरोऽमात्य** एतौ द्वावपि कस्मिंश्चिदपराधे समकमाज्ञप्तौ— यदि पञ्चाहाभ्यन्तरे **निर्विषयौ** न प्रव्रजतस्ततोऽवश्यं वध्याविति। तत्र **कोङ्कणो दोग्धिके** तुम्बके **काञ्जिकं** काञ्जिकपेयां **क्षिप्त्वा तत्क्षणाद् गतः**। **अमात्यः** पुनर्यावद् **भण्डीः** गन्त्री**र्बलीवर्दान् कायान्** कापोती**र्बिभर्ति तावत् पूर्णं पञ्चाह**मिति **नलिके** शूलिकायामारोपितो **निधनं गतः** विनाशं प्राप्तः। 'यथा सोऽमात्यः कुटुम्बोपकरणप्रतिबद्धो विनाशमुपगतः, एवं त्वमपि भावप्रतिबद्धो नाऽऽराधनाजीवितं प्राप्स्यसि' ॥ ४२७२॥ ४२७३॥

तस्मात्–

**इंदियाणि कसाए य, गारवे य किसे कुरु।**
**न चेयं ते पसंसामो, किसं साहु! सरीरगं[१] ॥ ४२७४॥** दारं ११ ॥

'**इन्द्रियाणि** चक्षुरादीनि **कषायान्** क्रोधप्रभृतीन् **गौरवाणि** ऋद्धिगारवप्रमुखानि **कृशानि**



---

१. जीतकल्प भाष्ये ४०७ गाथा इत्थम्- 'एवं परिच्छिऊणं जदि सुद्धो ताहे तं पडिच्छति। ताहे य अत्तसोहि करेति विहिणा इमेणं तु॥'

**कुरु न चेदं ते** साधो! **कृशं शरीरकं प्रशंसामः**, भावसंलेखव्यतिरेकेण द्रव्यसंलेखस्याऽकिञ्चित्करत्वात्' ॥ ४२७४॥

गतं '[१]संलेखनाद्वारम् ११। इदानीं 'मालोचनाद्वार 'माह-

**आयरियपायमूलं गंतूणं सइ परक्कमे ताहे ।**

**सव्वेण अत्तसोही, कायव्वा एस उवएसो ॥ ४२७५॥**

[जी.भा.४०८,नि.भा.३८५९]

**ततो** द्रव्यसंलेखना-भावसंलेखनानन्तरं भक्तं प्रत्याख्यातुकामेन **सर्वेण** स्वयं शोधिं जानता अजानता च **सति पराक्रमे आचार्यपादमूले गत्वा [आत्म] शोधिः कर्त्तव्या । एष** तीर्थकृतां गणभृतां **चोपदेशः** ॥ ४२७५॥

तत्र स्वयं शोधिं जानतः प्रत्याह—

**जह सुकुसलो वि वेज्जो, अन्नस्स कहेइ अत्तणो वाहिं ।**

**विज्जस्स य सो सोउं, तो पडिकम्मं समारभते ॥ ४२७६॥** [जी.भा.४१०]



१. संलेखनेति परीक्षाद्वारस्य नामान्तरम्॥

**जाणंतेण वि एवं, पायच्छित्तविहिमप्पणो निउणं।**

**तह वि य पागडतरयं, आलोएयव्वयं होइ ॥ ४२७७ ॥** [नि.भा.३८६०-१]

**यथा सुकुशलोऽपि वैद्यो अन्यस्यात्मनो व्याधिं कथयति, सोऽपि वैद्यस्य श्रुत्वा व्याधिकथनं ततः प्रतिकर्म समारभते, एवं प्रायश्चित्तविधिमात्मनो निपुणं जानताऽपि तथापि प्रकटतरमालोचयितव्यं** भवतीति कृत्वा अन्यस्य समीपे आलोचयितव्यम्।॥ ४२७६ ॥ ४२७७ ॥

तेनाप्यन्येन किं कर्त्तव्यम्? अतः आह-

**छत्तीसगुण समन्नागएण तेण वि अवस्स कायव्वा ।**

**परपक्खिया विसोही, सुट्ठु वि ववहारकुसलेणं ॥ ४२७८ ॥**

[तुला-जी.भा.४११,नि.भा.३८६२]



For Private And Personal

तेनापि अन्येनाऽऽचार्येण **षड्त्रिंशद्गुणसमन्वागतेन**। षट्त्रिंशद् गुणा 'अट्ठविहा गणि संपय' [गा. ४०६०] इत्यादिना प्रागेवाभिहिताः। **सुष्ठ्वपि व्यवहारकुशलेन परपक्षिका** परपक्षं गता **विशोधिरवश्यं कर्तव्या** ॥ ४२७८॥

कथं पुनरात्मनः शोधिं जानन्तमप्यालोचयेद्। इत्याह—

**जह बालो जंपंतो, कज्जाकज्जं च उज्जुयं भणति।**
**तं तह आलोएज्जा, माया-मयविप्पमुक्को य॥ ४२७९॥**

[नि.भा.३८६,ओघनि.८०१]

**यथा बालो जल्पन् कार्यमकार्यं च ऋजुकम्** अमायं **भणति। तथा मायामदवि-प्रमुक्तस्तत्** कार्यमकार्यं वा गुरोः पुरत **आलोचयेत्** ॥ ४२७९॥

सम्प्रति मायानिर्घातने उपदेशमाह—

**उप्पन्ना उप्पन्ना, माया अणुमग्गतो निहंतव्वा।**
**आलोयण-णिंदण- गरहणेहिं न पुणो अ बितियं ति॥ ४२८०॥**

[नि.भा.३८६४]

**उत्पन्ना उत्पन्ना माया अनुमार्गतः** पृष्ठतो लग्नेन **आलोचन-निन्दन-गर्हणैः निहन्तव्या।** कथम्? इत्याह—**न पुनरेवं द्वितीयं** वारं करिष्यामीति प्रतिपत्त्या ॥ ४२८० ॥ सम्प्रत्यालोचनायां दत्तायां ये गुणा भवन्ति तानुपदर्शयति –

**आयार१विणयगुण२ कप्पदीवणा३ अत्तसोहि४ उजुभावो५।**
**अज्जव६मद्दव७लाघव८तुट्ठी९ पल्हायजणणं** १० **च ॥ ४२८१ ॥**

[जी.भा.४१३,नि.भा.३८६५]

आलोचनायां दत्ताया**माचारः** पञ्चविध आसेवितो भवति १। **विनयगुण**श्च प्रवर्त्तितो भवति २। **कल्पदीपना** नाम अवश्यमालोचयितव्यो अतीचारः इत्यस्य कल्पस्य प्रकाशनम् अन्येषामुपदर्शनम् ततस्तेऽप्यन्ये एवं कुर्वन्ति ३ तथा **आत्मनो विशोधि**र्निःशल्यता कृता भवति ४। तथा **ऋजुः** संयमस्तस्य **भावो** भवनं तत्कृतं भवति ५। तथा **आर्जवम्** अमायत्वम् ६, **मार्दवम्** अमानत्वम् ७, **लाघवम्** अलोभत्वम्८, एतानि कृतानि भवन्ति। तथा आलोचिते



For Private And Personal

सति 'निःशल्यीभूतोऽहम्' इति **तुष्टिरुपजायते** ९ तथा अनालोचिते अतीचारे 'सशल्योऽहम्' इति या मनस्यधृतिरुपजायते तया शरीरं दह्यते, तत आलोचनायां प्रदत्तायामधृतिपरिदाहापगमात् **प्रह्लादजननं** प्रह्लादोत्पादतः शीतीभवनं भवति १० ॥ ४२८१ ॥

कः पुनः सोऽतिचारः ? कुतो वा प्रभृत्यालोचयितव्यम् ? अत आह–

**पव्वज्जादी आलोयणा उ तिण्हं चउक्कग विसोही ।**
**जह अप्पणो तह परे, कायव्वा उत्तमट्ठम्मि ॥ ४२८२ ॥**

[जी.भा.४१४,नि.भा.३८६६]

**त्रयाणां** ज्ञान-दर्शन-चारित्राणाम् अतीचारेषु **प्रव्रज्यादेरा**रभ्य यावदुत्तमार्थाभ्युपगमस्तावद**ालोचना** दातव्या। कथम् ? इत्याह **चतुष्कविशोध्या** एकैकस्मिन् द्रव्यतः क्षेत्रतः कालतो भावतश्चातीचारविशुद्ध्या । पुनः कथम् ? इत्याह— **यथाऽऽत्मनः** सम्यग्ज्ञेयतया तिष्ठति, **तथा परस्मिन्** आलोचना **कर्त्तव्या,** देशतः सर्वतो न किञ्चिदपि गूहयितव्यमिति भावः, **उत्तमार्थे** उत्तमार्थप्रतिपत्तौ कर्त्तव्यतायाम् ॥ ४२८२ ॥

तत्र ज्ञाननिमित्तं द्रव्यतोऽतीचारालोचनामाह-

**नाणनिमित्तं आसेवियं तु वितहं परूवियं वा वि।**
**चेयणमचेयणं वा, दव्वं सेसेसु इमगं तु ॥ ४२८३॥**

[तुला-जी.भा.४१६,नि.भा.३८६७]

**ज्ञाननिमित्तं** द्रव्यमयतनयाऽऽ**सेवितं** भवेदयतनया वा अचित्तं **द्रव्यमु**द्गमाद्यशुद्धम्। तथा **सचेतनमचेतनं वा वितथं प्ररूपितं** भवेत्। तद्यथा - सचित्तमचित्तं [अचित्तं ] वा सचित्तमिति। एतद् द्रव्यतोऽतीचारालोचनम् १। **शेषेषु तु** क्षेत्रादिषु **इदम्** अतीचारालोचनम्॥ ४२८३॥

तदेवाह-

**नाणनिमित्तं अद्धाणमेति ओमे वि अच्छति तदट्ठा ।**
**नाणं च आगमेस्सं, ति कुणति परिकम्मणं देहे॥ ४२८४॥**

[जी.भा.४१७८,नि.भा.३८६८९]

**पडिसेवति विगतीतो, मेज्झे दव्वे व एसति पिबती ।**
**वायंतस्स वि किरिया कयाउ पणगाइहाणीए ॥ ४२८५ ॥**

**ज्ञाननिमित्तम् अध्वानं** पन्थानं प्रतिपद्यते, अध्वानं प्रतिपन्ने च यत् सेवितमकल्पिकमयतनया यतनया वा तद् आलोचयति। इदं क्षेत्रतो अतीचारालोचनम् २। तथा **अवमेऽपि** दुर्भिक्षेऽपि **तदर्थं** ज्ञानार्थं **तिष्ठति** । तत्र च तिष्ठता यदकल्पिकमासेवितमयतनया यतनया वा तदालोचयति। इदं कालतोऽतीचारालोचनम् ३। भावत आह-**नाणं चे**त्यादि, ज्ञानमहम् **आगमिष्यामि** ग्रहीष्यामीति हेतोः **देहे** शरीरस्य **परिकर्म करोति,** यथा **व्या**ख्याप्रज्ञप्तेर्**म**हाकल्पश्रुतस्य वा योगं वोढुकामो घृतं पिबति प्रणीतं चाऽऽहारमुपभुङ्क्ते, तत्र या अयतना कृता। अथवा कश्चिद् रोग आसीत् मा स तत्काले उद्रेकं यायादिति परिकर्म करोति, तच्च कुर्वता या अयतना कृता। **विकृतीर्वा** नानाप्रकारा निरन्तरं **प्रतिसेवते** तत्रापि या अयतना कृता । **मेध्यानि द्रव्याणि** नाम-यैर्मेधा उपस्क्रियते तानि द्रव्याणि **एषयता** परिमार्गयता **पिबता** वा या अयतना व्यधायि। तथा **वाचयतः** वाचनाचार्यस्य पञ्चकादिहान्या **क्रिया कृता,** अपिशब्दात् **पञ्चकादिहान्या**-तिक्रमेण वा या क्रिया कृता तामप्यालोचयति ॥४२८४॥ ४२८५ ॥

तदेवं ज्ञाननिमित्तं द्रव्याद्यतीचारालोचनमुपदर्शितम् । अधुना दर्शननिमित्तं चारित्रनिमित्तं चाह–

**एमेव दंसणम्मि वि, सद्दहणा नवरि तत्थ नाणत्तं ।**
**एसण इत्थीदोसे, वय त्ति चरणे सिया सेवा ॥ ४२८६ ॥**

[जी.भा.४१९,नि.भा.३८७०]

**एवमेव** अनेनैव ज्ञानगतेन प्रकारेण **दर्शनेऽपि** दर्शननिमित्तमपि द्रव्याद्यतीचारजातमालोचयितव्यम्। **नवरं तत्र नानात्वं** दर्शनं नाम श्रद्धानम् । चरणेऽपि **चारित्रे**ऽपि **स्यादि**यमतीचारता **सेविता** । तद्यथा— **एषणायाम्** एषणाविषये **स्त्रीविषयदोषो**पेतवसतिविषये **व्रत**विषये चेति॥ ४२८६ ॥ सम्प्रति "तिण्हं चउक्क विसोही" इत्यस्यान्यथा व्याख्यानमाह —

**अहवा तिगसालंबेण दव्वमादी चउक्कमाहच्च।**
**आसेवियं निरालंबतो व आलोयए तं तु ॥ ४२८७॥**

[जी.भा.४२०,नि.भा.३८७१]



For Private And Personal

**अथवेति** प्रकारान्तरे। **त्रिकसालम्बेन** ज्ञानादित्रिकालम्बनोपेतेन 'द्रव्यादिचतुष्कं' द्रव्य-क्षेत्र-काल-भावलक्षणम् **आहच्च** कदाचिद् अकल्पनीयमयतनया यतनया **वाऽऽसेवितम्**। अथवा **निरालम्बकः** ज्ञानाद्यालम्बनरहितो द्रव्यादिचतुष्कमकल्पिकमासेवितवान्। एतेनैतत् ख्यापितं यत् प्रतिषेव्यते किञ्चिदकल्पिकं तद् दर्पतः कल्पतो वा, नातः परमपरं पस्प्रकारान्तरमस्तीति, **एतद् आलोचयेत्**॥ ४२८७॥

**पडिसेवणातियारा, जइ वीसरिया कहंचि होज्जा णु।**
**तेसु कह वट्टियव्वं, सल्लुद्धरणम्मि समणेणं?॥ ४२८८॥**

[जी.भा.४२१,नि.भा.३८७२]

**प्रतिसेवनातिचारा यदि कथमपि विस्मृता भवेयुस्तेषु शल्योद्धरणे** कर्त्तव्ये **कथं श्रमणेन वर्त्तितव्यम्?** ॥ ४२८८॥

सूरिर्वर्त्तनप्रकारमाह—

**जे मे जाणंति जिणा, अवराहे जेसु जेसु ठाणेसु।**
**ते हं आलोएउं, उवट्ठितो सव्वभावेणं ॥ ४२८९॥**

**एवं आलोएंतो, विसुद्धभावपरिणामसंजुत्तो ।**
**आराहतो तह वि सो, गारव-परिकुंचणारहितो ॥ ४२९० ॥** दारं १२ ॥

[जी.भा.४२२-३,नि.भा.३८७३-४]

**यान् ममापराधान् येषु येषु स्थानेषु जिनाः** केवलिनो भगवन्तो **जानन्ति तानहं सर्वभावेन** सर्वात्मना आलोचयितुमुपस्थितः परं न स्मरामीति वचसा न प्रकटीकर्तुं शक्नोमि, तस्माज्जिनदृष्टमेव प्रमाणमित्यालोचयितव्यम्। यद्यपि **एवं** सन्मुग्धाकारमालोचयति **तथापि स गौरवप्रतिकुञ्चनारहितो विशुद्धेन भावपरिणामेन संयुक्त एवमालोचयन् आराधकः।** प्रतिकुञ्चना नाम-माया ॥ ४२८९ ॥ ४२९० ॥

गतमालोचनाद्वारम् १२। अधुना 'प्रशस्तस्थानद्वार'माह—

**ठाणं पुण केरिसगं, होइ पसत्थं तु तस्स जं जोग्गं ?।**
**भन्नति जत्थ न होज्जा, झाणस्स उ तस्स वाघातो ॥ ४२९१ ॥**

[जी.भा.४२४]

**तस्य** भक्तं प्रत्याख्यातुर्यत् **प्रशस्तं योग्यं स्थानं** तत् कीदृशं भवति? सूरिराह-**भण्यते, यत्र तस्य** कृतभक्तप्रत्याख्यानस्य **ध्यानव्याघातो न भवति** ॥ ४२९१ ॥

तत्र येषु तस्य ध्यानव्याघातो भवति तान्युपदर्शयति-

**गंधव्व१ नट्ट२ जड्ड३ऽस्स४चक्क५जंत६ऽग्गिकम्म७फरुसे८य।**
**नंतिक्क९रयग१०देवड११डोंब१२पाडहिग१३रायपहे१४ ॥ ४२९२ ॥**
**चारग१५कोट्टग१६कल्लाल१७करकए१८पुप्फ१९फल२०दग२१समीवम्मि।**
**आरामे२२अह वियडे२३नागघरे२४पुव्वभणिए य ॥ ४२९३ ॥**

[जी.भा.४२५-६,नि.भा.३८७५-६]

**गन्धर्व**शालायां यत्र गान्धर्विकाः सङ्गीतं कुर्वन्ति शिक्षयन्ति च, तत्र गन्धर्वशालासमीपे वा न स्थातव्यम्, ध्यानव्याघातभावाद् निदानं कुर्यात् १। तथा **नृत्य**शालायां नृत्यशालासमीपे वा, तत्राऽप्युक्तदोषसम्भवात् २। तथा **जड्डः** हस्ती, **अश्वः** तुरङ्गमः, हस्तिशालायां

हस्तिशालासमीपे तुरङ्गमशालायां तुरङ्गमशालासमीपे वा, हस्तिकादिविरूपशब्दश्रवणतो ध्यानव्याघातभावात् ३। ४। तथा **चक्र**शालायां चक्रशालासमीपे वा तिलपीडनशालायां तिलपीडनशालासमीपे वा **जंत**त्ति इक्षुयन्त्रशालायामिक्षुपीडनशालासमीपे वा, तिलादिदर्शनतः कर्मकरगानशब्दश्रवणतो वा ध्यानभङ्गोपपत्तेः। ५। ६। **अग्निकर्म** लोहकारकर्म तच्छालायामग्निकर्मशालासमीपे वा, **परुषः** कुम्भकारः, कुम्भकारशालायां कुम्भकारशालासमीपे वा, अग्निपरितापतो लोहकुट्टनादिशब्दश्रवणतो वा ध्यानव्याघातसम्भवात्। ७। ८। तथा **नन्तिक्काः** छिम्पास्तच्छालायां तच्छालासमीपे वा, **रजक**शालायां रजकशालासमीपे वा, देवडशालायां **देवड**शालासमीपे वा, जुगुप्सादोषात्। ९। १०। ११। **डोम्बः** लङ्खकास्तेऽपि गायन्ति, अथवा चण्डालविशेषगायनाः डोम्बाः, तेषां शालायां तच्छालासमीपे वा, जुगुप्सादोषाद् गानशब्दश्रवणतो ध्यानव्याघातभावाच्च १२। तथा **[पाडहिकशालायां]** पाडहिकशालासमीपे वा, वादित्रश्रवणतो ध्यानव्याघातः१३। **राजपथे** राजपथसमीपे वा, राज्ञ आगच्छतो समृद्धिदर्शनतो निदानकरणप्रसक्तेः १४। तथा **चारकः** गुप्तिगृहं तत्र तस्य समीपे वा, यातनाशब्दश्रवणतो ध्यानव्याघातभावात् १५। **कोष्ठको** नाम चट्टानां शाला, कोष्ठके कोष्ठसमीपे वा, चट्टा अपि हि गायन्ति विरूपरूपाणि च भाषन्ते ततो ध्यानव्याघातः १६। तथा **कल्पपालाः**

सुराविक्रयकारिणो मद्यपा वा, तेषां शालायां तच्छालासमीपे वा, यतस्तत्र मत्तप्रमत्ता गायन्ति पुत्कुर्वन्ति ततो ध्यानव्याघातसम्भवः १७। तथा **क्रकचके** यत्र काष्ठानि क्रकच्यन्ते क्रकचकसमीपे वा, काष्ठक्रकचनशब्दश्रवणतः कारपत्रिकगानशब्दश्रवणतो ध्यानभ्रंशोपपत्तेः १८। **पुप्फ-फल-दगसमीवम्मि** त्ति पुष्पसमीपे फलसमीपे उदकसमीपे वा, पुष्पादिदर्शनतः तद्विषयाभिलाषोपपत्तेः १९। २०। २१। तथा **आरामे,** तत्राप्यनन्तरोदितदोषप्रसङ्गात् २२। तथा **विकटं** नाम असङ्गुप्तद्वारं तत्र पानकापाने कायिक्यादिपरिष्ठापने च सागारिकसम्भवात् २३। तथा **नागगृहे,** उपलक्षणमेतत्, यक्षगृहादिषु च, तत्रापि भूयसां लोकानां नानाविधविकुर्वित-वेषाणामागत्याऽऽगत्य गान-नर्त्तनकरणात्, तथा च सति ध्याने व्याघातसम्भवः । यदि वा नागादयोऽनुकम्पया प्रत्यनीकतया विमर्शेन वा अनुलोमान् प्रतिलोमान् वा उपसर्गान् कुर्युः २४। **पूर्वभणिते** च प्राक् कल्पाध्ययनाभिधे(हिते) च भक्तं प्रत्याख्यातुकामेन न स्थातव्यम् ॥ ४२९२ ॥ ४२९३ ॥

एतदेव भावयति—

**पढम-बिइएसु कप्पे, उद्देसेसुं उवस्सया जे उ।**
**विहिसुत्ते य निसिद्धा, तव्विवरीए गवेसेज्जा ॥ ४२९४॥**

[जी.भा.४२७,नि.भा.३८७७]

**कल्पे** कल्पाध्ययने **द्वितीय**-तृतीययोरु**द्देशयोः विधिसूत्रे** च **आचाराङ्गे** शय्याध्ययने अवग्रहप्रतिमास्थाननिषीदनसप्तके च **ये उपाश्रया निषिद्धा**स्तेषु न स्थातव्यम्, किन्तु **तद्विपरीतान्** प्रदेशान् **गवेषयेत्** ॥४२९४॥

तथा-

**उज्जाण-रुक्खमूले सुन्नघर अनिसट्ठ हरिय मग्गे य ।**
**एवंविहे न ठायति होज्ज समाहीए वाघातो ॥ ४२९५॥** दारं १३॥

[जी.भा.४२८,नि.भा.३८७९]

**उद्याने वृक्षमूले शून्यगृहे अनिसृष्टे** अननुज्ञाते **हरिते** हरिताकुले **मार्गे च** अन्यस्मिन्नपि **एवंविधे** स्थाने न **तिष्ठति** भक्तप्रत्याख्याता, यतस्तत्र **समाधेर्व्याघातो भवति** ॥ ४२९५॥

गतमप्रशस्तस्थानद्वारम्१३। अधुना प्रशस्तवसतिद्वारमाह-

**इंदियपडिसंचारो, मणसंखोभकरणं जहिं नत्थि ।**

**चाउस्सालादि दुवे, अणुण्णवेऊण ठायंति॥ ४२९६॥**

[जी.भा.४२९,नि.भा.३८७८]

**यत्र इन्द्रियप्रतिसञ्चारो न भवति।** किमुक्तं भवति? यत्र इष्टा अनिष्टा वा शब्दा न श्रूयन्ते, नापीष्टानिष्टानि रूपाणि, एवं गन्धादिष्वपि भावनीयम्। **मनःसंक्षोभकारणं** च यत्र नास्ति तत्र **चतुःशालादिके द्वे** वसती **अनुज्ञाप्य** प्रतिग्राह्ये। आदिशब्दात् त्रिशाल-द्विशालादिपरिग्रहः। वसतिद्वयं च गृहीत्वा एकत्र भक्तप्रत्याख्याता **स्थाप्यते,** अपरत्र शेषा गच्छसाधवः। किं कारणम् इति चेद् ? उच्यते-अशनादीनां गन्धेन भक्तप्रत्याख्यातुरभिलाषो मा भूदिति हेतोः॥ ४२९६॥

**पाणगजोग्गाहारं, ठवेंति से तत्थ जत्थ न उवेंति ।**

**अपरिणया वा सो वा, अप्पच्चय-गेहिरक्खट्ठा ॥ ४२९७॥**

[जी.भा.४३०,नि.भा.३८८०]

**पानकं योग्यमाहारं च से** भक्तप्रत्याख्यातुस्तत्र प्रदेशे वृषभाः **स्थापयन्ति यत्र न** नैव **अपरिणताः** साधवः **स वा** भक्तप्रत्याख्याता **समागच्छति**। किं कारणं तत्र स्थापनीयम्? इत्यत आह— **अप्रत्यय-गृद्धिरक्षार्थम्,** कृतभक्तप्रत्याख्यानस्य दीयमानं दृष्ट्वा मा भूदपरिणतानामप्रत्ययः भक्तप्रत्याख्यातुस्तु तद् दृष्ट्वा गृद्धिरिति हेतोः ॥ ४२९७॥

अत्राह— यदि तेन भावतस्त्यक्त आहारस्ततः कथं तस्य गृद्धिरुपजायते? तत आह—

**भुत्तभोगी पुरा जो वि, गीयत्थो वि य भाविओ ।**

**संतेसाऽऽहारधम्मेसु, सो वि खिप्पं तु खुब्भए ॥ ४२९८॥**

[जी.भा.४३१,नि.भा.३८८१]

**योऽपि पुरा** पूर्वं **भुक्तभोगी गीतार्थो भावितोऽपि सोऽपि सत्सु आहारग्रहणधर्मेषु क्षिप्रं** शीघ्रमाहारदर्शनतः **क्षुभ्यति** स्वप्रतिज्ञां विलुप्याऽऽहारं याचते ॥४२९८॥

तथा—

**पडिलोमऽणुलोमा वा, विसया जत्थ दूरतो ।**

**ठावित्ता तत्थ से निच्चं, कहणा जाणगस्स वि ॥ ४२९९॥**

दारं १४ [जी.भा.४३२,नि.भा.३८८२]

**यत्रानुलोमाः प्रतिलोमा वा विषया दूरतस्तत्र तं स्थापयित्वा से** तस्य **जानतोऽपि नित्यं कथना भवति** (क्रियते) ॥ ४२९९॥

गतं [प्रशस्त]वसतिद्वारम् १४। इदानीं 'निर्यापकद्वार'माह-

**पासत्थोसन्न-कुसीलठाणपरिवज्जिया उ निज्जवगा ।**

**पियधम्मऽवज्जभीरू, गुणसंपन्ना अपरितंता ॥ ४३००॥**

[जी.भा.४३३,नि.भा.३८८३]

**पार्श्वस्थाऽवसन्न-कुशीलस्थानपरिवर्जिताः प्रियधर्माणोऽवद्यभीरवो गुणसम्पन्नाः अपरितान्ताः** अपरिश्रान्ता **निर्यापकास्तस्य** कृतभक्तप्रत्याख्यानस्य॥ ४३००॥ किं कुर्वन्ति

कियन्तो वा ते इष्यन्ते ?

तत आह–

**उव्वत्त४ दार४ संथार४कहग४वादी४अ अग्गदारम्मि४ ।**

**भत्ते ४ पाणे४ वियारे४–४, कहग४ दिसा४ जे समत्था य ॥ ४३०१ ॥**

[जी.भा.४३५,नि.भा.३८८४]

**ये** तं कृतभक्तप्रत्याख्यानं **उद्वर्त्तयन्ति** परावर्त्तन्ते च ते चत्वारः४। ये अभ्यन्तरद्वारमूले तिष्ठन्ति तेऽपि चत्वारः ४। **संस्तारकारकाः** अपि चत्वारः ४। येऽपि तस्य धर्मं **कथयन्ति** तेऽपि चत्वारः ४। **वादिनः** लोकस्योल्लुण्ठवचनप्रतिकारिणश्चत्वारः ४। **अग्रद्वारे** ये तिष्ठन्ति तेऽपि चत्वारः ४। ये योग्यं **भक्त**मानयन्ति ते चत्वारः ४। **पानक**स्यापि तद्योग्यस्यानेतारः चत्वारः ४। **उच्चार**परिष्ठापकाश्चत्वारः ४। **प्रश्रवण**परिष्ठापका अपि चत्वारः ४। बहिर्लोकस्य धर्म**कथकाः** चत्वारः४। चतसृष्वपि **दिक्षु** साहस्त्रिकमल्लाश्चत्वारः ४। एते द्वादश चतुष्कका अष्टाचत्वारिंशद् भवन्ति ॥ ४३०१ ॥

कीदृशाः पुनरमी निर्यापकाः? इत्यत आह-

**जो जारिसओ कालो, भरहेरवएसु होइ वासेसु ।**

**ते तारिसया तइया, अडयालीसं तु निज्जवगा ॥ ४३०२॥**

[जी.भा.४३४,नि.भा.३८८५]

**यो यादृशः कालो भरतेष्वैरवतेषु च वर्षेषु भवति ते तदा तादृशा**स्तत्कालानुरूपिणो **निर्यापका अष्टचत्वारिंशद**वसातव्याः ॥४३०२॥

**एए खलु उक्कोसा, परिहायंता हवंति तिन्नेव ।**

**दो गीयत्था तइए, असुन्नकरणं जहन्नेणं ॥ ४३०३॥** दारं १५।

[जी.भा.४३७,नि.भा.३८८३]



एतेऽनन्तरोदितसङ्ख्याकाः **खलु उत्कर्षा** उत्कृष्टाः । ते चैकैकपरिहाण्या **परिहीयमानाः** तावद् **भवन्ति** यावज्जघन्येन कृतभक्तप्रत्याख्यानेन सह **त्रयः**। तत्र **द्वौ गीतार्थौ** निर्यापकौ,

**तृतीयो** भक्तप्रत्याख्याता। तत्रायं च विधिः— एकस्य गीतार्थस्य भक्त-पानमार्गणाय गमनम् द्वितीयेन च **तृतीये** तृतीयस्य भक्तप्रत्याख्यातुः **अशून्यकरणम्** एकः तत्पार्श्वे तिष्ठति अपरो भक्त-पानमार्गणाय गच्छतीति भावः॥ ४३०३॥

गतं निर्यापकद्वारम् १५। अधुना 'दव्वदायणा चरिमे' [गा.४२०९]इत्यस्य द्वारस्य व्याख्यानार्थमाह–

**तस्स य चरिमाहारो, इट्ठो दायव्वो तण्हछेयट्ठा।**
**सव्वस्स चरमकाले, अतीव तण्हा समुप्पज्जे ॥ ४३०४॥**

[जी.भा.४३८]

भक्तप्रत्याख्यायकस्य **सर्वस्यापि चरमकाले अतीव तृष्णा** आहारकाङ्क्षा **समुत्पद्यते** तेन तस्य भक्तप्रत्याख्यातुकामस्य **तृष्णाछेदार्थम्** आकाङ्क्षाव्यवच्छेदाय **इष्टश्चरमाहारो दातव्यः**॥ ४३०४॥

कीदृशः? इत्याह—

**नव विगति सत्त ओयण, अट्ठारसवंजणुच्चपाणं च ।**
**अणुपुव्विविहारीणं, समाहिकामाण उवहरिउं ॥ ४३०५ ॥**

[जी.भा.४३९,नि.भा.३८८७]

**नव विकृतयो**ऽवगाहिमदशमाः, शाल्यादिभेदतः **सप्तविध ओदनः**, **अष्टादशव्यञ्जनानि** शास्त्रप्रसिद्धानि, **उच्चम्** अतिप्रशस्यं **पानं** द्राक्षपानादि, एतत् सर्वम् **आनुपूर्वीविहारिणाम्** आनुपूर्व्या शनैः शनैराहारमोचनेन भक्तप्रत्याख्यानं प्राप्तवतां **समाधिकामानां** समाधिमभिलषतां समाधिकरणनिमित्तम् **उपहृत्य** दत्त्वा तस्य तृष्णाव्यवच्छेदः क्रियते॥ ४३०५॥
अथवा-

**काल-सहावाणुमतो, पुव्वं झुसितो सुतो व दिट्ठो वा ।**
**झोसिज्जइ सो से तह, जयणाए चउव्विहाहारो ॥ ४३०६ ॥**

[जी.भा.४४०,नि.भा.३८८८]

**कालानुमतः स्वभावानुमतश्च** तेन य **पूर्वमाहारः योषितः** सेवितः । स कथं

साधुभिर्ज्ञातव्य ईदृश एतस्य कालस्वभावानुमत आहारः? [इत्याह] **श्रुतो वा** कस्यापि कथनतः, **दृष्टो वा** कदाचित् साक्षाद्दर्शनात् परिज्ञातो यथैतस्य ईदृश आहारो रोचत इति। **स** चतुर्विधः अशन-पान-खादिम-स्वादिमरूपो **यतनया** प्रथमत उद्गमादिशुद्धस्यालाभे पञ्चकपरिहाण्या याचित्वा **तस्य** भक्तं प्रत्याख्यातुकामस्य **झोष्यते** दीयत इत्यर्थः ॥ ४३०६ ॥

अथ को गुणस्तस्य चरमाहारेण दत्तेन? इत्यत आह-

**तणहाछेयम्मि कए, न तस्स तहियं पवत्तए भावो।**
**चरमं च एस भुंजइ, सद्धाजणणं दुपक्खे वि॥ ४३०७॥**

[जी.भा.४४१,नि.भा.३८८९]

तेन चरमाहारेण प्रदत्तेन **तृष्णाछेदे** आहारकाङ्क्षाव्यवच्छेदे **कृते** भूयः **तत्र** आहारविषये **न तस्य भाव** इच्छा **प्रवर्त्तते,** वक्ष्यमाणवैराग्यभावनाप्रवृत्तेः। तथा **चरमाहारमेष** भुङ्क्ते इति **श्रद्धाजननं द्विपक्षेऽपि** भक्तप्रत्याख्यातुर्निर्यापकाणां चेत्यर्थः। तथाहि—भक्तप्रत्याख्याता इदं चिन्तयति— अहमभ्युद्यतमरणसमुद्रस्य तीरं प्राप्तः, दुर्लभमेतत्, निस्तीर्णोऽहं संसारादिति

गाढतरं ध्यानमुपगतो भवति। निर्यापकाश्चिन्तयन्ति— वयमप्येवमभ्युद्यतमरणस्य तीरं प्राप्ता भविष्यामः । यस्मादेते चरमाहारदाने गुणास्तस्मादवश्यं स दातव्यः॥ ४३०७॥

अथ तृष्णाव्यवच्छेदे केनाऽऽकारेण तस्य वैराग्यभावना प्रवर्त्तते? इत्याह—

**किं व तं नोवभुत्तं मे, परिणामाऽसुइं सुइं?**

**दिट्ठसारो सुहं झाइ, चोयणेसेव सीयतो॥ ४३०८॥** [जी.भा.४४२,नि.भा.३८९०]

चरमाहारे प्रदत्ते तृष्णाव्यवच्छेदे च जाते स एवं वैराग्यमापन्नश्चिन्तयति— **किं वा तदस्ति** भोज्यं यत् पूर्वं गृहवासे प्रव्रज्यापर्याये वा **मया नोपभुक्तम्?** परं **शुच्य**पि तद् भुक्तं **परिणामात्** परिणामवशेनाऽ**शुचि** सञ्जायते। तथा आहारसंज्ञोपयुक्तो जीवः कर्मणो बन्धको भवति, आहारगृद्धेर्निवृत्तः सुखभागी। एवं प्रत्यक्षत आगमतश्च **दृष्टसारः** उपलब्धतत्त्वः **सुखं** धर्मध्यानं **ध्यायति**। तथा यदि चरमाहारे प्रदत्ते भूयस्तत्रैवानुबन्धतः प्रसीदति तदैतस्य तथा **सीदतः एषैव** अधिकृतश्लोकार्थरूपा **चोदना** प्रज्ञापना कर्त्तव्या॥ ४३०८॥

'झोसिज्जइ सो से तह जयणाए चउव्विहाहारो' [गा. ४३०६] इत्यस्य व्याख्यानमाह—

**तिविहं तु वोसिरिहिइ सो, ताहे उक्कोसगाइं दव्वाइं ।**
**मग्गित्ता जयणाए, चरमाहारं पदंसंति ॥ ४३०९ ॥**[जी.भा.४४४,नि.भा.३८९१]

**त्रिविधं** मनसा वाचा कायेन **सः** भक्तं प्रत्याख्यातुकाम आहारं **व्युत्स्त्रक्ष्यति तत उत्कृष्टानि द्रव्याणि यतनया** उद्गमादिशुद्धालाभे पञ्चकपरिहाण्या **मार्गयित्वा** याचित्वा **चरममाहारं** तस्य **प्रदर्शयन्ति** ॥ ४३०९ ॥

**पासित्तु ताणि कोई, तीरप्पत्तस्स किं ममेतेहिं ?**
**वेरग्गमणुप्पत्तो, संवेगपरायणो होइ**[1] **॥ ४३१० ॥** [जी.भा.४४५,नि.भा.३८९२]

**तानि** उत्कृष्टानि **द्रव्याणि दृष्ट्वा 'कश्चित् तीरप्राप्तस्य** अभ्युद्यतमरणसमुद्रपारमुपागतस्य **ममैतैः किं** कार्यम्?' इत्येवं **वैराग्यमनुप्राप्तः संवेगपरायणः** सर्वथानिवृत्ताहाराभिलाषो **भवति** ॥४३१० ॥



---

१. इतोऽग्रे जीतकल्प भाष्ये ४४६ गाथा इत्थम्- 'देसं भोच्चा कोइ, धिद्धिकार इमेण किं मेत्ति। वेरग्गमणुपत्तो, संवेगपरायणो होइ॥'

**सव्वं भोच्चा कोई, मणुण्णरसपरिणतो भवेज्जाहि ।**

**तं चेवऽणुबंधतो, देसं सव्वं च गेहीए ॥ ४३११ ॥** [जी.भा.४४७,नि.भा.३८९५]

**कोऽपि** पुनः **सर्वमुत्कृष्टं भुक्त्वा मनोज्ञरसपरिणतः** उत्कृष्टरसगृद्धो **भवति,** ततो **देशं सर्वं वा गृद्ध्या तमेव** उत्कृष्टमाहारम् **अनुबध्नन्** अभिलषन् तिष्ठति ॥४३११॥

**विगतीकयाणुबंधे, आहारऽणुबंधणाए वोच्छेदो** । दारं १६।

**परिहायमाण दव्वे, गुणवुड्ढि समाहि अणुकंपा ॥ ४३१२॥**

[जी.भा.४४८,नि.भा.३८९६]

**विकृतिषु कृतो योऽनुबन्धस्तस्मिन्** सति **आहारानुबन्धनायां** च सत्यां तस्य विकृत्यनुबन्धस्याहारानुबन्धस्य च ''किं व तं नोवभुत्तं मे ? परिणामाऽसुइं'' इति प्रकारेण **व्यवच्छेदः** कर्त्तव्यः ॥ [गतं दव्वदायणाद्वारम्] १६। सम्प्रति हानिद्वारमाह—

**परिहायमाण** इत्यादि। यानि चरमाहारद्रव्याण्यानीतानि तानि तद्विषयमनुबन्धं कुर्वतः परिमाणतो **द्रव्यतश्च परिहीयमाणानि** कर्त्तव्यानि। अथ किं कारणं यदाहारेऽनुबन्धं कुर्वतो

भक्तं पानं च दीयते ? उच्यते— **गुणवुड्ढि समाहि अणुकंपा** इति । स भक्तं प्रत्याख्यातुकामोऽनुकम्पनीयः, अनुकम्प्यमानस्य समाधिमरणप्रसक्तेः, ततोऽनुकम्पित आहारे प्रदत्ते सति तस्य समाधिरुपजायते, समाहितश्च प्रज्ञापयितुं शक्यः, प्रज्ञापितश्चाहारव्यवच्छेदं करिष्यतीति, ततोऽभ्युद्यतमरणे गाढं ध्यानोपगतस्य **गुणवृद्धिः** कर्मनिर्जरा भवति ॥ ४३१२ ॥

अथ चरमाहारद्रव्याणां परिमाणतो द्रव्यतश्च हानिः कथं कर्त्तव्या ? इत्यत आह—

**दविय परिमाणतो वा, हावेंति दिणे दिणे व जा तिन्नि ।**
**बेंति न लब्भति दुलभे, सुलभम्मि य होइमा जयणा ॥ ४३१३ ॥**

[जी.भा.४४९]

चरमाहारद्रव्याणि **द्रव्यसङ्ख्यया परिमाणतश्च दिने दिने** तावद् **हापयन्ति यावत् त्रीणि** दिनानि। तत्र परिमाणतो दिने दिने स्तोकं स्तोकतरमानयन्ति। द्रव्यपरिहानिः पुनरेवम्— यदि क्षीरं चरमाहारार्थतया समानीतं ततो द्वितीयदिवसे तन्नाऽऽनयन्ति किन्तु दध्यादिकम्, अथ चरमाहारार्थतया दध्यानीतं ततो द्वितीयदिने क्षीराद्यानयन्ति न तु दधि, एवं द्रव्यपरिहानिस्त्रीन् दिवसान्, ततः परं न किञ्चिदानीयते। तत्र **दुर्लभ**द्रव्यविषये एवं **ब्रुवते न लभ्यते । सुलभे** तु द्रव्ये **इयं** वक्ष्यमाणा **यतना** भवति ॥ ४३१३ ॥

तामेवाह—

**आहारे ताव छिंदाहि गेहिं तो णं चइस्ससि ।**

**जं वा भुत्तं न पुव्विं ते तीरप्पत्तो तमिच्छसि ॥ ४३१४॥** दारं १७।

[जी.भा.४५०,नि.भा.३८९८]

**आहारे** आहारविषयां **तावद् गृद्धिं छिन्द्धि, ततः** शरीरं **त्यक्ष्यसि,** नान्यथा। यथा [यत] **पूर्वं त्वया** निःस्पृहतया **न भुक्तं** त[दि]दानीमभ्युद्यतमरणसमुद्रस्य **तीरं प्राप्त इच्छसि** । एवमनुशासनेन तस्याऽऽहारकाङ्क्षा विनिवर्त्तते ॥ ४३१४॥

गतं हानिद्वारम् १७ । इदानीम् 'अपरितान्तद्वार'माह—

**वट्टंति अपरितंता, दिया व रातो व सव्व पडिकम्मे ।**

**पडियरगा [1]गुणरयणा, कम्मरयं निज्जरेमाणा ॥ ४३१५॥**

[जी.भा.४५१,नि.भा.३८९९]



१. ला. मु.। गुणकरगा-पु.प्रे.॥

**सर्वे प्रतिचारका गुणरत्नाः कर्मरजो निर्जरयन्तः** तस्य कृतभक्तप्रत्याख्यानस्य प्रतिकर्मणि **दिवा रात्रौ वाऽपरितान्ता वर्त्तन्ते ॥ ४३१५॥**

**जो जत्थ होति कुसलो, सो उ न हावेइ तं सइ बलम्मि ।**
**उज्जुत्ता सनियोगे, तस्स वि दीवंति तं सद्धं ॥ ४३१६॥**

[जी.भा.४५२,नि.भा.३९००]

**यः यत्र** प्रतिकर्मणि **भवति कुशलः सः तत्** प्रतिकर्म **सति बले न हापयति,** किन्तु सर्वेऽपि स्वस्व**नियोगे उद्युक्ता**स्तथा वर्त्तन्ते यथा **तस्यापि** कृतभक्तप्रत्याख्यानस्य **ताम्** अभ्युद्यतमरणसमुद्रतीरप्राप्तत्वविषयां **श्रद्धां दीपयन्ति** ॥ ४३१६॥

**देहवियोगो खिप्पं, व होज्ज, अहवा वि कालहरणेणं ।**
**दोण्हं पि णिज्जरा वड्ढमाण गच्छो उ एयट्ठा ॥ ४३१७॥** दारं १८।

[जी.भा.४५३,नि.भा.३९०१]

तस्य कृतभक्तप्रत्याख्यानस्य **देहवियोगः क्षिप्रं वा भवेद् अथवा कालहरणेन** तथापि स्वस्वनियोगोद्युक्तैस्तैर्भवितव्यम् । एवं च **द्वयानामपि** प्रतिचारकाणां प्रतिचर्यस्य च **प्रवर्द्धमाना निर्जरा** कर्मनिर्जरा भवति। **गच्छो ह्येतदर्थं** परस्परोपकारेणोभयेषां निर्जरा स्यादित्येव-मर्थमासेव्यते ॥४३१७॥

[१]गतमपरितान्तद्वारम् १८। अधुना निर्जराद्वारमाह—

**कम्ममसंखेज्जभवं, खवेइ अणुसमयमेव आउत्तो ।**

**अन्नतरगम्मि जोगे, सज्झायम्मी विसेसेणं ॥ ४३१८॥**

[जी.भा.४५४,नि.भा.३९०२]

**अन्यतरस्मिन्यो योगे** प्रतिलेखनादिरूपे **आयुक्तः** उपयुक्तस्सन् **अनुसमयमेव** प्रतिक्षणमेव **कर्म असङ्ख्येयभवोपार्जितं क्षपयति**। कर्मणोऽनन्तकालमवस्थानाभावादसङ्ख्येय-भवमित्युक्तम्। **स्वाध्याये** पुनरायुक्तस्सन् **विशेषेण** कर्म क्षपयति ॥ ४३१८॥



---

१. गतम = परित्रा° पु.प्रे.मु. सर्वत्र॥

**कम्ममसंखेज्जभवं, खवेइ अणुसमयमेव आउत्तो ।**

**अन्नतरगम्मि जोगे, काउस्सग्गे विसेसेणं ॥ ४३१९ ॥**

**कम्ममसंखेज्जभवं, खवेइ अणुसमयमेव आउत्तो ।**

**अन्नतरगम्मि जोगे, वेयावच्चे विसेसेणं ॥ ४३२० ॥**

**कम्मसंखेज्जभवं, खवेइ अणुसमयमेव आउत्तो ।**

**अन्नतरगम्मि जोगे, विसेसओ उत्तमट्ठम्मि ॥ ४३२१ ॥** दारं १९।

[जी.भा.४५५-७,नि.भा.३९०३-५]

गाथात्रयमपि प्राग्वत् । नवरम्—**उत्तमार्थे** उत्तमार्थप्रपन्नस्य **वैयावृत्त्ये** च विशेषतः कर्मनिर्जरा भवतीति शेषः, तत उभयत्रापि यतितव्यम् ॥ ४३१९ ॥ ४३२० ॥ ४३२१ ॥ गतं निर्जराद्वारम् १९। संस्तारकद्वारमाह—

**संथारो उत्तमट्ठे, भूमि-सिला-फलगमादि णायव्वो ।**
**संथार-पट्टमादी, दुगचीराई बहू वा वि ॥ ४३२२॥**

[जी.भा.४५८,नि.भा.३९०६]

**उत्तमार्थे** व्यवस्थितस्य **संस्तारको** दातव्यो **भूमिरूपः शिला** वा प्रधानशिलातलरूपः। एतौ च द्वावपि अस्फुटितावझुषिरौ च कर्त्तव्यौ, तत्र स्थितो वा निषण्णो वा यथासमाधि तिष्ठतु। **फलकं** वा संस्तारको **ज्ञातव्यः**। तच्च फलकमेकाङ्गिकमानेतव्यम्। तस्याभावे द्व्यादिफलकात्मकः, तस्याप्यभावे निरन्तरकं त्र्यात्मको ज्ञातव्यः। एतद् **आदि**शब्दस्य व्याख्यानम्। इदानीमास्तरणमाह— **संस्तारः सोत्तरपट्ट** इत्येतत् प्रस्तरणमुत्सर्गतः। अपवादत आह— **बहू वा वि** यदि सोत्तरपट्टसंस्तारकमात्रे तस्यासमाधिरुपजायते तदा **बहून्यपि** प्रस्तार्यन्ते तस्य कल्पप्रभृतीनि ॥ ४३२२॥



**तह [१] वि असंथरमाणे, कुसमादीणि [२] तु अज्झुषिरतणाइं ।**
**तेसऽसइ असंथरणे व, झुसिरतणाइं ततो पच्छा ॥ ४३२३॥** [जी.भा.४५९]

१. वि य सं° ला.॥ २. पिंतु अझु° ला.॥

अथ कल्पप्रभृतिसंस्तरणेऽपि तस्यासमाधिरुपजायते तदा **कुशादीनि** दर्भादीनि **अझुषिराणि तृणानि** प्रस्तार्यन्ते। **तेषाम् असति** अभावे **असंस्तरणे वा** सति **ततः पश्चाद् झुषिराण्यपि तृणान्यानीयन्ते** ॥ ४३२२॥

**कोयव पावारग नवयतूलि आलिंगणी य भूमीए ।**

**एमेव अणाहियासे, संथारगमाइ पल्लंके ॥ ४३२४॥** दारं २०।

[तुला-जी.भा.४६०,नि.भा.३९०७]

यदि तृणेष्वपि प्रस्तारितेषु न समाधिस्तदा **कोयवः** दोअडीए प्रस्तार्यते। तत्रापि समाधेरनुत्पादे **प्रावारकः**। तत्राप्यसमाधौ **नवतं** जीणम्। तत्रापि समाधेरलाभे **तूली आलिङ्गिनी** चोभयतः प्रस्तार्यन्ते। एतत् सर्वं **भूमौ** कर्त्तव्यम्। अथै**वमपि 'नाध्यास्ते'** न समाधिं प्राप्नोति तदा **संस्तारकादि** पूर्वक्रमेण **पल्यङ्के** प्रस्तारणीयम्। यावत् पर्यन्ते तूलिका उभयत आलिङ्गिनी च॥ ४३२४॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



गतं संस्तारकद्वारम् २०। इदानीमुद्वर्त्तनादिद्वारमाह—

**पडिलेहण संथारं, पाणग उव्वत्तणाइ निग्गमणं ।**
**सयमेव करेइ सहू, असहुस्स करेंति अन्ने उ ॥ ४३२५ ॥**

[जी.भा.४६१,नि.भा.३९०८]

यो भक्तप्रत्याख्याता **सहः** समर्थः स **स्वयमेवा**ऽऽत्मीयस्योपकरणस्य **प्रत्युपेक्षणं संस्तारकं** संस्तारकप्रदानं **पानकं** पानककरणं **उद्वर्त्तनादि** उद्वर्त्तनाऽपवर्त्तने अन्तःप्रदेशाद् बहि**र्निर्गमनम्,** उपलक्षणमेतत्, बहिःप्रदेशादन्तःप्रवेशनं **करोति** । **असहस्य** असमर्थस्य पुनरन्ये सर्वं **कुर्वन्ति** ॥ ४३२५ ॥

कथम्? इत्याह—

**कायोवचितो बलवं निक्खमण पवेसणं च से कुणति ।**
**तह वि य अविसहमाणं, संथारगयं तु संचारे ॥ ४३२६ ॥**

[जी.भा.४६२,नि.भा.३९१०]



For Private And Personal

[यः] **कायेन** शरीरेणोपचितो **बलवान्** से **तस्य** अन्तःप्रदेशाद् बहि**र्निष्क्रामणं** बहिःप्रदेशादन्तः**प्रवेशनं करोति । च**शब्दादन्यच्चोद्वर्त्तनाऽपवर्त्तनादिकम्। सञ्चार्यमाणोऽपि सोऽवष्टम्भतः सञ्चार्यते । अथ **तथापि** सः 'न विसहते' न समाधिं प्राप्नोति तदा तं तथा **अविषहमाणं संस्तारगतं सञ्चारयन्ति** ॥ ४३२६ ॥

**संथारो मउओ तस्स, समाहिहेउं तु होइ कायव्वो ।**
**तह वि य अविसहमाणे, समाहिहेउं उदाहरणं ॥ ४३२७॥**

[तुला-जी.भा.४६३,नि.भा.३९०९]

**समाधिहेतोः** समाधेरुत्पादनाय **तस्य** संस्तारको **मृदुको भवति कर्त्तव्यो** यावत् पल्यङ्के तूल्या आलिङ्गनपट्टिकायाश्च समास्तरणमिति। **तथापि अविषहमाणे** समाधिमलभमाने **समाधिहेतोः** समाधिसम्पादनाय इदं वक्ष्यमाणम् **उदाहरणम्** उदाह्रियते प्रोत्साह्यतेऽनेनेत्युदा-हरणम् ॥ ४३२७ ॥

**धीरपुरिसपण्णत्ते, सप्पुरिसनिसेविए परमरम्मे ।**

**धण्णा सिलायलगया, निरवेयक्खा निवज्जंति ॥ ४३२८॥**

[जी.भा.४६४,नि.भा.३९९१]

**धन्याः** केचन **धीरपुरुषप्रज्ञप्ते** तीर्थकर-गणधरप्ररूपिते **सत्पुरुषनिषेविते** तीर्थकरादिभिरासेविते **परमरम्ये शिलातले गताः** व्यवस्थिताः **निरपेक्षाः** परापेक्षारहिताः **निपद्यन्ते** नितरामभ्युद्यतमरणं प्रपद्यन्ते ॥ ४३२८॥

**जति ताव सावयाकुलगिरिकंदर-विसमकडय-दुग्गेसु ।**

**साहिंति उत्तमट्ठं, धितिधणिय सहायगा धीरा ॥ ४३२९॥**

**किं पुण अणगारसहायगेण अन्नोन्न संगहबलेण ।**

**परलोइएण सक्को, साहेउं उत्तमो अट्ठो[१] ॥ ४३३०॥**

[जी.भा.४६५-६,नि.भा.३९९२३]

**यदि तावद् धृतिरेव** केवला **धणियं**— अत्यर्थं सहाया येषां ते धृतिधनितसहायका धीराः **श्वापदाकुलेषु गिरिकन्दरेषु विषमेषु कटकेषु** विषमेषु च **दुर्गेषु उत्तमार्थं साधयन्ति** ॥ ४३२९ ॥ **किं पुनरनगारसहायकेन परलोकिकेन** परलोकार्थिना **अन्योन्यसङ्ग्रहबलेन शक्यः साधयितुमुत्तमार्थ** इति ॥ ४३३० ॥

**जिणवयणमप्पमेयं, महुरं कण्णाहुतिं सुणेंताणं ।**
**सक्को हु साहुमज्झे, संसारमहोयहिं तरिउं ॥ ४३३१ ॥**

[जी.भा.४६७,नि.भा.३९१४]

**जिनवचनमप्रमेयम्, मधुरं** ललितपदविन्यासात्मकत्वात्, **कर्णयोराहुतिमिव** कर्णाहुतिं पावकस्य घृताहुतिमिव, कर्णयोराप्यायकमिति भावः। **शृण्वतां साधुमध्ये** स्थितानाम् अक्लेशेन **शक्यः संसारमहोदधिस्तरीतुमिति** ॥ ४३३१ ॥

**सव्वे सव्वद्धाए, सव्वन्नू सव्वकम्मभूमीसु ।**
**सव्वगुरु सव्वमहिया, सव्वे मेरुम्मि अहिसित्ता ॥ ४३३२ ॥**

**सव्वाहि वि लद्धीहिं, सव्वे वि परीसहे पराइत्ता ।**
**सव्वे वि य तित्थयरा, पातोवगया उ सिद्धिगया ॥ ४३३३ ॥**

[जी.भा.४६८-९,नि.भा.३९१५-६]

**सर्वे सर्वज्ञाः सर्वासु कर्मभूमिषु सर्वस्यामद्धायाम्** अतीताऽनागतरूपायां **सर्वगुरवः सर्वमहिताः सर्वे मेरावभिषिक्ताः सर्वाभिः** आमर्षौषध्यादिभि**र्लब्धिभि**रुपेताः **सर्वेऽपि च तीर्थकराः** तीर्थप्रवर्त्तनशीलाः **सर्वान् परीषहान् पराजित्य पादपोपगताः सिद्धिगताः** ॥ ४३३२ ॥ ४३३३ ॥

**अवसेसा अणगारा, तीय-पडिपुण्णऽणागया सव्वे ।**
**केई पादोवगया, पच्चक्खाणिंगिणी केई ॥ ४३३४ ॥**

[जी.भा.४७०,नि.भा.३९१७]

[**अवशेषाः**] **सर्वेऽपि च अनगारा अतीताः प्रत्युत्पन्ना अनागताश्च केचित्** प्रथमसंहननोपेताः **पादपोपगताः**, केचित् **प्रत्याख्यानं** भक्तपरिज्ञां **केचिदिङ्गिनीं** प्रतिपन्नाः ॥ ४३३४ ॥

**सव्वातो अज्जातो, सव्वे वि य पढमसंघयणवज्जा ।**
**सव्वे य देसविरया, पच्चक्खाणेण उ मरंति ॥ ४३३५ ॥**

[जी.भा.४९१,नि.भा.३९१८]

**सर्वा अप्यार्यिकाः सर्वेऽपि च प्रथमसंहननवर्जाः सर्वेऽपि च देशविरताः प्रत्याख्यानेन** भक्तपरिज्ञारूपेण इङ्गिनीरूपेण वा **म्रियन्ते** ॥ ४३३५ ॥

**सव्वसुहप्पभवाओ, जीवियसाराओ सव्वजणयातो ।**
**आहाराओ रयणं, न विज्जइ हु उत्तमं लोए ॥ ४३३६ ॥**

[जी.भा.४७२,नि.भा.३९१९]

सर्वस्य सुखस्य प्रभवः—उत्पादकारणं **सर्वसुखप्रभवस्तस्मात्, जीवितसाराद्** ''**अन्नं वै प्राणाः**'' [ ]इति वचनात्, **सर्वस्य** जगतो **जनकस्तस्मात् आहारमन्तरेण** कस्याप्युत्पत्तेरभावात्, इत्थम्भूतादाहारादन्य**दुत्तमं रत्नं लोके न विद्यते,** किन्त्वाहार एव सर्वोत्तमं रत्नम् ॥ ४३३६ ॥

रत्नत्वमेव भावयति—

**विग्गहगए य सिद्धे, य मोत्तु लोयम्मि जेत्तिया जीवा ।**
**सव्वे सव्वावत्थं, आहारे होंति उवउत्ता ॥ ४३३७॥**

[जी.भा.४७३,नि.भा.३९२०]

**विग्रहगतान्** विग्रहगत्यापन्नान् **सिद्धांश्च मुक्त्वा** शेषा **यावन्तो लोके जीवास्ते सर्वे सर्वावस्थं** सर्वास्ववस्थासु **आहारे उपयुक्ताः भवन्ति** वर्त्तन्ते, अत आहारः परमरत्नम् ॥४३३७॥

**तं तारिसयं रयणं, सारं जं सव्वलोयरयणाणं ।**
**सव्वं परिच्चयित्ता, पादोवगया पविहरंति ॥ ४३३८॥**

[जी.भा.४७४,नि.भा.३९२१]

**यत् सर्वलोकरत्नानां** मध्ये **सारम्,** तेषु सत्स्वपि तृप्तेरभावात्, आहाररूपं **रत्नम् । तत् तादृशं सर्वं परित्यज्य** धन्याः **पादपोपगताः प्रविहरन्ति** ॥ ४३३८॥

**एयं पादोवगमं, निप्परिकम्मं जिणेहिं पन्नत्तं ।**
**जं सोऊणं खमओ, ववसायपरक्कमं कुणति ॥४३३९॥** दारं २१।

[जी.भा.४७५,नि.भा.३९२२]

**एतत् पादपोपगमनं** मरणं **जिनैर्निष्प्रतिकर्म प्रज्ञप्तम्। यत् श्रुत्वा क्षपको व्यवसायपराक्रमं करोति।** गतमुद्वर्त्तनादिद्वारम् २१। अधुना 'सारेऊण य कवयं' [गा.४२१०] इति द्वारव्याख्यानार्थमाह—

**कोई परीसहेहिं, वाउलिओ वेयणाद्दिओ वा वि ।**
**ओहासेज्ज कयाइं, पढमं बीयं च आसज्ज ॥ ४३४०॥**

[जी.भा.४७६,नि.भा.३९२३]

**कश्चित्** प्रथम-द्वितीय**परीषहाभ्यां 'व्याकुलितः'** ध्यानाच्चालितो यदि वा **वेदनया**-पीडया **अर्दितः**-पीडितो **अवभाषेत** याचेत **कदाचित् 'प्रथमम्'** अशनं **द्वितीयं** वा पानकं **आसाद्य** अधिकृत्य॥ ४३४०॥

ततः किं कर्तव्यम् ? अत आह—

**गीयत्थमगीयत्थं, सारेउं मतिविबोहणं काउं ।**
**तो पडिबोहिय छट्ठे, पढमे पगयं सिया बिइए ॥ ४३४१ ॥**

[जी.भा.४७७,नि.भा.३९२४]

स भक्तप्रत्याख्यानी कदाचित् प्रान्तया देवतयाधिष्ठितोऽवभाषेत, ततः परिज्ञाननिमित्तं स्मरणं कारयितव्यः । स भण्यते— कस्त्वम् ? गीतार्थोऽगीतार्थो वा?, अथवा दिवसो वर्त्तते रात्रिर्वा? तत्र यदि समस्तमवितथं ब्रूते तदा ज्ञायते न प्रान्तदेवतयाऽधिष्ठितः, किन्तु परीषहत्याजितो याचते। तदेवं **गीतार्थमगीतार्थं** चाऽऽत्मानं **स्मारयित्वा** स्मरणोत्पादनेन यथावस्थित**मतिविबोधनं कृत्वा ततः प्रतिबोध्य षष्ठे** रात्रिभोजने **प्रथमे** अशने **प्रकृतं स्यात् द्वितीये** पानके । किमुक्तं भवति ? अशने पानके च याचिते तस्य भक्त-पानात्मकः कवचभूत आहारो दातव्यः ॥ ४३४१ ॥

आह— किं कारणं प्रत्याख्याप्य पुनराहारो दीयते ? तत आह—

**हंदी ! परीसहचमू, जोहेयव्वा मणेण काएण ।**
**तो मरणदेसकाले, कवयब्भूओ उ आहारो ॥ ४३४२॥**

[जी.भा.४७८,नि.भा.३९२५]

**हंदी**ति चोदकामन्त्रणे। हे चोदक! **परीषहचमूः** परीषहसेना **मनसा कायेन** उपलक्षणमेतत्, वाचा च **योधितव्या,** ततस्तस्याः पराजयनिमित्तं **मरणदेशकाले** मरणसमये योधस्य **कवचभूत** आहारो दीयते ॥ ४३४२॥

एतदेव विभावयिषुरिदमाह—

**संगामदुगं महसिल-रहमुसले चेव तू परूवणया ।**
**असुर-सुरिंदाऽऽवरणं, चेडग एगो गह सरस्स॥ ४३४३॥**

[जी.भा.४७९,नि.भा.३९२६]

**चेटकस्य कोणिकस्य** च परस्परं विग्रहे **कोणिकपक्षे सङ्ग्रामद्वयम्** 'असुरेन्द्रः चमरः कृतवान्। तद्यथा—**महाशिलाकण्टकं रथमुशलं च** । तस्य **प्ररूपणा** यथा **व्याख्याप्रज्ञप्तौ** तथा कर्त्तव्या। **सुरेन्द्रेण** च-शक्रेण कोणिकस्या**ऽऽवरणं** कृतम्, कठिनवज्रमयप्रतिरूपके स

क्षिप्त इत्यर्थः। ततश्चेडकस्य **एकः** सारथिः कोणिकवधाय **शरस्य** कनकप्रहरणविशेषरूपस्य **ग्रहं** कृतवान्॥ ४३४३॥ एतदेव स्पष्टयति—

**[१]महसिलकंटे तहियं, वट्टंते कोणिओ उ रहिएण ।**
**रुक्खग्गविलग्गेणं, पट्ठे पहओ उ कणगेणं ॥ ४३४४॥**

**उप्फिडिउं सो कणगो, कवयावरणम्मि तो ततो पडितो ।**
**तो तस्स कोणिएणं, सीसं छिन्नं खुरप्पेणं ॥ ४३४५॥**

ततो महाशिलाकण्टके सङ्ग्रामे **वर्त्तमाने** कोणिकश्चेटकस्य **रथिकेन** निरन्तरशरमोक्षणत आच्छादितः, परं ते सर्वेऽपि शराः कठिनप्रतिरूपके अभ्यट्याभ्यट्य बहिः पतन्ति । ततो **वृक्षमारुह्य तद्विलग्नेन** कोणिकः **पृष्ठे कनकेन** प्रहरणविशेषेण **प्रहतः, सोऽपि कवचावरणे** कठिनप्रतिरूपके **उत्फिटय ततः** कवचावरणात् परे **पतितः**। ततः कोणिकेन तं तथाध्यवसायं वृक्षविलग्नमवलोक्य कोपावेशात् **तस्य शिरः क्षुरप्रेण छिन्नम्** ॥ ४३४४॥ ४३४५॥



---

**१. गाथापञ्चक ४३४४-८ स्थाने निशीथभाष्ये ३९२८-९ गाथाद्वयम्॥**

**दिट्ठंतस्सोवणओ, कवयत्थाणी इहं तहाऽऽहारो ।**
**सत्तू परीसहा खलु, आराहण रज्जथाणीया॥ ४३४६॥** [जी.भा.४८२]

एषोऽनन्तरोदितो **दृष्टान्तः**। अयं तस्यो**पनयः कवचस्थानीय इह तथारूप आहारः। शत्रवः परीषहाः। राज्यस्थानीया आराधना।** यथा शत्रुपराजयाय कवचमारोप्यते सङ्ग्रामे, तथा परिषहजयाय चरमकाले दातव्यः आहारः ॥ ४३४६॥

अत्रैव दृष्टान्तान्तरमाह—

**जह वाऽऽउंटियपादे, पायं काऊण हत्थिणो पुरिसो ।**
**आरुहइ तह परिन्नी, आहारेणं तु झाणवरं ।। ४३४७ ॥** [जी.भा.४८३]

**यथा वा** कोऽपि **पुरुषो** हस्तिनमारोढुमशक्तो हस्तिनं पादमाकुञ्चापयति, **आकुञ्चाप्य** च तस्मिन् **पादे** आत्मीयं **पादं कृत्वा हस्तिनमारोहति तथा परिज्ञी** भक्तपरिज्ञावान् **आहारेण ध्यानवरम्** उत्तमं ध्यानमारोहति ।। ४३४७ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**उवकरणेहिं विहूणो, जह वा पुरिसो न साहए कज्जं ।**
**एवाऽऽहार परिण्णी, दिट्ठंता तत्थिमे होंति ।। ४३४८ ।।** [जी.भा.४८४]

**यथा पुरुषः उपकरणैः** दात्रादिभि**र्विहीनो न साधयति** लवनादिकं **कार्यम्** **एवमाहार**मन्तेरण **परिज्ञी** भक्तपरिज्ञावान् परीषहपराजयम्। **तत्र इमे** वक्ष्यमाणा **दृष्टान्ता भवन्ति** ॥ ४३४८ ॥

तानेवाह—

**लावए१ पावए२ जोहे, संगामे३ पथिगे४ ति य ।**
**आउरे ५ सिक्खए६ चेव, दिट्ठंता कवए वि य ॥ ४३४९ ॥**

**दात्रेणं[1]१ नावाए२, आउह[2]३ओवाहणो४ सहेहिं ५ च ।**
**उवकरणेहिं६ च विणा, जहसंखमसाहगा सव्वे ।।४३५० ।।**[जी.भा.४८५-६]

---

१. दत्तेणं- ला.। दात्तेणं-मु.॥ २. आउह-पहुवाहणो- ला.। आउह-पहेणो-मु.॥



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



यथा प्रथमश्लोकोक्ता **लावकादयः** सर्वे **यथासङ्ख्यं** दात्रादिभिर्द्वितीयगाथोक्तैर्विना **न साधकाः**। तथाहि— **लावको दात्रेण** विना लवितुं न शक्नोति। **प्लावको नावा** विना नद्यादिकं लङ्घयितुम्। **सङ्ग्रामे योध आयुधैर्विना** शत्रुपराजयम्। **पथिकः** पन्थानं गन्तुं **उपानद्भ्यां** विना। **आतुरः** प्रगुणीभवितु**मौषधै**र्विना। **शिक्षको** वादित्रकर्मादि वादित्रादिभि**रुपकरणैर्विना** ॥ ४३४९ ॥ ४३५० ॥

**एवाऽऽहारेण विणा समाहिकामो न साहए समाहिं ।**
**तम्हा समाहिहेऊ, दायव्वो तस्स आहारो ॥ ४३५१ ॥** [जी.भा.४८७]

**एवं समाधिकाम आहारेण विना समाधिं न साधयति । तस्मात् समाधिहेतोस्त-स्याऽऽहारो दातव्यः** ॥ ४३५१ ॥

अत्राऽऽक्षेप-परिहारावाह—

**सरीरमुज्झियं जेण को संगो तस्स भोयणे ?**
**समाहिसंधणाहेउं दिज्जए सो उ अंतए ॥ ४३५२ ॥**

[जी.भा.४८९,नि.भा.३९३०]



For Private And Personal

अथ **येन शरीरमुज्झितं तस्य भोजने कः सङ्गः** येन तद् याचते ? उच्यते— न स जीविताशानिमित्तमाहारं याचते किन्त्वसमाधिमसहमानः, तत एतदस्माभिर्ज्ञात्वा 'मा तस्यासमाधिना समाधेर्व्याघातो भूयाद्' इति **समाधिसन्धानहेतोः सः** आहारः अन्तके अन्तसमये **दीयते**॥ ४३५२ ॥

केन विधिना? इत्यत आह—

**सुद्धं एसित्तु ठाविंति, हाणीते वा दिणे दिणे।**
**पुव्वुत्ताए उ जयणाए तं तु गोवेंति अन्नहिं ॥ ४३५३ ॥** दारं २२।

[जी.भा.४९०,नि.भा.३९३१]

**शुद्धम्** उद्गमादिदोषरहितमे**षित्वा** गवेषयित्वा **स्थापयन्ति। हानौ वा** शुद्धालाभे **दिने दिने पूर्वोक्तया** पञ्चकहानिलक्षणया **यतनया** गवेषयित्वा **तदन्यत्र गोपयन्ति**। गोपयित्वा प्रतिदिनं संशुद्धस्य यतनया वा अलाभे पर्युषितमपि क्रियते, ततो यथावसरं प्रयच्छन्ति २२॥ ४३५३ ॥

सम्प्रति 'चिह्नकरणद्वारमाह'—

**निव्वाघाएणेवं, कालगए विगिंचणा उ विहिपुव्वं ।**

**कायव्व चिंधकरणं, अचिंधकरणे भवे गुरुगा ॥ ४३५४॥** [जी.भा.४९१]

एवमुक्तेन प्रकारेण **निर्व्याघातेन** व्याघाताभावेन **कालगते** तस्य **विधिपूर्वं विवेचना** परिष्ठापना **कर्त्तव्या** । तथा कर्त्तव्यं **चिह्नकरणम् अचिह्नकरणे** चिह्नकरणस्याभावे प्रायश्चित्तं चत्वारो **गुरुकाः**। तच्चिह्नकरणं द्विधा— शरीरे उपकरणे च, तत्र शरीरे भक्तं प्रत्याख्यातुकामेन लोचः कर्त्तव्यः, यदि प्रत्याख्यातेऽपि भक्ते चिरं जीवतो वाला वर्द्धन्ते तथाप्यवश्यं लोचं करोति कारयति वा, उपकरणे रजोहरणमस्य समीपे क्रियते, चोलपट्टश्चाग्रतः मुखे च मुखपोतिका॥ ४३५४॥

चिह्नकरणाभावे दोषानाह—

**सरीरे उवगरणम्मि य, अचिंधकरणम्मि सो उ राइणिओ।**

**मग्गण-गवेसणाए, गामाणं घायणं कुणति ॥ ४३५५॥** दारं २३॥

[जी.भा.४९२,नि.भा.३९३३]

**शरीरे उपकरणे च अचिह्नकरणे** चिह्ने अकृते अयमन्यो दोषः, **स** कालगतो **रत्नाधिकः** स्यात्, तं चाऽकृतचिह्नं भद्राकृतिं परिष्ठापितं दृष्ट्वा केचिद् गृहस्थाश्चिन्तयन्ति केनाप्येष गृहस्थो बलात्कारेण मारयित्वा त्यक्तः, ततस्तैर्दण्डिकस्य कथितम्, सोऽपि दण्डिकः श्रुत्वा कैश्चिन्मारितो भवेदिति तेषां **मार्गणगवेषणार्थं** तत्प्रत्यासन्न**ग्रामाणां** पञ्चानां दशानां वा **घातनं** दण्डनं वा **कुर्यात्२३** ॥ ४३५५ ॥

सम्प्रति 'अन्तर्बहिर्व्याघाते' इति द्वारमाह—

**ण पगासिज्ज लहुत्तं, परीसहउदएण होज्ज वाघातो ।**
**उप्पन्ने वाघाए, जो गीयत्थाण य उवातो ॥ ४३५६ ॥**

[जी.भा.४९३,नि.भा.३९३४]

स भक्तप्रत्याख्याता गृहिणां **न प्रकाश्यते,** यतः कदाचित् **परीषहस्योदयेन** प्रत्याख्यानस्य **व्याघातः** विलोपः स्यात्। ततः समस्तस्यापि प्रवचनस्य **लघुतो**पजायते। **उत्पन्ने च व्याघाते यो गीतार्थानामुपायः** स प्रयोक्तव्य इति वाक्यशेषः ॥ ४३५६ ॥

**को गीयाण उवाओ? संलेहगओ ठविज्जए अन्नो**
**उच्छहते जइ वऽन्नो, इयरे उ गिलाणपरिकम्मं ॥ ४३५७॥**

**वसभो वा वि ठविज्जइ, अन्नस्सासतिए तम्मि संथारे ।**
**कालगतो त्ति य काउं, संझाकालम्मि नीणंति॥ ४३५८ ॥** [जी.भा.४९४-५]

भक्तप्रत्याख्याता द्विधा एकोऽनेकश्च। ते द्विविधाः ज्ञाता अज्ञाताश्च। ज्ञातो नाम दण्डिकादीनां प्राकृतप्रजानां च विदितस्वरूपः, यथा यावज्जीवमेष भक्तं प्रत्याख्यातवान्। तद्विपरीतोऽज्ञातः। तत्र यदि ज्ञातो भक्तपरिज्ञां न निस्तरति तदा **को गीतार्थानामुपायः** प्रयोक्तव्यः? उच्यते— यदि अन्यो द्वितीयः संलेखं कुर्वन् विद्यते तदा स जवनिकान्तरितः **स्थाप्यते, यो वा अन्यः उत्सहते** स स्थाप्यते, **इतरस्य तु** भक्तपरिज्ञाव्याघातवतो **ग्लानपरिकर्म** क्रियते इति। अथान्यः **संलेखगतो** न विद्यते नाप्यन्यः कश्चिदुत्सहते तदाऽन्यस्य **असति अभावे वृषभः स्थाप्यते तस्मिन्** पूर्वभक्तप्रत्याख्यायकसत्के **संस्तारे**। ततो जवनिकान्तरिततया लोकवन्दापनादि यतनया स करोति। यस्तु भक्तपरिज्ञाविलोपवान् सोऽल्पसागारिकमेकान्ते ध्रियते, धृतस्य च ग्लानपरिकर्म तावत् क्रियते यावत् प्रथमालिकां करोति, ततो जनमध्ये 'रात्रौ स **कालगतः** इति प्रकाश्य

स्वयङ्गमनेन सहायप्रदानतो वा **सन्ध्याकाले** तं **निष्काशयन्ति,** निष्काश्यान्यत्र विहारयन्ति ॥४३५७॥ ४३५८॥

एतदेव भावयति—

**एवं तू नायम्मी, दंडिगमादीहिं होइ जयणा उ ।**
**सयगमण पेसणं वा, खिंसण चउरो अणुग्घाया ॥ ४३५९॥** [जी.भा.४९६]

**एवम्** उक्तेन प्रकारेण **दण्डिकादिभिर्ज्ञाते भवति यतना** ज्ञातव्या—प्रथमालिकाकरणे च **स्वयं** सर्वेषां साधूनां **गमनं** भवति, यदि वा ससहायस्यान्यत्र **प्रेषणम्**। यस्तु तं भक्तपरिज्ञाव्याघातवन्तं **खिंसयति** 'भक्तप्रत्याख्यानप्रतिभग्न एषः' इति तस्य प्रायश्चित्तं **चत्वारो** मासाः **अनुद्धाताः** गुरुकाः। यस्तु न ज्ञातः स यदि न निस्तरति तथापि न प्रवचनस्योड्डाहः ॥ ४३५९॥

गतं सपराक्रमं भक्तप्रत्याख्यानम्। अपराक्रममाह—

**सपरक्कमे जो उ गमो, नियमा अपरक्कमम्मि सो चेव ।**

**नवरं पुण नाणत्तं खीणे जंघाबले गच्छे ॥ ४३६० ॥** दारं २४। [जी.भा.४९७]

**सपराक्रमे** भक्तप्रत्याख्याने **यो गमो**ऽभिहितः **स एवाऽपराक्रमेऽपि नियमाद्वे**दितव्यः, **नवरं पुनरिदं नानात्वम**पराक्रमं क्षीणे **जङ्घाबले** भवति **स्वगच्छे** च। तथाहि—**क्षीणे** जङ्घाबले वृद्धत्वेन मर्त्तुकामः स्वगच्छे भक्तं प्रत्याचष्टे २४ ॥ ४३६० ॥

सम्प्रति व्याघातिममाह—

**एमेव आणुपुव्वी, रोगाऽऽयंकेहिं नवरि अभिभूतो ।**

**बालमरणं पि य सिया, मरेज्ज उ इमेहिं हेऊहिं ॥ ४३६१ ॥** [जी.भा.४९९]

**एवमेव** अनेनैव प्रकारेण **आनुपूर्व्या** क्रमेण व्याघातिमं प्रतिपत्तव्यम् । **नवरं रोगातङ्कैरभिभूतस्सन्** तत् प्रतिपद्यते, एतावान् विशेषः। यदि पुनः **एभिः** वक्ष्यमाणै**र्हेतुभिर्म्रियेत** तदा तद् व्याघातिमं **बालमरणमपि स्यात्** ॥ ४३६१ ॥

तानेव हेतूनाह—

**वालऽच्छभल्लविसविसूइका य आयंक सन्निकोसलए ।**
**ऊसास गद्ध रज्जू, ओमऽसिवेऽभिघाय संबंधो ॥ ४३६२ ॥** [जी.भा.५००]

**व्यालः** गोनसादिः **अच्छभल्लः** ऋक्षः **विषं विसूचिका च** प्रतीता, **आतङ्कः** क्षयादिव्याधिः **संज्ञिकोशलके** कोशलश्रावके प्रत्यनीके सञ्जाते, **उच्छ्वास**निरोधः, **गृध्र**पृष्ठकरणम् **रज्ज्वा** उल्लम्बनम्, **अवमे** दुर्भिक्षे **अशिवे घातः** विद्युदादिभिरभिहतः **सम्बद्धं** वातेन हस्त-पादादिजातम्। एतैर्हेतुभिर्व्याघातिमं बालमरणमपि भवति॥ ४३६२॥

कथम्? इत्याह—

**वालेण गोणसादिण, खदितो होज्जाहि, सडिउमारद्धो।**
**कन्नोट्ठ-नासिगादी, विभंगिया वऽच्छभल्लेहिं ॥ ४३६३ ॥** [जी.भा.५०१]

**व्यालेन गोनसादिना** स **खादितो भवेत्,** ततः **शटितुमारब्धवान्** बालमरणमपि कुर्यात्। यदि वा **अच्छभल्लेन** ऋक्षेण **कर्णौष्ठ-नासिकादीनि विभग्नानि** छिन्नानि भवेयुः ततो बालमरणमाश्रयते ॥ ४३६३॥

विषादिहेतूनाह—

विसेण लद्धो होज्जा वा, विसूइगा वा से उट्ठिया होज्जा ।
आयंको वा [1]कोयी खयमादी उट्ठिओ होज्जा॥ ४३६४॥

तिण्णि उ वारा किरिया तस्स कय हवेज्ज नो उ उवसंतो ।
जह वोमे कोसलेणं, सण्णीणा पंच उ सयाइं ॥ ४३६५ ॥

साहूणं रुद्धाइं, अहइं भत्तं तु तुज्झ दाहामो ।
लाभंतरं च नाउं, लुद्धेणं धन्न विक्कीयं ॥ ४३६६॥ [जी.भा.५०२-४]

विषेण वा कश्चिद् लब्धो भवेत्, विसूचिका वा से तस्य उपस्थिता, आतङ्को वा कोऽपि क्षयादिस्तस्योत्थितो भवेत्, तस्य च त्रीन् वारान् क्रिया कृता परं नोपशान्तस्ततो बालमरणं प्रतिपद्यते। यथा वा अवमे दुर्भिक्षे कोशलेन संज्ञिना श्रावकेण साधूनां पञ्चशतान्यन्यत्र गच्छन्ति रुद्धानि, यथाऽहं भक्तं युष्माकं दास्यामि, तेन च पापीयसा लुब्धेन लाभान्तरं लाभविशेषं ज्ञात्वा धान्यं विक्रीतम्॥ ४३६४-६६॥



---

१. कोई- ला.॥

For Private And Personal

ततः किम्? इत्याह—

**तो नाउ वित्तिछेयं, उसासनिरोहमादिणि कयाइं।**

**अणहीयासिंतेहिं[1], वेयण साहूहि ओमम्मि[2]** ॥ ४३६७॥ [जी.भा.५०५]

[ततो] **ज्ञात्वा वृत्तिच्छेदं** [अवमे] दुर्भिक्षे **वेदनाम् अनध्यासीनैः** असहमानै-**रुच्छ्वासनिरोधादीनि कृतानि।** केचिदुच्छ्वासनिरोधकरणतोऽपरे गृध्रपृष्ठकरणतोऽन्ये रज्ज्वा वैहायसविधानतो बालमरणं प्रतिपन्नवन्तः ॥ ४३६७॥

**अभिघातो वा विज्जू, गिरिभित्ति-कोणयाइ वा होज्जा ।**

**संबद्ध हत्थ-पायादयो व वातेण होज्जाहि** ॥ ४३६८॥ [जी.भा.५०७]

**अभिघातो विद्युता गिरिभित्तेः** पतन्त्याः, गिरि**कोणाद्वा** पततो **भवेत्,** ततो बालमरणम्। अथवा **हस्तपादादयो वातेन सम्बद्धा भवेयु**स्तत आश्रयते बालमरणम् ॥ ४३६८॥

तथा चाह-

१. अणहियासे तेहिं- ला.॥ २. इतोऽग्रे जीतकल्प भाष्ये ५०६ गाथा इत्थम्- 'एवं ता कोसलए अण्णम्मि वि होज्ज एमेव। सहसाछिण्णद्धाणे असिवग्गहिया व कुज्जाहि॥'

**एएहिं कारणेहिं, पंडियमरणं तु काउमसमत्था ।**

**ऊसास गद्धपट्ठं, रज्जुग्गहणं व कुज्जाहि ॥ ४३६९॥**

एतैः अनन्तरोदितैर्व्यालभक्षणप्रभृतिभिः **कारणैः पण्डितमरणं** यथोक्तभक्तप्रत्याख्यानरूपं **कर्तुमसमर्था उच्छ्वास**निरोधं **गृध्रपृष्ठं रज्जुग्रहणं वा कुर्युः** ॥ ४३६९ ॥

अथ किमिति ते व्यालभक्षितादय आत्मानं घातयन्ति? उच्यते-

**अणुपुव्विविहारीणं, उस्सग्गनिवाइयाण जा सोही ।**

**विहरंतए न सोही, भणिया आहारलोवेण ॥ ४३७०॥** [जी.भा.५१०]

ये व्याला-ऽच्छभल्लादिकृतव्याघातरहितास्तेषाम् **आनुपूर्व्या** ऋतुबद्धे मासकल्पतो वर्षावासे चतुर्मासकल्पेन **विहारिणाम् उत्सर्गनिपातिनाम्** उत्सर्गेणैव संयममनुपालयतां या चारित्र**शोधि**र्भवति सा व्याला-ऽच्छभल्लादिव्याघातवति **विहरति न भणिता, शोधिर्न** भवतीत्यर्थः। कस्मान्न भवति? इत्यत आह—**आहारलोपेन** ते हि व्यङ्गत्वादिना कारणेन न

शक्नुवन्ति परिपूर्णामुत्तरगुणविशुद्धिं कर्तुम्, ततो यथावस्थिताहारविलोपतो बालमरणमभ्युपगच्छन्ति ॥ ४३७० ॥

तदेवमुक्तं भक्तप्रत्याख्यानम् । इदानीमिङ्गिनीमरणमाह—

**पव्वज्जादी काउं नायव्वं जाव होतऽवोच्छित्ती ।**

**पंच तुलेऊण य सो, इंगिणिमरणं परिणतो उ ॥ ४३७१ ॥**

[जी.भा.५१२,नि.भा. ३९४०]

**प्रव्रज्यादिकं** प्रव्रज्या शिक्षाग्रहणं व्रतारोहणं अर्थग्रहणम् अनियतं वासं गच्छस्य परिपूर्णस्य निर्वृत्तिम्, गच्छनिर्वृत्तिकरणेन च तीर्थस्याव्यवच्छेदः कृतस्तत आह—तावद् **ज्ञातव्यं यावद्भवति** तीर्थस्या**ऽव्यवच्छित्तिः**, तत्पर्यन्तं कृत्वा **पञ्च** च तपःलयिसूत्र-सत्त्वैकत्व-बललक्षणानि **लयित्वा स इङ्गिनीमरणं परिणतः** प्रतिपन्नो भवति ॥ ४३७१ ॥

अथ भक्तपरिज्ञातोऽस्य को विशेषः ? इत्याह—

**आयप्परपरिकम्मं, भत्तपरिण्णाए दो अणुन्नाया।**
**परवज्जिया[1] य इंगिणि, चउव्विहाहारविरई य ॥ ४३७२ ॥**

[जी.भा.५१३,नि.भा.३९३७]

**भक्तपरिज्ञायां द्वे**[परिकर्मणि] **परिज्ञाते**[अनुज्ञाते] । तद्यथा— **आत्मना** स्वयं **परिकर्म परेण** च। **इङ्गिनी** पुनः **परवर्जिता** परस्तत्र[2] परिकर्म न कार्यते। तथा भक्तपरिज्ञायां **चतुर्विधस्य त्रिविधस्य वाऽऽहारस्य विरति**र्भवति, **इङ्गिन्यां** तु नियमा**च्चतुर्विधाहारविरतिः** ॥ ४३७२ ॥

परपरिकर्मविवर्जनमेव भावयति—

**ठाण निसीय तुयट्टण, इत्तरियाइं जहासमाहीए ।**
**सयमेव य सो कुणती, उवसग्ग-परीसहऽहियासे ॥ ४३७३ ॥**

**संघयण-धितीजुत्तो, नव दस पुव्वा सुएण अंगा वा ।**
**इंगिणि पातोवगमं, णीहारी वा अणीहारी ॥ ४३७४ ॥**

[जी.भा.५१४-५,नि.भा.३९३८-९]

१. यरि॰ ला.मु.॥ २. परेण परि॰ मु.॥

**स्थानम्** उर्ध्वस्थानम्, **निषदनम्** उपवेशनम्, **त्वग्वर्त्तनं** शयनम्, एतानि **इत्वरकाणि स यथासमाधिः स्वयमेव करोति** न तु परतः कारयति । तथा दिव्यादी**नुपसर्गान्** क्षुदादि**परीषहांश्च** सम्यग् **अध्यास्ते** सहते । तथाहि-चतुर्विधाहारप्रत्याख्यानान्नास्य पानकमपि भवति नाप्यपवादतश्चरमाहारदानमिति ॥ ४३७३ ॥ तथा—

**संहननेन** त्रयाणामाद्यानामन्यतमेन **धृत्या च युक्तः**। तथा **श्रुतेन** सूत्रतो यस्य **पूर्वाणि नव दश** वा केवलानि **अङ्गानि स इङ्गिनी**मरणं प्रतिपद्यते॥ गतमिङ्गिनीमरणम् अधुना **पादपोपगमन**मुच्यते-



तदपि प्रव्रज्यादितीर्थाव्यवच्छेदपर्यन्तं कृत्वा पञ्च तपः-सूत्रादि तोलयित्वा च प्रतिपद्यते। तच्च नियमतो निष्प्रतिकर्म निश्चलं च। तथाहि— ऊर्द्धवस्थानेन उपवेशनेन पार्श्वेण वाऽन्येन वा येन स्थानेन स्थितः स यावज्जीवमपि तेन स्थानेन तिष्ठति, न पुनरन्यत् स्थानं तस्य कर्तुं स्वप्रयोगेण कल्पते। तच्च द्विधा-**निर्हारिममनिर्हारिमं** च। तत्र निर्हारिमं नाम यद् ग्रामादीनामन्तः प्रतिपद्यते, ततो हि मृतस्य सतस्तस्य शरीरं निष्काशनीयं भवति। अनिर्हारिमं नाम यद् ग्रामादीनां बहिः प्रतिपद्यते ॥४३७४॥

सम्प्रति पादपोपगमनस्य निरुक्तमाह—

**पातोवगमं भणितं, सम-विसमे पायवो जहा पडितो।**
**नवरं परप्पयोगा, कंपेज्ज जहा चलतरुव्व॥ ४३७५॥** [नि.भा.३९४२]

**पादपोपगमं** नाम **भणितम्** यथा **समे विषमे** वा **पादपः** पतितः तथैवावतिष्ठते तथा यो **यथा** समे विषमे वा **पतितः** स यावज्जीवं तथा तिष्ठति। **नवरं परप्रयोगात् कम्पेत, यथा तरुः** परप्रयोगाच्चलः, पादपस्येवोपगमः अभ्युपगमः पतनस्य यत्र तत्तथेति व्युत्पत्तिः॥ ४३७५॥

**तसपाण-बीयरहिए, वित्थिन्नवियार थंडिलविसुद्धे ।**
**निद्दोसा निद्दोसे, उवेंति अब्भुज्जयामरणं ॥ ४३७६॥**

[जी.भा.५२१,नि.भा.३९४३]

**विशुद्धे स्थण्डले निर्दोषे** । निर्दोषत्वमेवाह— **त्रसप्राण-बीजरहिते विस्तीर्णविचारे** विपुलप्रचारे। यत्र कृष्यमाणस्याप्यस्थण्डिलगमनदोषो न भवति तत्र **निर्दोषाः** साधवः **अभ्युद्यतमरणं** पादपोपगमनमरणम् **उपयन्ति** प्रतिपद्यन्ते ॥ ४३७६॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**पुव्वभवियवेरेणं देवो साहरति को वि पायाले ।**
**मा सो चरिमसरीरो न वेयणं किंचि पाविहिति ॥ ४३७७ ॥**

[जी.भा.५२२,नि.भा.३९४४-३९५६]

**पूर्वभवकर्मवैरेण** कोऽपि **देवस्तं** प्रतिपन्नपादपोपगमनं **पाताले** पातालकलशेषु **संहरेत्, माऽसौ चरमशरीरो न काञ्चिदपि वेदनां प्राप्स्यति** इति कृत्वा। स तथासंहृतस्सम्यक् तमुपसर्गं सहते, न केवलमेनम्, अन्यानपि च ॥ ४३७७॥

तथा चाह-

**उप्पन्ने उवसग्गे, दिव्वे माणुस्सए तिरिच्छे य।**
**सव्वे पराइणित्ता, पायोवगया पविहरंति ॥ ४३७८॥**

[जी.भा.५२३,नि.भा.३९४५]

**उत्पन्नानुपसर्गान् दिव्यान् मानुषान् तैरश्चांश्च सर्वान् पराजित्य पादपोपगता प्रविहरन्ति** ॥ ४३७८॥



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**जह नाम असी कोसे, अन्नो कोसो असी य खलु अन्नो।**
**इय मे अन्नो देहो, अन्नो जीवो त्ति मन्नंति ॥ ४३७९ ॥**

[जी.भा.५४०,नि.भा.३९४६]

**यथा नाम असिः** खड्गः **कोशे** प्रत्याकारे वर्त्तते, तत्रान्यः पृथक् खलु **कोशोऽन्यश्चाऽसिरिति। एवम्** अमुना दृष्टान्तप्रकारेण **ममान्यो देहो अन्यो जीवः**, 'परश्च प्रभवति देहे,न जीवे इति न काचिन्मे क्षतिः।' **इति मन्यते** तथामननाच्च सम्यगुपसर्गान् सहते ॥ ४३७९ ॥

**पुव्वाऽवरदाहिण-उत्तरेहिं वाएहिं आवयंतेहिं ।**
**जह न विकंपति मेरू, तह ते झाणाउ न चलंति ॥ ४३८० ॥** [नि.भा.३९४७]

**यथा मेरुः पूर्वाऽपर-दक्षिणोत्तरैर्वातैरापतद्भिर्न विकम्पते तथा ते** पादपोपगता उपसर्गनिपातेऽपि **ध्यानान्न चलन्ति**॥ ४३८० ॥



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**पढमम्मि य संघयणे, वट्टंता सेलकुड्डसामाणा ।**
**तेसिं पि य वोच्छेदो, चोद्दसपुव्वीण वोच्छेदे ॥ ४३८१ ॥** [नि.भा.३९४८]

**प्रथमे** वज्रर्षभनाराचलक्षणे **संहनने वर्त्तमाना** धृत्या **शैलकुड्यसमानाः** पादपोपगमनं प्रतिपद्यन्ते। **तेषामपि** च पादपोपगमनप्रतिपत्तॄणां **चतुर्दशपूर्वव्यवच्छेदे व्यवच्छेदो**ऽभवत् ॥ ४३८१ ॥

**देव-मणुया उ दुग तिग, अस्से पक्खेवगं सिआ कुज्जा।**
**वोसट्ठ-चत्तदेहो, अहाउयं कोइ पालेज्जा ॥ ४३८२ ॥**

[जी.भा.५२४,नि.भा.३९४९]

**देवा मनुष्या** वा अनुलोमानि प्रतिलोमानि वा द्रव्याणि **द्विकम्** अनुलोमप्रतिलोमलक्षणोभयसहितं तदेव त्रिकम्। अथवा सचित्तमचित्तं वा इति द्विकम् , तदेव मिश्रसहितं **त्रिकम्**। तस्य द्विकस्य त्रिकस्य वा **आस्ये** मुखे **प्रक्षेपं कुर्युः**। स तेनाहारेण मुखे प्रक्षिप्तेन व्युत्सृष्टः प्रतिबन्धाऽभावतस्त्यक्तः परिकर्माकरणतो देहो येन स **व्युत्सृष्टत्यक्तदेहः कोऽपि यथायुः** यथावस्थितमात्मीयमायुः **पालयति** ॥ ४३८२ ॥



For Private And Personal

द्विक-त्रिकाहारव्याख्यानार्थमाह-

**अणुलोमा पडिलोमा, दुगं तु उभयसहिया तिगं होइ ।**
**अहवा चित्तमचित्तं, दुगं तिगं मीसगसमग्गं ॥ ४३८३ ॥**

[जी.भा.५२५,नि.भा.३९५०]

**अनुलोमानि** द्रव्याणि **प्रतिलोमानि** चेति **द्विकम्**। तान्ये**वोभयसहितानि त्रिकम्**। **अथवा सचित्तमचित्तमिति द्विकम्** तदेव **मिश्रसमग्रं त्रिकमिति** ॥ ४३८३ ॥

**पुढवि-दग-अगणि-मारुय-वणस्सइ-तसेसु कोइ साहरइ ।**
**वोसट्ठ-चत्तदेहो, अहाउयं कोइ पालेज्जा ॥ ४३८४॥**

[जी.भा.५२६,नि.भा.३९५१]

**कोऽपि** पादपोपगमं प्रतिपन्नं **पृथिव्यां**-पृथिवीकायमध्ये **उदके**-अप्काये **अग्नौ मारुते**-वायुकाये **वनस्पतिषु त्रसेषु** च **संहरति**, स च तथा संहृतो **व्युत्सृष्ट-त्यक्तदेहो यथायुः कोऽपि पालयति** ॥४३८४॥

**एगंतनिज्जरा से, दुविहा आराहणा धुवा तस्स ।**

**अंतकिरियं व साहू, करेज्ज देवोववत्तिं वा ॥ ४३८५ ॥** [नि.भा.३९५२-३]

**एकान्तेन से तस्य** तथास्थितस्य **निर्जरा** भवति। तथा **तस्य धुवा** द्विविधा सिद्धिगमनयोग्या कल्पोपपत्तियोग्या चाऽऽराधना। यया **साधुरन्तक्रियां कुर्याद् देवोपपत्तिं वा** ॥ ४३८५ ॥

**मज्जण गंधं पुप्फोवयार परिचारणं सिया कुज्जा ।**

**वोसट्ठ-चत्तदेहो, अहाउयं कोई पालेज्जा ॥ ४३८६ ॥** [नि.भा.३९५३]

काचित् रूपातिशयलुब्धा तस्य कृतपादपोपगमस्य मज्जनं स्नानं ततः पटवासादि**गन्धं पुष्पोपचारं** ततः **परिचारणं** गले लगित्वा परिशयन-परिचुम्बनादिरूपं **स्यात्** कदाचित् **कुर्यात्**, तत्र स **व्युत्सृष्ट-त्यक्तदेहः यथायुः कोऽपि पालयति** अरक्त-द्विष्टः सन् सम्यक् तत् सहमानो यावज्जीवमवतिष्ठते ॥ ४३८६ ॥

**पुव्वभवियपेम्मेणं, देवो देवकुरु-उत्तरकुरासु ।**
**कोई तु साहरेज्जा, सव्वसुहा जत्थ अणुभावा ॥ ४३८७ ॥**

[जी.भा.५४४,नि.भा.३९५४]

**पूर्वभविकेन प्रेम्णा कोऽपि देवो यत्र अनुभावाः सर्वे शुभास्तासु देवकुरुषूत्तरकुरुषु वा संहरेत्,** स च तत्र तथासंहृतो व्युत्सृष्ट-त्यक्तदेहो यथायुः कोऽपि पालयति ॥४३८७॥

**पुव्वभवियपेम्मेणं देवो साहरइ नागभवणम्मि ।**
**जहियं इट्ठा कंता सव्वसुहा होंति अणुभावा ॥ ४३८८ ॥** [जी.भा.५४५]

**पूर्वभविकेन प्रेम्णा** कोऽपि **देवो** यत्र **सर्वे शुभा अनुभावा इष्टाः कान्ताश्च भवन्ति** तत्र **नागभवने संहरेत्,** सोऽपि तत्र तथैवावतिष्ठते ॥ ४३८८ ॥

**बत्तीसलक्खणधरो, पातोवगतो य पागडसरीरो ।**
**पुरिसव्वेसणि कन्ना, रायविइण्णा उ गेण्हेज्जा ॥४३८९॥**

[जी.भा.५४६,नि.भा.३९५७]

**द्वात्रिंशल्लक्षणधरः पादपोपगतः** सन् **प्रकटशरीरो** जातः तं **पुरुषद्वेषिणी कन्या राजवितीर्णा** राज्ञा अनुज्ञाता सती **गृह्णीयात्** ॥ ४३८९ ॥

गृहीत्वा किं करोति? इत्यत आह—

**मज्जण गंधं पुप्फोवयार परिचारणं सिया कुज्जा ।**
**वोसट्ठ-चत्तदेहो, अहाउयं कोइ पालेज्जा॥ ४३९०॥**

[तुला-जी.भा.५४७,नि.भा.३९५८]

अस्य व्याख्या प्रागवत् ॥ ४३९० ॥

तथा—

**[१] नवंगसुत्तपडिबोहियाए, अट्ठारसरतिविसेसकुसलाए ।**
**बावत्तरिकलापंडियाए, चोसट्ठिमहिलागुणेहिं च ॥ ४३९१ ॥**

[तुला-जी.भा.५४८]



---

१. अत्र ४३९१ गाथायां प्रथम चरणे इन्द्रवज्रा छन्दः इति ला. टिप्पणे॥

द्वे अक्षिणी द्वौ कर्णौ द्वौ नासापुटौ द्वे जिह्वा-स्पर्शे नवमं मनः, एतानि **नव अङ्गानि** यावदद्यापि यौवनं न भवति तावत् सुप्तानि भवन्ति, न खलु तदानीमेतेषामतीवाभिष्वङ्गः सुखे भवति ततः सुप्तानीति व्यपदिश्यन्ते, यौवने तु प्राप्तकालस्य गुणेन **प्रतिबुद्धानि** जायन्ते। नवाङ्गानि सुप्तानि प्रतिबोधितानि यया सा तथा तया। तथा **अष्टादश**देशीभाषास्तासु मध्ये यस्य यत्र काम**रतिविशेषस्तत्र कुशलया**। तथा **द्वासप्ततिकलापण्डितया। चतुःषष्ट्या महिलागुणै**रुपेतया॥ ४३९१॥

नवाङ्गादिव्याख्यानं तावदाह—

**दो सुत्त-नेत्तमादी, नवंगसुत्ता हवंति एए उ ।**
**देसीभासऽट्ठारस, रतीविसेसे उ इगुवीसं ॥ ४३९२॥** [तुला-नि.भा.३९६०]

**कोसल्लमेक्कवीसइविहं तु एमाइएहिं तु गुणेहिं ।**
**जुत्ताए रूव-जोव्वण-विलास-लावन्नकलियाए ॥ ४३९३॥**

[जी.भा.५४९-५०]

**द्वे श्रोत्रे, द्वे नेत्रे,** आदिशब्दान्नासापुटद्वय-जिह्वा-स्पर्श-मनसां परिग्रहः, **एतानि नवकं** नवकसङ्ख्यानि **सुप्तानि भवन्ति। देशीभाषा अष्टादश,** ताः शास्त्रप्रसिद्धाः। **रतिविशेषः एकोनविंशतितमः** । तत्र **कौशलमेकविंशतिविधं** शास्त्रप्रसिद्धम् । **एवमादिभिर्गुणैर्युक्तया।** तथा **रूपयौवन-विलास-लावण्यकलितया** ॥ ४३९२॥ ४३९३॥

**चउकण्णम्मि रहस्से रागेणं रायदिन्नपसराए ।**
**तिमि-मगरेहि व उदही, न खोभिओ जो मणो मुणिणो ॥ ४३९४॥**

**जाहे पराजिया सा, न समत्था सीलखंडणं काउं ।**
**नेऊण सेलसिहरं, तो से सिल मुंचए उवरिं ॥ ४३९५॥**

[जी.भा.५५१-२,नि.भा.३९६१-२]

**चतुष्कर्णे रहस्ये रागेण** अनुरागेण **राजदत्तप्रसरया** गृह्यते, गृहीत्वा चानेकप्रकारं संक्षोभ आपद्यते, तत्र **यन्मुनेर्मनस्तत्** तया **तिमि-मकरैरिवोदधिर्न क्षोभितम्।** ततो **यदा सा पराजिता न शीलखण्डनं कर्तुं समर्था तदा** रोषात् **शैलशिखरं नीत्वा से तस्योपरि शिलां मुञ्चति** ॥ ४३९४॥ ४३९५॥

**एगंतनिज्जरा से, दुविहा आराहणा धुवा तस्स ।**
**अंतकिरियं च साहू, करेज्ज देवोववत्तिं वा ॥ ४३९६ ॥**

[जी.भा.५४१-५५३,नि.भा.३९५२-३९६३]

इयं प्राग्वत् ॥ ४३९६ ॥

**मुणिसुव्वयंतेवासी, खंदग दाहे य कुंभकारकडे ।**
**देवी पुरंदरजसा, दंडइ पालगक मरुओ य॥ ४३९७॥**

[उत्त.नि.११३जी.भा.५२८,नि.भा.३९६४]



**कुम्भकारकृते** नगरे **दण्डकिर्नाम** राजा। तस्य **देवी पुरन्दरजसा। पालको** नाम **मरुकः** पुरोहितः । तत्र भगवतो **मुनिसुव्रतस्वामिनोऽन्तेवासी स्कन्दको** नाम विहारक्रमेण गतः। स स्वशिष्याणां यन्त्रपीडनेन मारणं विशेषतो बालक्षुल्लकस्योपलभ्य सञ्जातकोपो यन्त्रपीडनेन मारितोऽग्निकुमारेषूत्पद्य जातिं स्मृत्वा समस्तस्यापि देशस्य **दाहं** कृतवान्। शिष्यास्तु समाधिप्राप्ता मृत्युमुपगताः ॥ ४३९७॥

तथा चाह—

**पंच सया जंतेणं, रुट्ठेण पुरोहिएण मलियाइं ।**
**राग-द्दोसतुलग्गं, समकरणं चिंतयंताणं ॥ ४३९८॥**

[जी.भा.५२९,नि.भा.३९६५,उत्त.नि.११४]

**राग-द्वेषतुलाग्रं समकरणं** समभावं **चिन्तयतां** साधूनां **पञ्च शतानि रुष्टेन पुरोहितेन यन्त्रेण मलितानि,** तथापि न तेषां मनागपि ध्यानविक्षोभोऽभवत्। एवमन्यैरपि सोढव्यम् ॥ ४३९८॥

तथा चाह—

**जंतेण करकएण व सत्थेण व सावएहिं विविहेहिं ।**
**देहे विद्धंसंते, न हु ते झाणाओ फिट्टंति॥ ४३९९॥**

[जी.भा.५३०,नि.भा.३९६६]

यन्त्रेण क्रकचेन शस्त्रेण वा खड्गादिना **श्वापदैर्वा विविधैः** शृगालकप्रभृतिभिर्देहे **विध्वस्यमाने न हु** नैव ते पादपोपगता **ध्यानात् स्फिटन्ति** परिभ्रश्यन्ति ॥ ४३९९ ॥

**पडिणीययाए कोई, अग्गिं से सव्वतो पदिज्जाहि ।**
**पादोवगए संते, जह चाणक्कस्स व करीसे ॥ ४४०० ॥**

[जी.भा.५३१,नि.भा.३९६७]

**पादपोपगते सति कोऽपि प्रत्यनीकतया** से **तस्य सर्वतः** सर्वासु दिक्षु **अग्निं प्रदद्यात्। यथा चाणक्यस्य करीषे** करीषमध्ये व्यवस्थितस्य **सुबन्धुनामाऽमात्यः** सर्वतोऽग्निं प्रदीपितवानिति॥ ४४०० ॥

**पडिणीययाए कोई, चम्मं से [१]कीलएहिं विहुणित्ता ।**
**महु-घयमक्खियदेहं, पिपीलियाणं तु देज्जाहि ॥ ४४०१ ॥**

[जी.भा.५३२,नि.भा.३९६८]



१. खील° ला.। खेलतेहि- निशीथभाष्ये॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**प्रत्यनीकतया कोऽपि से तस्य-** पादपोपगतस्य **कीलकैर्लोहमयैश्चर्म विधून्य** तदनन्तरं तं **मधुघृतम्रक्षितदेहं** कृत्वा **पिपीलिकानां दद्यात्** तथापि स सम्यक् सहेत॥ ४४०१॥

तत्र सहने दृष्टान्तमाह—

**जह सो चिलायपुत्तो, वोसट्ठनिसट्ठ-चत्तदेहाओ ।**
**सोणियगंधेण पिवीलियाहि [१]चालंकओ धीरो ॥ ४४०२॥**

[जी.भा.५३३,नि.भा.३९६९]

**यथा स चिलातीपुत्रो निसृष्टम्** अतिशयेन **व्युत्सृष्ट-त्यक्तदेहः शोणितगन्धेन पिपीलिकाभिः चालङ्कृतः** चालिनीकृतो **धीरो** न मनागपि ध्यानाच्चलितवान् । एवं सर्वैरपि सोढव्यम्॥ ४४०२॥

अन्यं दृष्टान्तमाह—

**जह सो कालायवेसितो वि मोग्गल्लसेलसिहरम्मि ।**
**खइओ विउव्विऊणं, देवेण सियालरूवेणं ॥ ४४०३॥**

[जी.भा.५३४,नि.भा.३९७०]

गाथा ४३९८-४४०४ उपसर्गसहने दृष्टान्ताः १६५३ (A)

---

१. चालणिव्व कओ-ला.॥

For Private And Personal

यथा स ब्रह्मचर्याध्ययनप्रसिद्धः **कालादवैश्यो मुद्गलशैलशिखरे** स्थितो **देवेन** शृगालरूपं **विकुर्वित्वा शृगालरूपेण खादितः** भक्षितस्तथापि स सम्यगधिसोढवान् । एवं सर्वैः सोढव्यम् ॥ ४४०३ ॥

**जह सो वंसिपएसी, वोसट्ठनिसट्ठ-चत्तदेहाओ।**
**वंसीपत्तेहि विणिग्गएहिं आगासमुक्खित्तो॥ ४४०४॥**

[जी.भा.५३५,नि.भा.३९७१]

साधुरेकः पादपोपगतः। स प्रत्यनीकैरुत्क्षिप्य वंशीकुडङ्गस्योपरि मुक्तः। अधस्ताच्च वंशा उत्थिताः,तैर्वंशैः प्रवर्द्धमानैः साधुर्विद्धो दूरमुत्क्षिप्य आकाशं प्रापितः, सम्यक् सोढवान्।

अक्षरगमनिका त्वेवम्- **यथा सः वंशीप्रदेशी** वंशीप्रदेशाक्षिप्तो **निसृष्टम्**-अतिशयेन **व्युत्सृष्टत्यक्तदेहो वंशीपत्रैः** अङ्कुररूपै**र्विनिर्गतै**र्दूर**माकाशमुत्क्षिप्तो** वेदनां सोढवान्। एवं सर्वैरपि सोढव्यम् ॥ ४४०३ ॥

गाथा
४३९८-४४०४
उपसर्गसहने
दृष्टान्ताः
१६५३ (B)

**जहऽवंतीसुकुमालो वोसट्ठ-निसट्ठ-चत्तदेहाओ।**
**धीरो सपेल्लियाए, सिवाए खतिते तिरत्तेणं ॥ ४४०५॥**

[जी.भा.५३६,नि.भा.३९७२]

**यथा अवन्तिसुकुमालो व्युत्सृष्टनिसृष्ट-त्यक्तदेहो धीरः सपेल्लियाए** पेल्लकसहितया बालस्वपुत्रभाण्डसहितया **शिवया** शृगाल्या **त्रिरात्रेण** रात्रित्रिकेण **भक्षितः**, सम्यक् सोढवान्। एवमन्यैरपि सोढव्यम्॥ ४४०५॥

**जह ते गोट्ठट्ठाणे, वोसट्ठनिसट्ठ-चत्तदेहागा।**
**उदएण वोज्झमाणा, वियरम्मि उ संकरे लग्गा ॥ ४४०६॥**

[जी.भा.५३७,नि.भा.३९७३]

ग्रामासन्नप्रदेशे केचित् साधवः पादपोपगताः। ततो **यथा ते गोष्ठस्थाने** प्रदेशविशेषे **निसृष्टं** निःसहतया **व्युत्सृष्ट-त्यक्तदेहा** आन्तरिक्षेण पतितेनो**दकेन उह्यमानाः** वितरके नद्याः श्रोतसि **शङ्करे लग्नाः** सम्यग्वेदनां सहमानाः कालगताः। एवं शेषैरपि सोढव्यम् ॥४४०६॥

तदेवाह—

**बावीसमाणुपुव्वी, तिरिक्खमणुया व भंसणत्थाए ।**
**विसयाऽणुकंपरक्खण, करेज्ज देवा व मणुया वा ॥ ४४०७॥**

[जी.भा.५३९,नि.भा.३९७४]

**द्वाविंशतिं परीषहान् आनुपूर्व्या** पूर्वानुपूर्व्या पश्चानुपूर्व्या अनानुपूर्व्या वा **तिर्यञ्चो मानुष्या वा** चारित्र**भ्रंशनार्थ**मुदीरयन्ति । तथा **देवा मनुष्या वा विषयाणाम्** इन्द्रियविषयाणां प्रत्यनीकतया अनिष्टानाम्, **अनुकम्पया** इष्टानामुदीरणम्, अनुकम्पया **रक्षणं** च **कुर्युः**, तत्रारक्तद्विष्टस्सन् सम्यक् सहेत ॥४४०७॥

पुनरपि दृष्टान्तान्तरमाह—

**जह सा बत्तीस घडा वोसट्ठ-निसट्ठचत्तदेहा उ।**
**धीरा धातेण उ दीविएण दियलम्मि ओलइया॥ ४४०८॥**

[जी.भा.५३८,नि.भा.३९७४]

**यथा द्वात्रिंशद् घटा** द्वात्रिंशद् गोष्ठीपुरुषा इत्यर्थः[1]। **व्युत्सृष्टः**-तत्प्रतिबन्धपरित्यागतः **निसृष्टः** अतिशयेन **त्यक्तः**- मनागपि परिचेष्टाऽकरणाद् **देहो** यया सा। तथा पादपोपगता **ध्रातेन** तृप्तेन **द्वैप्येन** द्वीपान्तरवासिना म्लेच्छेन दृष्टाः। ततः कल्ये ममैते भक्ष्यं भविष्यन्ति इति चिन्तयित्वा वृक्षं विलग्नापयित्वा **दियलम्मि** [2]चेलाए [कीलके] जीवन्त एव **ओलइया** अवलम्बिताः ते सम्यग् वेदनां सहमानाः कालगताः॥ ४४०८॥

उपसंहारमाह—

**एयं पातोवगमं निप्पडिकम्मं तु वन्नियं सुत्ते ।**
**तित्थयर-गणहरेहिं, साहूहि य सेवियमुदारं ॥ ४४०९॥**

[जी.भा.५५७,नि.भा.३९७५]

**एतत् पादपोपगमं सूत्रे** आगमे **निष्प्रतिकर्म वर्णितम्** । **तीर्थकरैर्गणधरैः** शेष**साधुभि**श्चोत्तमधृतिसंहननोपेतैः **उदारं** स्फीतं यथा भवत्येवमा**सेवितम्** । अत्र चायं क्रमः-

---

१. घटा इत्यर्थः॥ २. दियलम्मि=स्थाणुस्तस्मिन् कीलके। चेलाए='चिल्ल' 'चेल्ल' वृक्षविशेषः तस्मिन् 'पाइअ सद्द महण्णवो'॥

यः पादपोपगमनस्येङ्गिनीमरणस्य च करणे असमर्थः स भक्तप्रत्याख्यानं करोति । ततोऽपि यः समर्थतरः पादपोपगमनं च कर्तुमसमर्थः स इङ्गिनीमरणम् ततोऽपि समर्थतरः पादपोपगमम्। एतानि च मरणानि कुर्वन्तो यथा यथोपरितनमरणकारिणस्तथा तथा महानिर्जरतराः ॥ ४४०९ ॥

मूलोपसंहारमाह—

**एसाऽऽगमववहारो जहोवदेसं जहक्कमं कहिओ ।**
**एत्तो सुयववहारं, सुण वच्छ जहाणुपुव्वीए ॥ ४४१० ॥** [जी.भा.५५९]

**एषः** अनन्तरोदित **आगमव्यवहारो यथोपदेशं यथाक्रमं कथितः। अत** उर्ध्वं **यथानुपूर्व्या** परिपाट्या कथ्यमानं **श्रुतव्यवहारं वत्स शृणु** ॥ ४४१० ॥

तमेव कथयति—

**निज्जूढं चोद्दसपुव्विएण जं भद्दबाहुणा सुत्तं ।**
**पंचविहो ववहारो, दुवालसंगस्स नवणीतं ॥ ४४११ ॥**

[जी.भा.५६०]

**यद् भद्रबाहुस्वामिना चतुर्दशपूर्विणा** चतुर्दशपूर्वधरेण **पञ्चविधो व्यवहारः** पञ्चविधव्यवहारात्मकं **निर्यूढं द्वादशाङ्गस्य नवनीतमिव** नवनीतं मथितस्य नवनीतमिव द्वादशाङ्गस्य सारमित्यर्थः। एतेन द्वादशाङ्गान्निर्यूढमावेदितं तत् **सूत्रं** श्रुतमुच्यते तेन व्यवहारः ॥४४११॥

**जो सुयमहिज्जइ बहुं सुत्तत्थं च निउणं न याणेइ ।**
**कप्पे ववहारम्मि य, न सो पमाणं सुयहराणं ॥ ४४१२॥**

**जो सुयमहिज्जइ बहुं, सुत्तत्थं च निउणं वियाणेति ।**
**कप्पे ववहारम्मि य, सो उ पमाणं सुयहराणं ॥ ४४१३॥** [जी.भा.५६१-५६२]

**यः कल्पे व्यवहारे** च **सूत्रं बहु** अधीते, **सूत्रार्थं च निपुणं न जानाति स** व्यवहारविषये **न प्रमाणं श्रुतधराणाम्** ॥४४१२॥

**यस्तु कल्पे व्यवहारे** च **सूत्रं बहु** अधीते **सूत्रार्थं च निपुणं विजानाति स प्रमाणं** व्यवहारे **श्रुतधराणाम्** ॥४४१३॥

कप्पस्स य निज्जुत्तिं, ववहारस्सेव परमनिउणस्स ।
जो अत्थतो न याणइ, ववहारी सो नऽणुन्नातो ॥ ४४१४॥

कप्पस्स य निज्जुत्तिं, ववहारस्सेव परमनिउणस्स ।
जो अत्थओ वियाणइ, ववहारी सो अणुन्नातो ॥ ४४१५॥

[जी.भा.५६३-५६४]

कल्पस्य कल्पाध्ययनस्य व्यवहारस्य च परमनिपुणस्य यो निर्युक्तिमर्थतो न जानाति स व्यवहारी नानुज्ञातः ॥ ४४१४॥

यस्तु कल्पस्य व्यवहारस्य च परमनिपुणस्य निर्युक्तिमर्थतो जानाति स व्यवहारी अनुज्ञातः ॥४४१५॥

तं चेवऽणुमज्जंतो, ववहारविहिं पउंजति जहुत्तं ।
एसो सुयववहारी, पन्नत्तो धीरपुरिसेहिं ॥ ४४१६॥

कुलादिकार्येषु व्यवहारे उपस्थिते यद् भगवता **भद्रबाहुस्वामिना** कल्प-व्यवहारात्मकं सूत्रं निर्यूढं **तदेव अनुमज्जन्** निपुण-निपुणतरार्थपरिभावनेन तन्मध्ये प्रविशन् **व्यवहारविधिं यथोक्तं** सूत्रमुच्चार्य तस्यार्थं निर्दिशन् य **प्रयुङ्क्ते स श्रुतव्यवहारी धीरपुरुषैः प्रज्ञप्तः** ॥ ४४१६ ॥

**एसो सुयववहारो जहोवएसं जहक्कमं कहितो ।**
**आणाए ववहारं, सुण वच्छ जहक्कमं वोच्छं ॥ ४४१७ ॥** [जी.भा.५६५]

एष श्रुतव्यवहारो यथोपदेशं यथाक्रमं कथितः **अत उर्ध्व**माज्ञया व्यवहारं यथाक्रमं वक्ष्ये **तं च वक्ष्यमाणं** वत्स शृणु ॥४४१७॥

**समणस्स उत्तमट्ठे, सल्लुद्धरणकरणे अभिमुहस्स ।**
**दूरत्था जत्थ भवे, छत्तीसगुणा उ आयरिया ॥ ४४१८ ॥** [जी.भा.५६६]

**श्रमणस्य उत्तमार्थे** भक्तप्रत्याख्याने व्यवसितस्य यत् किमपि **शल्यमनुद्धृतमस्ति तदुद्धरणकरणे अभिमुखस्य यत्र** प्रायश्चित्तव्यवहारे **षट्त्रिंशद्गुणा आचार्या दूरस्था भवेयु**स्तत्राऽऽज्ञया व्यवहारः ॥ ४४१८ ॥

कथम्? इत्याह—

**अपरक्कमो मि जातो, गंतुं जे कारणं च उप्पन्नं ।**
**अट्ठारसमन्नयरे, वसणगतो इच्छिमो आणं ॥ ४४१९॥** [जी.भा.५६७]

**स** आलोचयितुकामश्चिन्तयति—साम्प्रतमह**मपराक्रमो जातोऽस्मि** ततस्तेषां समीपं **गन्तुं** न शक्नोमि, **कारणं** च मम तत्पार्श्वगमननिमित्तं **समुत्पन्नम्,** यतो**ऽष्टादशानां**-व्रतषट्कादीनां **अन्यतरस्मिन्**नतीचारे **व्यसनगतः** पतितः, तस्मा**दिच्छाम्याज्ञा**व्यवहारमिति॥ ४४१९॥

तदेव सविशेषं भावयति—

**अपरक्कमो तवस्सी, गंतुं जे सोहिकारसमीवम्मि ।**
**आगंतु न चाएइ, सो सोहिकरो वि देसाओ ॥ ४४२०॥**

स आलोचयितुकामस्**तपस्वी शोधिकारकसमीपे गन्तुमपराक्रमः**। यस्य समीपे **शोधिः** कर्त्तव्या **सोऽपि देशा**दालोचयितुः समीप**मागन्तुं न शक्नोति** ॥४४२०॥—

**अह पट्ठवेइ सीसं, देसंतरगमणनट्ठचेट्ठागो ।**
**इच्छामऽज्जो! काउं, सोहिं तुब्भं सगासम्मि ॥ ४४२१॥**

**अथ** अनन्तरमालोचयितुकामो **देशान्तरगमननष्टचेष्टाक** आलोचनाचार्यस्य समीपे शिष्यम् **'आर्य! युष्माकं सकाशे शोधिं कर्तुमिच्छामि'** इत्येतत् कथयित्वा **प्रेषयति** ॥४४२१॥

**सो वि अपरक्कमगती, सीसं पेसेइ धारणाकुसलं ।**
**एयस्स दाणि पुरओ, करेहि सोहिं जहावत्तं ॥ ४४२२॥**

[तुला- जी.भा.५६९]

**सोऽपि** आलोचनाचार्यः **अपराक्रमगतिः, न** विद्यते पराक्रमो गतौ यस्येति विग्रहः, **शिष्यं धारणाकुशलं प्रेषयति।** यस्त्वालोचयितुकामेन प्रेषितस्तस्य सन्देशं कथयति, यथा— **'इदानीमेतस्य पुरतो यथावृत्तां शोधिं कुरु'** ॥ ४४२२॥

**अपरक्कमे अ सीसं, आणापरिणामगं परिच्छेज्जा ।**
**रुक्खे य बीयकाए, सुत्ते चाऽमोहणाधारिं ॥ ४४२३॥** [जी.भा.५७०]

स आलोचनाचार्योऽपराक्रमः **शिष्यमाज्ञापरिणामकं परीक्षेत**— किमेष आज्ञापरिणामकः? किं वा न? इति। आज्ञापरिणामको नाम-यद् आज्ञाप्यते तत्कारणं न

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



पृच्छति किमर्थमेतदिति, किन्त्वाज्ञयैव कर्त्तव्यतया श्रद्धाति, यदत्र कारणं तत् पूज्या एव जानते, एवं यः परिणामयति स आज्ञापरिणामः। तत्परीक्षा च **वृक्षे बीजकाये च** वक्ष्यमाणरीत्या कर्त्तव्या। आज्ञापरिणामत्वं परीक्ष्य पुनरिदं परीक्षणीयम् यथा—किमेषोऽवग्रहणसमर्थो धारणासमर्थश्च? किं वा न ? इति। तत्राध्ययनादि परीक्ष्य **सूत्रे च** शब्दार्थे च **अमोहनं** मोहरहितं समस्तम् आसमन्ताद् धारयतीत्येवंशीलोऽ**मोहनाधारी** तं परीक्षेत ॥ ४४२३ ॥

तत्र वृक्षेणाऽऽज्ञापरिणामित्वपरीक्षामाह—

**दुट्ठु महंत महिरुहे, गणितो रुक्खे विलग्गिउं डेव।**
**अप्परिणाय बेति तहिं, न वट्टइ रुक्खे वि आरोढुं ॥ ४४२४॥**

**किं वा मारेयव्वो, अहयं ? तो बेह डेव रुक्खातो।**
**अतिपरिणामो भणती, इय होऊ अम्ह वेसिच्छा॥ ४४२५ ॥**

[जी.भा.५७१-७२]



**दृष्ट्वा महतो महीरुहान् गणिकः** आचार्यो ब्रूते—अस्मिन्नुच्चैस्त्वेन तालप्रमाणे **वृक्षे विलग्य**

For Private And Personal

तत आत्मानं **डिप,** प्रपातं कुरु' इत्यर्थः। एवमुक्ते **तत्रापरिणामको ब्रूते**–'**न वर्त्तते वृक्षे विलगितुं** साधोः सचित्तत्वात् वृक्षस्य प्रपातं च कुर्वत आत्मविराधना भवति, सा च भगवता निषिद्धा, **किं वाऽहकमुपायेन मारयितव्यो**ऽभिप्रेतः?' **ततो ब्रूथ** '**वृक्षा**दात्मानं **डिपे**ति'। **अतिपरिणामकः** पुनरिदं **भणति**–'**इति** एवं **भवतु,** करोमि प्रपातमिति भावः, **अस्माकमप्येषा इच्छा** वर्त्तते' ॥४४२४॥ ४४२५॥–

**बेइ गुरू अह तं तू, अपरिच्छियत्थे पभाससे एवं ।**
**किं व मए तं भणितो?, आरुह रुक्खे उ सच्चित्ते ॥ ४४२६॥**

[जी.भा.५७३]

**अथ** अनन्तरं तम् अतिपरिणामं शिष्यं **गुरुर्ब्रूते अपरीक्षिते**—अपरिभाविते मद्वचनस्यार्थे त्वम् **एवम्** उक्तप्रकारेण **प्रभाषसे,** यथा—'करोमि प्रपातम्,अस्माकमप्येषा इच्छा वर्त्तते'। अपरिणामकमधिकृत्य ब्रूते 'त्वं **वा मया** किमेवं **भणितः?** यथा **सचित्ते वृक्षे आरोह,** येनोच्यते न वर्त्तते साधोर्वृक्षे विलगितुमिति। किन्त्वेतन्मयोक्तम्' ॥ ४४२६॥

तदेवाह—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



तव-नियम-नाणरुक्खं, आरुहिउं भवमहन्नवापन्नं ।
संसारगड्डुकूलं, डेवेहि त्ती मए भणितो ॥ ४४२७ ॥ [जी.भा.५७४]

तपो-नियम-ज्ञानमयं वृक्षं भवमहार्णवापन्नं भवसमुद्रमध्यप्राप्तमारुह्य संसारगर्त्ताकूलं डिप उल्लङ्घयेति मया भणितः ॥ ४४२७ ॥—

जो पुण परिणामो खलु, आरुह भणितो उ सो विचिंतेइ ।
निच्छंति पावमेते, जीवाणं थावराणं पि ॥ ४४२८ ॥
किं पुण पंचिंदीणं ?, तं भवियव्वेत्थ कारणेणं तु ।
आरुहणववसियं तू, वारेइ गुरूववट्ठुं[१] भे ॥ ४४२९ ॥ [जी.भा.५७५-७६]

यः पुनः खलु परिणामः आज्ञापरिणामकः स आरुहेति भणितश्चिन्तयति-नेच्छन्ति पापमेते मदीया गुरवो जीवानां स्थावराणामपि, किं पुनः पञ्चेन्द्रियाणाम्, तस्मादत्र



---

१. गुरुववत्थंतो- मु.॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**कारणेन भवितव्यम्,** एवं विचिन्त्य **आरोहणे व्यवसितः** तमारोहणव्यवसितं **गुरुरपि अवष्टभ्य** बाहौ धृत्वा **वारयति** ॥ ४४२८ ॥ ४४२९ ॥

तदेवमुक्तं वृक्षे परीक्षणम् । अधुना बीजेषु तदाह—

**एवाऽऽणह बीयाइं, भणिते पडिसेहे अपरिणामो तू ।**
**अतिपरिणामो पोट्टल, बंधूणं आगतो तहियं ॥ ४४३० ॥** [जी.भा.५७७]

**एवम्** अमुना प्रकारेण **बीजानि आनयतेत्युक्ते अपरिणामः प्रतिषेधयति** न कल्पन्ते बीजानि ग्रहीतुमिति। यस्त्व**तिपरिणामकः** स बीजानां **पोट्टलं बद्ध्वा तत्र** गुरुसमीपे **समागतः** ॥४४३० ॥

**ते वि भणिया गुरूणं, मए भणियाऽऽणेह अंबिलीवाए।**
**न विरोहसमत्थाइं, ऽसच्चित्ताइं[1] व भणियाइं ॥ ४४३१ ॥**

[तुला. जी.भा.५७८]



**१. न यानि सच्चित्तानि विरोहसमर्थानि = अविध्वस्तयोनिकानि तानि आनय॥**

For Private And Personal

**तावपि** अपरिणामकाऽतिपरिणामकौ **गुरुणा भणितौ**—'**मया** भणित**मानय अम्लिकाबीजानि** काञ्जिकीनि बीजानि यदि (यानि) [न] **सचित्तानि** विध्वस्तयोनिकानि **यानि न विरोहसमर्थानि** तान्यानयेति **भणितानि**' ॥४४३१॥ —

**तत्थ वि परिणामो तू, भणती आणामि, केरिसाइं तु?।**
**केत्तियमेत्ताइं वा ?, विरोहमविरोहजोग्गाइं?॥ ४४३२॥** [जी.भा.५७९]

**तत्रापि यः परिणामः** आज्ञापरिणामकः स भणति—**कीदृशानि** बीजान्यान**यामि**? **विरोहयोग्यानि अविरोहयोग्यानि वा ? कियन्मात्राणि वा ?** ॥ ४४३२॥

**सो वि गुरूहिं भणितो, न ताव कज्जं पुणो भणीहामि।**
**हसितो व मए ताऽसि, वीमंसत्थं व भणितोसि ॥ ४४३३॥** [जी.भा.५८०]

**सोऽपि** आज्ञापरिणामको **गुरभिर्भणितः**—'**न तावदिदानीं कार्यम्**, यदा तु कार्यं

भविष्यति तदा **पुनर्भणिष्यामः**'। अथवा '**हसितोऽसि मया तावत्** इदानीं न पुनर्बीजैः प्रयोजनम्'। यदि वा '**विमर्शार्थं** तव विमर्शपरीक्षणार्थं त्वमेवं **भणितोऽसि**' ॥४४३३॥

सम्प्रत्यमोहनाधारिपरीक्षामाह —

**पयमक्खरमुद्देसं, संधी सुत्तऽत्थ तदुभयं चेव ।**
**अक्खर-वंजणसुद्धं, जहभणितं तो परिकहेति ॥ ४४३४॥** [जी.भा.५८१]

**पदमक्षरमुद्देशं सन्धिम्** अधिकारविशेषं **सूत्रमर्थं तदुभयं च अक्षर-व्यञ्जनशुद्धं** पूर्वमवग्राहयति किमेष ग्रहण-धारणायोग्यः किं वा न इति ? अवग्राह्य ततो ब्रूते-'उच्चारय, प्रेक्षे किमपि गृहीतं न वा? किं वा गृहीतमपि किं स्मृतं किं वा न?' इति । तत्र यदि **यथाभणितं तथा** सर्वं **परिकथयति** तदा ज्ञातव्यः एष ग्रहण-धारणाकुशल इति ॥४४३५॥

**एवं परिच्छिऊणं, जोग्गं नाऊण पेसवे तं तु ।**
**वच्चाहि तस्सगासं, सोहिं सोऊण आगच्छ॥ ४४३५॥**[जी.भा.५८२]

**एवं परीक्ष्य योग्यं ज्ञात्वा तं प्रेषयति** सन्दिशति '**च व्रज तस्य** साधोरालोचयितुकामस्य **समीपे**, गत्वा तस्य **शोधिम्** आलोचनां **श्रुत्वा** पुनरत्राऽऽ**गच्छ**' ॥४४३५॥

**अह सो गतो उ तहियं, तस्स सगासम्मि सो करे सोहिं ।**
**दुग-तिग-चउव्विसुद्धं, तिविहे काले विगडभावो ॥ ४४३६ ॥**

[जी.भा.५८३]

**अथ** प्रेषणानन्तरं **स** यत्रालोचयितुकामो विद्यते तत्र **गतः**। ततस्**तस्याऽऽ**गतस्य **समीपे** आलोचयितुकामः प्रशस्तेषु द्रव्यादिषु **शोधिम्** आलोचनां **करोति**। कथम्? इत्याह-**द्विकं**-दर्शनातिचारं चारित्रातिचारं चारमालोचयतीत्यर्थः। दर्शनग्रहणे ज्ञानग्रहणमपीति ज्ञानातिचारं चेत्यपि द्रष्टव्यम्। चारित्रातीचारालोचनाऽपि च द्विभेदा— मूलगुणातिचारविषया उत्तरगुणातिचारविषया च, तां करोति। पुनस्**त्रिकम्**-आहारोपधि-शय्याभेदत एकैकां त्रिप्रकाराम्। **चतुर्विशुद्धां** प्रशस्तद्रव्य-क्षेत्र-काल-भावोपेताम्। **त्रिविधे काले** अतीते प्रत्युत्पन्ने च यत् सेवितम्, अनागते च यत् सेविष्ये इत्यध्यवसितम्। **विकटभावः** प्रकटभावोऽप्रतिकुञ्चन इत्यर्थः ॥४४३६॥

सम्प्रति द्विकादिपदजातस्य व्याख्यानं किञ्चिदन्यथा किञ्चित् तदेव दर्शयति—

**दुविहं तु दप्प कप्पे, तिविहं नाणाइणं तु अट्ठाए ।**
**दव्वे खेत्ते काले भावे य चउव्विहं एयं ॥ ४४३७॥**

**तिविहे अतीअकाले पच्चुप्पण्णे वि सेवियं जं तु ।**
**सेविस्सं वा एस्से, पागडभावो विगडभावो ॥ ४४३८ ॥** [जी.भा.५८४-५]

**द्विविधां** शोधिं करोति-**दप्पे** दर्पविषयां कप्पे कल्पविषयाम्। **त्रिविधां ज्ञानादीनां** ज्ञान-दर्शन-चारित्राणामर्थायातीचारविशुद्धिलाभाय करोति। प्रशस्ते **द्रव्ये** प्रशस्ते **क्षेत्रे** प्रशस्ते **काले** प्रशस्ते **भावे, एतच्चतुर्विधं** विशोधनं द्रष्टव्यम्। तथा **त्रिविधे अतीते प्रत्युत्पन्ने काले यत् सेवितं** यच्च **एष्यति** काले **सेविष्ये**ऽहमित्यध्यवसितं तद् **विकटभावः प्रकटभाव** आलोचयति॥ ४४३७॥ ४४३८॥

**किं पुण आलोएई?, अतिचारं सो इमो य अतियारो ।**
**वयछक्कादीतो खलु, नायव्वो आणुपुव्वीए ॥ ४४३९॥** [जी.भा.५८६]

किं पुनस्तदालोचयति ? । सूरिराह—**अतीचारम् । स पुनरतीचारः अयं** वक्ष्यमाणः **व्रतषट्कादिकः** व्रतषट्कादिविषयः खल्वानुपूर्व्या ज्ञातव्यः ॥ ४४३९ ॥ तमेव दर्शयति—

**वयछक्क ६ कायछक्कं ६, अकप्पो१ गिहिभायणं २ ।**
**पलियंक३ निसज्जा४ याऽसिणाणं५सोभवज्जणं६ ॥ ४४४० ॥** [जी.भा.५८७]

**व्रतषट्कं** प्राणातिपातनिवृत्त्यादिरात्रिभोजनविरमणपर्यन्तम्। **कायषट्कं** पृथिव्यादि। **अकल्प्यः** पिण्डादिकः। **गृहिभाजनं** कांस्यपात्र्यादि **पल्यङ्कः** प्रतीतः। **निषद्या** गोचरप्रविष्टस्य निषदनम्। **अस्नानं** देशतः सर्वतो वा स्नानस्य वर्जनम्। [शोभावर्जनम्] विभूषापरित्यागः। एतद् विधेयतया प्रतिषेध्यतया वा यद् यथोक्तं नाऽऽचरितं तद् आलोचयति ॥४४४० ॥

**तं पुण होज्जा सेविय दप्पेणं अहव होज्ज कप्पेणं ।**
**दप्पेण दसविहं तू, इणमो वोच्छं समासेणं ॥ ४४४१ ॥** [जी.भा.५८८]

**तत् पुनः** विरुद्धं सेवितं दर्पेण अथवा कल्पेन। तत्र यद् दर्पेण सेवितं तदिदं वक्ष्यमाणं दशविधम् । तदेव **समासेन वक्ष्ये** ॥४४४१ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



प्रतिज्ञातमेव करोति–

**दप्प१ अकप्प२ निरालंब३ चियत्ते४ अप्पसत्थ५ वीसत्थे६।**

**अपरिच्छ७ अकडजोगी८, अणाणुतावी९ य णिस्संके१० ॥ ४४४२ ॥**

[जी.भा.५८९]

**दर्पः** निष्कारणं धावन-वल्गन-वीरयुद्धादिकरणम् १। **अकल्पः** अपरिणतपृथ्वीकायादि-ग्रहणम-वगीतार्थानीतोपधि-शय्याऽऽहाराद्युपभोगश्च २ **निरालम्बः** ज्ञानाद्यालम्बनरहित-प्रतिसेवकः३। **चियत्ते** त्ति पदैकदेशे पदसमुदायोपचारात् त्यक्तकृत्यः संस्तरन्नपि सन्नकृत्यं प्रतिसेव्य त्यक्तचारित्र इत्यर्थः ४। **अप्रशस्तः** बल-वर्णादिनिमित्तं प्रतिसेवी ५। **विश्वस्तः** स्वपक्षतः परपक्षतो वा निर्भयं प्राणातिपातादिसेवी ६। **अपरीक्षः** युक्तायुक्तपरीक्षाविकलः ७। **अकृतयोगी** अगीतार्थः त्रीन् वारान् कल्पमेषणीयं चापरिभाव्य प्रथमवेलायामपि यतस्ततोऽकल्पानेषणीयग्राही ८। **अननुतापी** अपवादपदेन कायानामुपद्रवेऽपि कृते



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



पश्चादनुतापरहितः ९। निःशङ्कः निर्दयः इह-परलोकाशङ्कारहित इत्यर्थः १० ॥ ४४४२॥

**एयं दप्पेण भवे, इणमन्नं कप्पियं मुणेयव्वं ।**
**चउवीसईविहाणं, तमहं वोच्छं समासेणं ॥ ४४४३॥**

एतद् अनन्तरोक्तेन प्रकारेण सेवितं **दर्पेण भवति** । इदमन्यत् **कल्पिकं चतुर्विंशतिविधानं ज्ञातव्यम्** । **तमहं समासेन वक्ष्ये** ॥ ४४४३॥ तदेवाह—

**दंसण१ नाण२ चरित्ते३, तव४ पवयण५ समिति६ गुत्तिहेउं७वा ।**
**साहम्मियवच्छल्लेण८ वा वि कुलतो९गणस्सेव१० ॥ ४४४४॥**

**संघस्सा११ऽऽयरियस्स१२ य, असहुस्स१३ गिलाण१४ बाल१५वुड्ढस्स१६ ।**
**उदय१७ऽग्गि१८चोर१९सावय२०, भय२१कंतारा२२ऽऽवती२३वसणे२४**
**॥ ४४४५॥** [जी.भा ६०१-२]



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**दर्शने** दर्शनप्रभावकशास्त्रग्रहणं कुर्वन्नसंस्तरणे १। **ज्ञाने** सूत्रमर्थं वाऽधीयानोऽसंस्तरणे २। **चारित्रे** अनेषणादोषतः स्त्रीदोषतो वा चारित्ररक्षणाय ततः स्थानादन्यत्र गमने ३। **तपसि** विकृष्टतपोनिमित्तं घृतपानादि ४। **प्रवचने** प्रवचनरक्षानिमित्तं **विष्णुकुमारादेरिव** वैक्रियविकुर्वणादि ५। **समितौ** ईर्यासमित्यादिरक्षणनिमित्तं चक्षुःसावद्यचिकित्साकरणादि ६। **गुप्तौ** भावितकारणतो विकटपाने कृते मनोगुप्त्यादिरक्षणनिमित्तमकल्प्यादि ७। **साधर्मिकवात्सल्य**निमित्तम् ८। **कुलतः** [कुल]कार्यनिमित्तम् ९। एवं **गणकार्य**निमित्तम् १०। **सङ्घकार्य**निमित्तं ११। **आचार्य**निमित्तम् १२। **असह**निमित्तं १३। **ग्लान**निमित्तं १४। प्रतिषिद्ध**बाल**दीक्षितसमाधिनिमित्तं १५। प्रतिषिद्ध**वृद्ध**दीक्षितसमाधिनिमित्तम् १६। **उदके** जलप्लवे १७। **अग्नौ** दवाग्न्यादौ १८। **चौरे** शरीरोपकरणापहारिणि १९। **श्वापदे** सिंह-व्याघ्रादावापतति यद् वृक्षारोहणादि २०। तथा **भये** म्लेच्छादिसमुत्थे २१। **कान्तारे** अल[1]भ्यमानभक्त-पानेऽध्वनि २२। **आपदि** द्रव्याद्यापत्सु २३। **व्यसने** मद्यपान-गीतगानादिविषये पूर्वाभ्यासतः प्रवृत्तिः २४। तत्र यद् यतनया प्रतिसेवते स कल्पः ॥ ४४४४॥४४४५॥

एतदेवाह—

गाथा ४४४६-४४५१ आलोचनाक्रमः १६६४ (A)

---

१. अहृयमान° मु ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**एयऽन्नतरागाढे, [१]दंसण नाणे य चरण सालंबो ।**
**पडिसेविउं कयाई होइ, समत्थो पसत्थेसु ॥ ४४४६ ॥** [जी.भा ६१५]

एतेषाम् **अनन्तरोदितानामन्यतरस्मिन्** आगाढे **समुपस्थिते** दर्शन-ज्ञान-चरणसालम्बः प्रतिसेव्य **अकल्प्यप्रतिसेवनां कृत्वा** कदाचित् प्रशस्तेषु **शुभेषु प्रयोजनेषु कर्त्तव्येषु** समर्थो भवति, **तत एषा कल्पिका प्रतिसेवना** ॥ ४४४६ ॥

**ठावेउ दप्प-कप्पे, हेट्ठा दप्पस्स दस पए ठावे ।**
**[२]कप्पस्स चउव्वीसति, तेसिमहऽट्ठारस पयाइं ॥ ४४४७ ॥** [जी.भा ६१७]

प्रथमतो **दर्प-कल्पौ स्थापयित्वा** तदनन्तरं **दर्पस्याधस्ताद्** दर्पादीनि पदानि **स्थापय, कल्पस्या**धो दर्शनादीनि **चतुर्विंशति** पदानि। **तेषां** दश-चतुर्विंशतिपदाना**मधो** व्रतषट्कादी**न्यष्टादशपदानि** स्थापयेत् ॥ ४४४७ ॥

सम्प्रत्यालोचनाक्रममाह—



---

१. सदसणे नाणचरण° ला ॥ २. कप्पाधो. ला ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**पढमस्स य कज्जस्स[१] य, पढमेण पएण सेवियं[२] जं तु ।**

**पढमे छक्के अब्भिंतरं तु पढमं भवे ठाणं ॥ ४४४८ ॥** [जी.भा. ६१८]

इह प्रथमं कार्यं दर्पलक्षणम्, तस्य प्रथमतः स्थापितत्वात् तस्य **प्रथमस्य कार्यस्य** सम्बन्धिना **प्रथमेन पदेन** दर्पलक्षणेन **यत् सेवितम्** । कथम्भूतम् ? इत्याह— **प्रथमे षट्के** व्रतषट्करूपे **अभ्यन्तरम्** अन्तर्गतम् । तत् कतरद् ? इत्याह— **प्रथमं** प्राणातिपातलक्षणं **भवेत् स्थानम्** ॥ ४४४८ ॥

एवं मृषावादे अदत्तादाने मैथुने परिग्रहे रात्रिभोजने च वक्तव्यम् । पाठोऽप्येवमुच्चारणीयः—

**पढमस्स य कज्जस्स य, पढमेण पएण सेवियं जं तु ।**

**पढमे छक्के अब्भिंतरं तु बीयं भवे ठाणं ॥ ४४४९ ॥**

एवं "तइयं भवे ठाणं" जाव "छट्ठं भवे ठाणं" ॥ ४४४९ ॥

एतदेव कथयन्नाह—



---

१. कज्जस्सा-ला. एवमग्रेऽपि । २. सेवियं होज्जा-ला. एवमग्रेऽपि

For Private And Personal

**पढमस्स य कज्जस्स य, पढमेण पएण सेवियं जं तु ।**
**पढमे छक्के अब्भिंतरं तु सेसेसु वि पएसु ॥ ४४५० ॥**

अक्षरगमनिका प्राग्वत् । नवरं **सेसेसु वि पएसु** इति आद्यं पादत्रयममुञ्चता शेषेष्वपि मृषावादादिषु पदेषु "बिइयं भवे ठाणं", "तइयं भवे ठाणं" इत्यादि पदसञ्चारतो वक्तव्यम् ॥ ४४५० ॥

**पढमस्स य कज्जस्स य, पढमेण पएण सेवियं जं तु ।**
**बिइए छक्के अब्भिंतरं तु पढमं भवे ठाणं ॥ ४४५१ ॥**

**प्रथमस्य कार्यस्य** दर्पलक्षणस्य **प्रथमेन पदेन** दर्परूपेण **यत् सेवितं द्वितीये षट्के** कायषट्के **अभ्यन्तरम्** अन्तर्गतम् । तत् कतरत् ? इत्याह— **प्रथमं** पृथिवीकायलक्षणं **भवेत् स्थानम्** । एवमप्काये तेजस्काये वायुकाये वनस्पतिकाये त्रसकाये च यथाक्रमं "बिइयं भवे ठाणं" । "तइयं भवे ठाणं" इत्यादिपदसञ्चारतः पूर्वक्रमेण पञ्चगाथा वक्तव्याः ॥ ४४५१ ॥

एतदेवाह—

**पढमस्स य कज्जस्स य, पढमेण पदेण सेवियं जं तु ।**
**बिइए छक्के अब्भिंतरं तु सेसेसु वि पएसु॥ ४४५२॥**

इयमपि प्राग्वत् । नवरं **सेसेसु वि पएसु** इति शेषेष्वप्कायादिपदेषु वदेत् ॥ ४४५२॥

**पढमस्स य कज्जस्स य, पढमेण पएण सेवियं जं तु ।**
**तइए छक्के अब्भिंतरं तु पढमं भवे ठाणं ॥ ४४५३॥**

**प्रथमस्य कार्यस्य** दर्पलक्षणस्य **प्रथमेन पदेन** दर्परूपेण **यत् सेवितम्**। कथम्भूतम्? इत्याह—**तृतीये षट्के** अकल्पगृहिभाजनादिलक्षणे **अभ्यन्तरम्** अन्तर्गतम्। कतरत् ? इत्याह—**प्रथमम्** अकल्पलक्षणं **भवेत् स्थानम्**। एवं गृहिभाजने पल्यङ्के निषद्यायां स्नाने शोभायां च यथाक्रमं "बिइयं भवे ठाणं" इत्यादिपदसञ्चारतः पञ्च गाथा वक्तव्याः ॥ ४४५३॥

तथा चाह—

**पढमस्स य कज्जस्स य, पढमेण पएण सेवियं जं तु ।**
**तइये छक्के अब्भिंतरं तु सेसेसु वि पएसु[1] ॥ ४४५४ ॥**

अक्षरगमनिका प्राग्वत्। तदेवं **प्रथमस्य कार्यस्य** 'प्रथमं पदं' दर्पलक्षणं पदममुञ्चताऽष्टादश-पदानि सञ्चारितानि, एवमकल्पादिभिरपि द्वितीयादिभिः पदैः सञ्चारणीयानि ॥ ४४५४ ॥ पाठोऽप्येवम्—

**पढमस्स य कज्जस्स य, बीएण पएण सेवियं जं तु ।**
**पढमे छक्के अब्भिंतरं तु पढमं भवे ठाणं ॥ ४४५५ ॥**

इत्यादि। सर्वसङ्ख्यया भङ्गानामशीतं शतम् १८० ॥ ४४५५ ॥

तदेवं प्रथमं दर्परूपं विशुद्धम्। इदानीं द्वितीयं कल्पपदमधिकृत्याह—

**बिइयस्स य कज्जस्स य, पढमेण पएण सेवियं जं तु ।**
**पढमे छक्के अब्भिंतरं तु पढमं भवे ठाणं ॥ ४४५६ ॥**



---

१. इतोऽग्रे हस्तादर्शेषु 'एया चेव परिपाडी एत्थुग्गहो उ भणियव्वो' इति पाठो दृश्यते इति ला. टिप्पणे ॥

**द्वितीयस्य कार्यस्य** कल्पलक्षणस्य सम्बन्धिना **प्रथमेन पदेन** दर्शनलक्षणेन **यत् सेवितम्**। कथम्भूतम् ? इत्याह- **प्रथमे षट्के** उभयषट्करूपे **अभ्यन्तर**मन्तर्गतं कतरत् ? इत्याह- **प्रथमं** प्राणातिपातलक्षणं **भवेत् स्थानम्**। एवं मृषावादे अदत्तादाने मैथुने परिग्रहे रात्रिभोजने च पूर्वक्रमेण यथाक्रमं पञ्च गाथा वक्तव्याः ॥ ४४५६॥

तथा चाह—

**बीइयस्स य कज्जस्स य, पढमेण पएण सेवियं जं तु ।**
**पढमे छक्के अब्भिंतरं तु सेसेसु वि पएसु ॥ ४४५७॥**

अक्षरगमनिका प्राग्वत् ॥ ४४५७॥

द्वितीयं षट्कं कायरूपमधिकृत्याह—

**बिइयस्स य कज्जस्स य, पढमेण पएण सेवियं जं तु ।**
**बिइए छक्के अब्भिंतरं तु पढमं भवे ठाणं ॥ ४४५८॥**

अत्र **प्रथमं स्थानं** पृथिवीकायलक्षणम्। एवमप्कायेऽग्निकाये वायुकाये वनस्पतिकाये

त्रसकाये च प्रागुक्तप्रकारेण पञ्च गाथा वक्तव्याः ॥ ४४५८॥

तथा चाह-

**बिइयस्स य कज्जस्स य, पढमेण पएण सेवियं जं तु ।**
**बिइए छक्के अब्भिंतरं तु सेसेसु वि पएसु ॥ ४४५९॥**

प्राग्वत् ॥ ४४५९॥

तृतीयकल्पादिषट्कमधिकृत्याह—

**बिइयस्स य कज्जस्स य, पढमेण पएण सेवियं जं तु ।**
**तइए छक्के अब्भिंतरं तु पढमं भवे ठाणं ॥ ४४६०॥**



अत्र **प्रथमं स्थानं** अकल्पलक्षणमेवं गृहिभाजने पल्यङ्के निषद्यायां स्नाने शोभायां च प्रागुक्तप्रकारेण पञ्च गाथा वक्तव्याः ॥ ४४६०॥

एतदेव सूचयति—

**बिइयस्स य कज्जस्स य, पढमेण पएण सेवियं जं तु ।**

**तइए छक्के अब्भिंतरं तु सेसेसु वि पएसु ॥ ४४६१ ॥**

व्याख्या प्राग्वत्। तदेवं **द्वितीयकार्यस्य** कल्पलक्षणस्य 'प्रथमदर्शनरूपं पदममुञ्चता अष्टादशपदानि सञ्चारितानि एवं ज्ञानादिलक्षणैर्द्वितीयादिभिरपि पदैस्त्रयोविंशतिसङ्ख्याकैः प्रत्येकमष्टादशपदानि सञ्चारयितव्यानि । सर्वसङ्ख्यया भङ्गानां द्वात्रिंशदधिकानि चत्वारि शतानि ४३२, अष्टादशानां चतुर्विंशत्या गुणने एतावत्याः सङ्ख्याया भावात् ॥ ४४६१ ॥

सम्प्रति "पढमस्स य कज्जस्स य" इत्यादि पदव्याख्यानार्थमाह—

**पढमं कज्जं नामं, निक्कारण दप्पतो [ तु ] पढमपयं ।**

**पढमे छक्के पढमं पाणइवादो मुणेयव्वो ॥ ४४६२ ॥** [तुला-जीभा ६२९]

अत्र [**प्रथमं कार्यं**] '**निष्कारणं** नाम' दर्पः। **प्रथमं पदं दर्पकः** दर्पः। शेषं सुगमम्॥ ४४६२ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**एवं तु मुसावातो, अदिन्न मेहुण परिग्गहो चेव ।**

**बियछक्के पुढवादी, तइए छक्के अकप्पादी ॥ ४४६३ ॥** [तुला-जी भा. ६३०]

**एवम्** उक्तेन प्रकारेण **मृषावादः अदत्तम्** अदत्तादानं **मैथुनं परिग्रहः चशब्दाद्** रात्रिभोजनं च सञ्चारणीयम्। **द्वितीये षट्के** क्रमेण **पृथिव्यादयः** सञ्चारणीयाः। **तृतीये षट्के अकल्पादयः** ॥ ४४३६ ॥

**निक्कारणदप्पेणं, अट्ठारस चारियाइं एयाइं ।**

**एवमकप्पादीसु वि, एक्केक्के होंति अट्ठरसा[1] ॥ ४४६४ ॥**

[तुला-जी भा. ६३१]

एवं **निष्कारणस्य** दर्पलक्षणस्य कार्यस्य सम्बन्धिना प्रथमेन पदेन **दर्पेण एतानि** व्रतषट्कप्रभृतीन्य**ष्टादश** पदानि **सञ्चारितानि। एवमकल्पादिष्वपि** नवसु पदेषु **एकैकस्मिन्** प्रत्येक**मष्टादश** पदानि सञ्चारयितव्यानि भवन्ति ॥ ४४६४ ॥

१.अट्ठारस-मु.। अट्ठरस-ला.॥



For Private And Personal

**बिइयं कज्जं कारण, पढमपयं तत्थ दंसणनिमित्तं ।**
**पढमं छक्के वयाइं, तत्थ वि पढमं तु पाणवहो ॥ ४४६५ ॥**[जी.भा.६३२]

**द्वितीयं कार्यं** नाम **कारणं** कल्प इत्यर्थः। तत्र **प्रथमपदं दर्शननिमित्तम्** । **प्रथमं षट्कं व्रतानि । तत्र प्रथमं पदं प्राणवधः** ॥ ४४६५ ॥

**दंसणममुयंतेणं, पुव्वकमेणं तु चारणीयाइं ।**
**अट्ठारस ठाणाइं, एवं नाणाइ एक्केक्को ॥ ४४६६ ॥** [जी.भा.६३३]

**दर्शनं** दर्शनपदं प्रथमममुञ्चता **पूर्वक्रमेणाष्टादश स्थानानि चारणीयानि । एवं ज्ञानादिरेकैको** भेदः सञ्चारयितव्यः ॥ ४४६६ ॥

**चउवीसऽट्ठारसगा, एवं एए हवंति कप्पम्मि ।**
**दस होंति अकप्पम्मी, सव्वसमासेण मुण संखं ॥ ४४६७ ॥** [जी.भा.६३४]

**एवम्** उक्तेन प्रकारेण **कल्पे चतुर्विंशतिरष्टादशका भवन्ति** चत्वारि शतानि द्वात्रिंशानि

४३२ भङ्गानां भवन्तीति भावः। **अकल्पे** दर्पे **दशाष्टादशका** भवन्ति, अशीतं शतं १८० भङ्गानां भवतीति भावः। एतां कल्पे दर्पे च **सर्वसमासेन सङ्ख्यां जानीहि** ॥ ४४६७॥

**सोऊण तस्स पडिसेवणं तु आलोयणाकमविहिं च ।**
**आगम पुरिसज्जायं, परियाग बलं च खेत्तं च ॥ ४४६८॥** [जी.भा.६३६]

**श्रुत्वा तस्य** आलोचकस्य **प्रतिसेवनाम्, आलोचनाक्रमविधिं च** आलोचनाक्रमपरिपाटीं चाऽवधार्य, तथा तस्य यावानागमोऽस्ति तावन्तमागमम्, तथा **पुरुषजातं** अष्टमादिभिर्भावितमभावितं वा, **पर्यायं** गृहस्थपर्यायो यावानासीद् यावांश्च तस्य व्रतपर्यायः तावन्तमुभयपर्यायम्, **बलं** शारीरिकं तस्य, तथा यादृशं तत् **क्षेत्रम्** । एतत् सर्वमालोचकाचार्यकथनतः स्वतो दर्शनतश्चावधार्य स्वदेशं गच्छति ॥ ४४६८॥ तथा चाह—

**आहारेउं सव्वं, सो गंतूणं पुणो गुरुसगासं ।**
**तेसि निवेदेइ तहा, जहाणुपुव्विं गतं सव्वं ॥ ४४६९॥** [तुला-जी.भा.६३७]

**सः** आलोचनाचार्याय प्रेषितः **सर्वम्** अनन्तरोदितम् **आ**-समन्तात् **धारयित्वा** पुनरपि

स्वदेश गमनेन **गुरुसकाशं गत्वा तेषां** गुरूणां **सर्वं तथा निवेदयति यथा आनुपूर्व्या** परिपाट्या **गतम्** अवधारितम् ॥ ४४६९ ॥

**सो ववहारविहिण्णू, अणुमज्जित्ता सुतोवएसेणं ।**
**सीसस्स देइ आणं, तस्स इमं देहि पच्छित्तं ॥ ४४७० ॥** [जी.भा.६३८]

**सः** आलोचनाचार्यो **व्यवहारविधिज्ञः** कल्प-व्यवहारात्मके छेदसूत्रे **अनुमज्य** पौर्वापर्यपर्यालोचनेन श्रुततात्पर्ये निषण्णो भूत्वा **श्रुतोपदेशेन** रागद्वेषतोऽन्यथा **तस्य** पूर्वप्रेषितस्य **स्वशिष्यस्याऽऽज्ञां ददाति** । यथा— 'गत्वा तस्येदं **प्रायश्चित्तं देहि**' ॥ ४४७० ॥

किं तत् ? इत्याह—

**पढमस्स य कज्जस्स य, दसविहमालोयणं निसामित्ता ।**
**नक्खत्ते भे पीडा, सुक्के मासं तवं कुणसु[१] ॥ ४४७१ ॥** [जी.भा.६३९]

**प्रथमस्य कार्यस्य** दर्पलक्षणस्य सम्बन्धिनीं दर्पादिपदभेदतः **दशविधां** दशप्रकाराम्

१. जीतकल्प भाष्ये इतोऽग्रे ६४०-३ गाथा चतुष्कं विद्यते॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**आलोचनां निशम्य** आकर्ण्य परिभावितम्। यथा-नक्षत्रे नक्षत्रशब्देनात्र मासः सूचितः, मासे मासप्रमेयप्रायश्चितविषये **भे** भवतः **पीडा** व्रतषट्कपीडा कायषट्कपीडा, कल्पादिषट्कपीडा वा आसीत्। साऽपि च **सुक्के** ति शुक्ले इति साङ्केतिकी संज्ञेति उद्घातितं मासं तपः कुर्यात् ॥ ४४७१ ॥ यदि चातुर्मासं षण्मासं वा लघुप्रायश्चित्तमापन्नो भवेत् तदेवं कथयति—

**'पढमस्स य कज्जस्स य दसविहमालोयणं निसामेत्ता ।**
**नक्खत्ते भे पीडा चउमास तवं कुणसु सुक्के ॥ ४४७२ ॥**

**पढमस्स य कज्जस्स य, दसविहमालोयणं निसामेत्ता ।**
**नक्खत्ते भे पीडा, छम्मासतवं कुणसु सुक्के ॥ ४४७३ ॥** [जी.भा.६४७]

॥ ४४७३ ॥ गाथाद्वयमपि व्याख्यातार्थम् ॥

**एवं ता उग्घाए, अणुग्घाए ताणि चेव किण्हम्मि ।**
**मास-चउमास-छम्मासियाणि, छेयं अतो वोच्छं ॥ ४४७४ ॥**

[तुला-जी.भा.६४४]



For Private And Personal

**एवम्** उक्तेन प्रकारेण तावद् **उद्घाते** लघुरूपे मास-चतुर्मास-षण्मासलक्षणे प्रायश्चित्ते समापतितेऽभिहितम् । **अनुद्घाते** गुरुके समापतिते **तान्येव मास-चतुर्मास-षण्मासानि किण्ह**मित्यनेन पदेन विशेषितानि वक्तव्यानि ॥ ४४७४॥ तद्यथा—

**पढमस्स य कज्जस्स य, दसविहमालोयणं निसामेत्ता ।**
**नक्खत्ते भे पीडा, किण्हे मासं तवं कुणसु ॥ ४४७५॥**

**पढमस्स य कज्जस्स य, दसविहमालोयणं निसामेत्ता ।**
**नक्खत्ते भे पीडा, चउमासतवं कुणसु किण्हे ॥४४७६॥**

**पढमस्स य कज्जस्स य, दसविहमालोयणं निसामेत्ता ।**
**नक्खत्ते भे पीडा, छम्मासतवं कुणसु किण्हे ॥४४७७॥** [जी.भा.६४६,६४८]

**छेयं अतो वोच्छं** [गा. ४४७४] ति अतः परं छेदम्, उपलक्षणमेतत्, मूलादिकं च प्रायश्चित्तं वक्ष्ये ॥ ४४७५॥ ४४७६॥ ४४७७ ॥

तदेवाह—

**छिंदंतु व तं भाणं, गच्छंतु व तस्स साहुणो मूलं ।**
**अव्वावडा व गच्छे, अबिइया वा पविहरंतु॥ ४४७८ ॥** [जी.भा.६४९]

**वा** शब्दः विकल्पने । अथवा यदि छेदप्रायश्चित्तमापन्नो भवति तदैवं सन्दिशति— '**भाजनं छिन्दन्तु**' ॥ ४४७८॥

अत्र शेषव्याख्यानार्थमिदं गाथाद्वयमाह—

**छब्भागंगुल पणगे, दसराए तिभाग अद्ध पण्णरस ।**
**वीसाए तिभागूणं, छब्भागूणं तु पणवीसं ॥ ४४७९॥**

**मास चउमास छक्के, अंगुल चउरो तहेव छच्चेव ।**
**एए छेयवियप्पा, नायव्वा जहकमेणं तु ॥ ४४८०॥**



**पञ्चके** पञ्चरात्रिन्दिवप्रमाणे छेदे समापन्ने एवं सन्देशं कथयति 'भाजनरूपस्याऽङ्गुलषड्भागे छिन्दन्तु'। **दशरात्रे** छेदे समापतिते '**त्रिभागमङ्गुलस्य** भाजनं छिन्दन्तु'। **पञ्चदशे** पञ्चदशरात्रे

छेदे **अर्द्ध**मङ्गुलस्य। **विंशतौ** विंशतिरात्रिन्दिवछेदे 'त्रिभागोनमङ्गुलभाजनस्य छिन्दन्तु'। **पञ्चविंशतौ** पञ्चविंशति रात्रिन्दिवे छेदे '**षड्भागोन**मङ्गुलम्'। **मासे** मासप्रमाणे छेदे प्राप्ते 'परिपूर्णमेकमङ्गुलम्'। **चतुर्मासे** '**चत्वार्य**ङ्गुलानि', **षण्मासे** '**षड**ङ्गुलानि छेद्यानि' सन्दिशति। एव**मेते यथा क्रमेण छेदविकल्पाः** सन्देशा **ज्ञातव्याः** ॥

**गच्छंतु व तस्स साहुणो मूलं** [गा.४४७८] इति यदि मूलं प्रायश्चित्तमापन्नो भवति तदैवं सन्दिशति—'योऽन्यो दूरे 'साधुः' गच्छाधिपतिर्विहरति तस्य 'मूलं' समीपं गच्छन्तु', तस्य समीपं गत्वा मूलं प्रायश्चित्तं प्रतिपद्यन्तामिति भावः। **अव्वावडा व गच्छे** इति अथानवस्थाप्यं प्रायश्चित्तमापन्नस्तत एवं कथयति सन्देशम्। यथा— 'गच्छे अव्यापृता [भवत]'। किमुक्तं भवति ? किञ्चित् कालं गच्छस्य वर्त्तमानिकामवहन्तस्तिष्ठतु। **अब्बिइया वा पविहरंतु** इति पाराञ्चितप्रायश्चित्तापत्तौ पुनरेवं सन्दिशति—'किञ्चित् कालम् 'अद्वितीयकाः' एकाकिनः प्रविहरन्तु'॥ ४४७९ ॥ ४४८० ॥

तदेवं दर्पेण सेविते प्रायश्चित्तम् । अधुना कल्पे यतनया सेविते प्राह—

**बिइयस्स य कज्जस्स य, तहियं चउविंसतिं निसामेत्ता ।**

**नमोकारे आउत्ता, भवंतु एवं भणिज्जासि ॥ ४४८१ ॥** [जी.भा. ६५२]

**द्वितीयस्य कार्यस्य** कल्पलक्षणस्य सम्बन्धिनं **चतुर्विंशतिं निशम्य** आकर्ण्य तत्रैवं सन्दिशन्ति-'**नमस्कारे** भवन्त **आयुक्ता भवन्तु' एवं भणेत्** ब्रूयात् ॥ ४४८१ ॥

**एवं गंतूण तहिं, जहोवएसेण देहि पच्छित्तं ।**

**आणाए एस भणितो, ववहारो धीरपुरिसेहिं ॥ ४४८२ ॥** [जी.भा.६५३]

**एवम्** उक्तप्रकारेणाऽऽचार्यवचनमुपगृह्य **तत्र गत्वा यथोपदेशेन ददाति प्रायश्चित्तम्। एष आज्ञया व्यवहारो धीरपुरुषैर्भणितः** ॥ ४४८२ ॥

**एसाऽऽणाववहारो, जहोवएसं जहक्कमं भणितो ।**

**धारणववहारं पुण, सुण वच्छ! जहक्कमं वोच्छं ॥ ४४८३ ॥** [जी.भा. ६५४]

**एष आज्ञाव्यवहारो यथोपदेशं यथाक्रमं भणितः** कथितः । अत ऊर्ध्वं **धारणा व्यवहारो** वक्तव्यस्तं **यथाक्रममहं वक्ष्ये** इति **शृणु** ॥ ४४८३ ॥

**उद्धारणा विधारण, संधारण संपधारणा चेव ।**
**नाऊण धीरपुरिसा, धारणववहार तं बिंति ॥ ४४८४॥**

[तुला. जी.भा. ६५५]

धारणायाश्चत्वार्यैकार्थिकानि । तद्यथा— **उद्धारणा** १ **विधारणा** २ **सन्धारणा** ३ **सम्प्रधारणा च**। तया धारणया-छेदश्रुतार्थावधारणलक्षणया यः सम्यग् **ज्ञात्वा** व्यवहारः प्रयुज्यते **तं धारणाव्यवहारं धीरपुरुषा** ब्रुवते ॥ ४४८४॥

सम्प्रत्येतेषामेव चतुर्णामेकार्थिकानां शब्दव्युत्पत्तिमाह—



**पाबल्लेण उवेच्च व, उद्धियरपयधारणा उ उद्धारा १।**
**विविहेहिं पगारेहिं, धारेयव्वं विधारा उ २ ॥ ४४८५॥**

**सं एगीभावम्मी, '[1]धृञ् धरणे' ताणि एक्कभावेण ।**
**धारेयऽत्थपयाणि उ, तम्हा संधारणा होइ ३ ॥ ४४८६॥**

१. धी धरणे - ला.॥

**जम्हा संपहारेउं, ववहारं पउंजती ।**

**तम्हा कारणा तेण, नायव्वा संपधारणा** ४ ॥ **४४८७** ॥ [जी.भा. ६५६-५८]

उत्-**प्राबल्येन उपेत्य वा उद्धृतानामर्थपदानां धारणा उद्धारा** उद्धारणा १। **विविधैः प्रकारै**र्विशिष्टं वा अर्थम्-**उद्धृतमर्थपदं** यया धारणया स्मृत्या धारयति सा **विधारा** विधारणा २ ॥ ४४८५ ॥

तथा **सम्** शब्दः- **एकीभावे, धृ** धातुः **धरणे, तानि** अर्थपदानि आत्मना सह **एकभावेन** यस्माद् धारयति तस्मात् सा धारणा सन्धारणा भवति ३ ॥ ४४८६ ॥

तथा—

**यस्मात् सन्धार्य** सम्यक्-प्रकर्षेणावधार्य **व्यवहारं प्रयुङ्क्ते तस्मात् कारणात् तेन** शिष्येण **सम्प्रधारणा** भवति **ज्ञातव्या** ४ ॥ ४४८७ ॥

**धारणववहारेसो, पउंजियव्वो उ केरिसे पुरिसे ? ।**

**भणणति गुणसंपन्ने, जारिसए तं सुणेहि त्ति ॥ ४४८८ ॥** [जी.भा. ६५९]

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**एष धारणाव्यवहारः कीदृशे पुरुषे प्रयोक्तव्यः ? सूरिराह-भण्यते यादृशे गुणसम्पन्ने** प्रयोक्तव्यः, **तं** वक्ष्यमाणं **शृणु** ॥ ४४८८॥

तमेवाह—

**पवयणजसंसि पुरिसे अणुग्गहविसारए तवस्सिम्मि ।**

**सुस्सुयबहुस्सुयम्मि य विवक्कपरियागबुद्धिम्मि ॥ ४४८९ ॥** [जी.भा.६६०]

प्रवचनं-द्वादशाङ्गं श्रमणसङ्घो वा, तस्य यशः- कीर्त्तिमिच्छति य : स **प्रवचनयशस्वी** तस्मिन्। तथा यो दीयमानं प्रायश्चित्तं दीयमानं व्यवहारं त्वनुग्रहं मन्यते **सोऽनुग्रहविशारद**-स्तस्मिन् **तपस्विनि**। तथा सुश्रुतं-शोभनमाकर्णितं बहु श्रुतं येन स सुश्रुतबहुश्रुतः। किमुक्तं भवति ? यस्य बह्वपि श्रुतं न विस्मृतिपथमुपयाति स सुश्रुतबहुश्रुतः, अथवा बहुश्रुतोऽपि सन् यस्तस्योपदेशेन वर्त्तते स मार्गानुसारिश्रुतत्वात् **सुश्रुतबहुश्रुतः**, तस्मिन्। तथा विशिष्टः-विनयौचित्यान्वितो वाक्यपरिपाको बुद्धिश्च यस्मिन् स **विवाक्यपरिपाकबुद्धिः**, तस्मिन् **पुरुषे** प्रयोक्तव्यः ॥ ४४८९॥

एतदेवाह—



For Private And Personal

**एएसु धीरपुरिसा, पुरिसज्जाएसु किंचि खलिएसु ।**

**रहिए वि धारइत्ता, जहारिहं देंति पच्छित्तं ॥ ४४९० ॥** [जी.भा. ६६१]

**एतेषु** अनन्तरोदितगुणसम्पन्नेषु **पुरुषजातेषु किञ्चिद्**- मनाक् प्रमादवशतो मूलगुणविषये उत्तरगुणविषये वा **स्खलितेषु रहितेऽपि'** असत्यपि आदिमे व्यवहारत्रये **धीरपुरुषा** अर्थपदानि कल्प-प्रकल्प-व्यवहारगतानि कानिचिद् **धारयित्वा यथार्हं ददति प्रायश्चित्तम्** ॥ ४४९० ॥

सम्प्रति 'रहिए वि धारइत्ता' इत्यस्य व्याख्यानमाह—

**रहिए नाम असंते, आइल्लम्मि ववहारतियगम्मि ।**

**ताहे विधारइत्ता, वीमंसेऊण जं भणियं ॥ ४४९१ ॥** [जी.भा. ६६२]

**रहिते नाम असति** अविद्यमाने **व्यवहारत्रिके** सति **ततो विधार्य यद् भणितं** भवति। किमुक्तं भवति? **विमृश्य** पूर्वापरपर्यालोचनेन देश-कालाद्यपेक्षया सम्यक् छेदश्रुतार्थं परिभाव्य ॥४४९१ ॥

किम्? इत्याह—

**पुरिसस्स उ अतियारं, वियारइत्ताण[1] जस्स जं अरिहं।**
**तं देंति उ पच्छित्तं, केणं देंती उ तं सुणह[2]॥ ॥ ४४९२॥** [जी.भा.६६३]

**पुरुषस्यातीचारं** द्रव्यतः क्षेत्रतः कालतो भावतश्च **विचार्य यस्य यदर्हं** प्रायश्चित्तं तस्य **तद् ददाति प्रायश्चित्तम्। केन ददाति?** आचार्यः प्राह— येन ददाति **तत् शृणुत** ॥ ४४९२॥

तदेवाह—

**जो धारितो सुयत्थो, अणुओगविहीए धीरपुरिसेहिं ।**
**आलीण-पलीणेहिं, जयणाजुत्तेहि दंतेहिं ॥ ४४९३॥** [जी.भा.६६६]

गाथा ४४८९-४४९५ धारणा-व्यवहारयोग्यः

**यो नाम धीरपुरुषैः** आलीन-प्रलीनैर्यतनायुक्तैर्दान्तैश्च **अनुयोगविधौ** व्याख्यानवेलायां **श्रुतस्य**-छेदश्रुतस्य [**अर्थो**] '**धारितः**' अविस्मृतीकृतस्तेन ददति ॥ ४४९३॥

साम्प्रतमालीनादिपदानां व्याख्यानमाह—

---

**१. विधारइत्ता-ला.॥ २. सुणहु-पु.प्रे.। सुणसु-जी.भा.**



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**अल्लीणा णाणादिसु, पदे[1] पदे लीणा होंति उ पलीणा ।**
**कोहादी वा पलयं, जेसिं गया ते पलीणा उ ॥ ४४९४॥**

**जयणाजुत्तो पयत्तवं, दंतो जो उवरतो उ पावेहिं ।**
**अहवा दंतो इंदियदमेण नोइंदिएणं च[2] ॥ ४४९५॥** [जी.भा.६६५-६]

**ज्ञानादिषु** आ-समन्ताद् लीना **आलीनाः। पदे पदे लीना भवन्ति प्रलीनाः।** अथवा **येषां क्रोधादयः प्रलयं गतास्ते प्रलीनाः,** प्रकर्षेण लयं-विनाशं गताः क्रोधादयो येषामिति व्युत्पत्तेः ॥ ४४९४॥ **यतनायुक्तो** नाम सूत्रानुसारतः **प्रयत्नवान्। दान्तो य : पापेभ्य उपरतः, अथवा दान्तो** नाम **इन्द्रियदमेन नोइन्द्रियेण** नोइन्द्रियदमेन **चा**[5]**ऽन्यतः।** तदेवं छेदश्रुतार्थधरणवशतो धारणा-व्यवहारः उक्तः ॥ ४४९५ ॥

साम्प्रतमन्यथा धारणाव्यवहारमाह—



१. इतोऽग्रे जीतकल्प भाष्ये ६६७ अधिका गाथा इत्थम्- 'एरिसया जे पुरिसा, अत्थधर ते भवंति जोग्गा उ। धरणववहारण्णु ववहरिउं धारणाकुसला' २. वाऽन्यत : पु.प्रे.। चान्यत : मु.॥

For Private And Personal

**अहवा जेणऽण्णइया, दिट्ठा सोही परस्स कीरंती ।**
**तारिसयं चेव पुणो, उप्पन्नं कारणं तस्स ॥ ४४९६ ॥**

**सो तम्मि चेव दव्वे, खेत्ते काले य कारणे पुरिसे ।**
**तारिसयं अकरेंतो, न हु सो आराहतो होति ॥ ४४९७ ॥**

**सो तम्मि चेव दव्वे, खेत्ते काले य कारणे पुरिसे ।**
**तारिसयं चिय भूयो, कुव्वं आराहगो होइ ॥ ४४९८ ॥** [जी.भा ६६८-६७०]

**अथवेति** प्रकारान्तरे। **येन अन्यदीया परस्य शोधिः क्रियमाणा दृष्टा** स तत् सर्वं स्मरति, यथा-एवम्भूतेषु द्रव्यादिष्वेवम्भूते कारणे जाते एवंरूपं प्रायश्चित्तं दत्तमिति। पुनरन्यदा **तस्य** पुरुषस्य, उपलक्षणमेतत्, अन्यस्य वा **तादृशमेव पुनः कारणं समुत्पन्नं** ततो यदि **तस्मिन्नेव** तादृश एवेत्यर्थः **द्रव्ये क्षेत्रे काले च**शब्दाद् भावे च तादृश एव **कारणे** तस्मिन्नेव तादृशे वा **पुरुषे तादृशमकुर्वन्** रागेण वा द्वेषेण वा अन्यथा प्रायश्चित्तं ददानो वर्त्तते तदा **सः न हु** नैव

**आराधको भवति।** अथ **तस्मिन्नेव द्रव्ये क्षेत्रे काले** भावे च **कारणे पुरुषे** च **तादृशं** करोति तदा स **आराधको भवति** ॥ ४४९६-९८॥

धारणाव्यवहारस्यैव पुनरन्यथा प्रकारान्तरमाह—

**वेयावच्चकरो वा, सीसो वा देसहिंडगो वा वि ।**

**दुम्मेहत्ता न तरइ, ओहारेउं[1] बहुं जो उ ॥ ४४९९॥**

**तस्स उ उद्धरिऊणं, अत्थपयाइं तु देंति आयरिया ।**

**जेहिं करेति कज्जं, ओहारेंतो उ सो देसं ॥ ४५००॥**

य आचार्याणां **वैयावृत्त्यकरो** यो **वा** सम्मतः **शिष्यो** यस्तु **वा देशहिण्डकः** देशदर्शनं कुर्वतस्सहाय आसीत् स समस्तं छेदश्रुतार्थं **दुर्मेधत्वान्नावधारयितुं शक्नोति** ॥४४९९॥

ततस्**तस्योद्धृत्या**नुग्रहाय कानिचि**दर्थपदान्याचार्या ददति, यैः स** छेदश्रुतस्य **देशमवधारयन् कार्यं करोति** एष धारणाव्यवहारः॥ ४५००॥

---

१. अवधारेउं- ला.। आहा° पु.प्रे.॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



उपसंहारमाह—

**धारणववहारेसो, जहक्कमं वन्नितो समासेण ।**

**जीएणं ववहारं, सुण वच्छ ! जहक्कमं वोच्छं ॥ ४५०१ ॥** [जी.भा.६७४]

**एष धारणाव्यवहारो यथाक्रमं समासेन वर्णितः।** साम्प्रतं **जीतेन व्यवहारं यथाक्रमं वक्ष्ये।** तं च वक्ष्यमाणं **शृणु** ॥ ४५०१ ॥ तमेवाह

**वत्तऽणुवत्तपवत्तो, बहुसो अणुयत्तिओ महजणेणं ।**

**एसो उ जीयकप्पो, पंचमओ होइ ववहारो ॥ ४५०२ ॥** [जी.भा.६७५]

यो व्यवहारो **वृत्तः**-एकवारं प्रवृत्तः, **अनुवृत्तः**-भूयः **प्रवृत्तः**, वारद्वयं प्रवृत्त इति भावः। तथा **बहुशः** अनेकवारं **प्रवृत्तो महाजनेन** चानुवर्त्तित्तः, **एष पञ्चमको जीतकल्पो व्यवहारो भवति** ॥ ४५०२ ॥

वृत्तादिपदानां व्याख्यानमाह—



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**वत्तो नामं एक्कसि, अणुवत्तो जो पुणो बितियवारं ।**
**तइयव्वार पवत्तो, परिग्गहीतो महजणेण ॥ ४५०३॥** [जी.भा.६७३]

**एक्कसि** एकवारं यः प्रवृत्तः स **वृत्तो नाम** । यः **पुनर्द्वितीयवारं** प्रवृत्तः सोऽनुवृत्तः। **तृतीयवारं** वृत्तः **प्रवृत्तो**ऽनुवर्त्तितः। स **परिगृहीतो महाजनेन** ॥ ४५०३॥

अत्र परस्य प्रश्नमाह—

**चोदेती वोच्छिन्ने, सिद्धिपहे तइयगम्मि पुरिसजुगे ।**
**वोच्छिन्ने तिविहे संजमम्मि जीएण ववहारो ॥ ४५०४॥**

परश्चोदयति। किम्? **तृतीये पुरुषयुगे** जम्बूस्वामिनाम्नि **सिद्धिपथे व्यवच्छिन्ने, व्यवच्छिन्ने** च **त्रिविधसंयमे** परिहारविशुद्धिप्रभृतिके **जीतेन व्यवहारः** ॥ ४५०४॥

अत्र **केचिदुत्तरमाह**—

**संघयणं संठाणं, च पढमगं जो य पुव्वउवओगो ।**
**ववहारचउक्कं पि य, चोद्दसपुव्विम्मि वोच्छिन्नं ॥ ४५०५॥**



For Private And Personal

**प्रथमं संहननं** वज्रऋषभनाराचम् प्रथमं **संस्थानं** समचतुरस्रम्, यश्चान्तर्मुहूर्त्तेन चतुर्दशानामपि **पूर्वाणामुपयोगः**-अनुप्रेक्षणम्, यत् त्वादिमं आगम-श्रुता-ऽऽज्ञा-धारणालक्षणं **व्यवहारचतुष्कम्**, एतत् सर्वं **चतुर्दशपूर्विणि** चतुर्दशपूर्वधरे **व्यवच्छिन्नम्** ॥ ४५०५ ॥

एतन्निराकुर्वन् भाष्यकृदाह—

**आहाऽऽयरितो एवं, ववहारचउक्क जे उ वोच्छिन्नं ।**

**चउदसपुव्वधरम्मी, घोसेंती तेसऽणुग्घाया ॥ ४५०६ ॥**

एवं परेणोत्तरे कृते **आचार्यः प्राह**— 'ये **एवं** प्रागुक्तप्रकारेण **व्यवहारचतुष्कं चतुर्दशपूर्वधरे व्यवच्छिन्नं घोषयन्ति तेषां** प्रायश्चित्तं चत्वारो मासाः **अनुद्घाताः** गुरुकाः, मिथ्यावादित्वात् ॥ ४५०६ ॥

मिथ्यावादित्वमेव प्रचिकटयिषुरिदमाह—

**जे भावा जहियं पुण, चोद्दसपुव्वम्मि जंबुनामे य ।**

**वोच्छिन्ना ते इणमो, सुणसु समासेण सीसंते ॥ ४५०७ ॥**

**ये भावा** यस्मिन् **चतुर्दशपूर्विणि** ये च **जम्बूनाम्नि व्यवच्छिन्नास्तान् समासेन शिष्यमाणानिमान् शृणुत** ॥ ४५०७॥

तानेवाह—

**मण परमोहि पुलाए, आहारग खवग उवसमे कप्पे ।**
**संजमतिय केवलि सिज्झणा य जंबुम्मि वोच्छिन्ना ॥ ४५०८॥**

**मनः**पर्यायज्ञानिनः, **परमावधयः**, **पुलाकः** लब्धिपुलाकः, **आहारकः** आहारकशरीरलब्धिमान्, **क्षपकः** क्षपकश्रेणिः, **उवसमे** उपशमश्रेणिः, **कल्पः** जिनकल्पः, **संयमत्रिकं** शुद्धपरिहारविशुद्धिक-सूक्ष्मसम्पराय-यथाख्यातलक्षणं, **केवलिनः** [1]**सिधना** एते भावा **जम्बूस्वामिनि व्यवच्छिन्नाः**। इह केवलिग्रहणेन **सिज्झणा**ग्रहणेन वा गते यद् उभयोपादानं तद् यः केवली स नियमात् सिध्यति यश्च सिध्यति स नियमात् केवली सन्निति ख्यापनार्थम् ॥ ४५०८॥

---

१. सेधनम्- पु.प्रे.॥

**संघयणं संठाणं, च पढमगं जो य पुव्वउवयोगो ।**

**एते तिन्नि वि अत्था, चोद्दसपुव्विम्मि वोच्छिन्ना ॥ ४५०९॥**

**प्रथमं सहननं** १, प्रथमं **सस्थानं** २, **यश्चाऽऽन्तर्मौहूर्त्तिक:** समस्तपूर्वविषय **उपयोग:**३, एते **त्रयोऽप्यर्था** न जम्बूस्वामिनि तृतीये पुरुषयुगे **व्यवच्छिन्ना:**, किन्तु **चतुर्दशपूर्विणि** भद्रबाहौ। व्यवहारचतुष्कं पुन: पश्चादप्यनुवृत्तम् ॥ ४५०९॥

यत आह—

**केवलि-मणपज्जवनाणिणो य तत्तो य ओहिनाणजिणा ।**

**चोद्दस-दस-नवपुव्वी, आगमववहारिणो धीरा ॥ ४५१०॥**

**सुत्तेण ववहरंते, कप्प-व्ववहारधारिणो धीरा ।**

**अत्थधर ववहरंते आणाए धारणाए य ॥ ४५११॥**

**ववहारचउक्कस्सा, चोद्दसपुव्विम्मि छेदो जं भणियं ।**

**तं ते मिच्छा जम्हा, सुत्तं अत्थो य धरए य ॥ ४५१२॥**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



केवलिनो मनःपर्यायज्ञानिनोऽवधिज्ञानजिनाश्चतुर्दशपूर्विणो दशपूर्विणो नवपूर्विणश्च, एते षड् धीरा आगमव्यवहारिणः। ये पुनः कल्प-व्यवहारधारिणो धीरास्ते सूत्रेण कल्प-व्यवहारगतेन व्यवहरन्ति। ये पुनः छेदश्रुतस्याऽर्थधरास्ते आज्ञया धारणया च व्यवहरन्ति छेदश्रुतस्य च सूत्रमर्थश्चाद्यापि धरति विद्यते ततो व्यवहारचतुष्कस्य चतुर्दशपूर्विणि व्यवच्छेद इति यद् भणितं तद् मिथ्या ॥ ४५१०-४५११-४५१२ ॥

अन्यच्च—

तित्थोगाली एत्थं, वत्तव्वा होइ आणुपुव्वीए ।
जो जस्स उ अंगस्सा, वोच्छेदो जहिं विणिद्दिट्ठो ॥ ४५१३ ॥

तेषां मिथ्यावादित्वप्रकटनाय यस्याङ्गोपाङ्गस्य अन्यस्य वा यत्र व्यवच्छेदो विनिर्दिष्टः सा तीर्थोगालिरत्र आनुपूर्व्या क्रमेण वक्तव्या येन विशेषतरस्तेषां प्रत्यय उपजायते ॥ ४५१३ ॥



For Private And Personal

अथ कोऽसौ जीतव्यवहारं प्रयुञ्जीत? इत्यत आह—

**जो आगमे य सुत्ते, य सुन्नतो आण-धारणाए य ।**
**सो ववहारं जीएण कुणइ वत्ताणुवत्तेण ॥ ४५१४॥** [जी.भा.६७८]

**य आगमेन सूत्रेण च**, गाथायां सप्तमी प्राकृतत्वात् तृतीयार्थे, तथा **आज्ञया धारणया च शून्यः** रहितः स जीतेन **वृत्तानुवृत्तेन**, अस्य व्याख्यानं प्राग्वत्, **व्यवहारं करोति** ॥४५१४॥

वृत्तानुवृत्तत्वमेव भावयति—

**अमुगो[१] अमुगत्थ कओ, जह अमुयस्स अमुएण ववहारो ।**
**अमुगस्स वि य तह कतो अमुओ अमुगेण ववहारो ॥ ४५१५॥**



---

१. जीतकल्प भाष्ये ६७९ गाथा मध्ये 'असुतो असुयत्थ' एवं सर्वत्र 'मु' स्थाने 'सु' दृश्यते॥

**तं चेवऽणुमज्जंतो, ववहारविहिं पउंजति जहुत्तं ।**
**जीएण एस भणितो, ववहारी धीरपुरिसेहिं ॥ ४५१६ ॥**[जी.भा.६७९-६८०]

**अमुको व्यवहारोऽमुके** कारणे समुत्पन्ने **अमुकस्य पुरुषस्यामुकेना**ऽऽचार्येण यथा **कृतः**, एतेन वृत्तत्वं भावितम् । **तथैवामुकस्य** पुरुषस्यैतादृशे एव कारणे**ऽमुकेना**ऽऽचार्येणामुको **व्यवहारः कृतः**, एतेनानुवृत्तत्वमुपदर्शितम् । **तमेव** वृत्तानुवृत्तं जीतम् **अनुमज्जन्** आश्रयन् **यथोक्तं व्यवहारविधिं यत् प्रयुङ्क्ते एष जीतेन व्यवहारो धीरपुरुषैर्भणितः** ॥ ४५१५-४५१६ ॥

**धीरपुरिसपन्नत्तो, पंचमगो आगमो विंदुपसत्थो[1] ।**
**पियधम्म-वज्जभीरूपुरिसज्जायाणुचिन्नो य ॥ ४५१७॥** [जी.भा.६८१]

एषः **पञ्चमकः** जीतव्यवहारः **धीरपुरुषप्रज्ञप्तः** तीर्थकर-गणधरैः प्ररूपितः, **आगमः** पञ्चविधः व्यवहारःसूत्रात्मकतया [तीर्थकरगणधरैः प्ररूपितः, **विदुत्ति**] श्रुतज्ञानविदः-चतुर्दशपूर्विणस्तैः कालं प्रतीत्य **प्रशस्तः** प्रशंसितः । तथा **प्रियधर्मभिर्वर्ज्यभीरुभिः पुरुषजातैः अनुचीर्णः** । तस्मात् सत्यतया प्रत्येतव्यः, अर्थतः सूत्रतश्च यथाक्रमं तीर्थकर-गणधरैरभिहितत्वात् ।



---

१. विदुप° ला. वि उ प° मु. ॥

तथाहि— "पंचविहे ववहारे पन्नते" इत्यस्य सूत्रस्यार्थस्तीर्थकरैर्भाषितो गणधरैश्च श्रद्धाय सूत्रीकृतः, अत एवोत्तमैः पुरुषजातैराचीर्णः, ततः कथमत्र न प्रत्ययः? इति ॥ ४५१७॥

अधुना जीतव्यवहारनिदर्शनमाह—

**सो जह कालादीणं, अपडिक्कंतस्स निव्विगइयं तु १।**
**मुहणंतफिडिय२ पाणगअसंवरे३ एवमादीसु ॥ ४५१८॥** [जी.भा.६८२]

**सः** जीतव्यवहारः, **यथेति** उदाहरणमात्रोपदर्शने। **कालादिभ्यः** आदिशब्दात् स्वाध्यायादिपरिग्रहः **अप्रतिक्रान्तस्य,** गाथायां षष्ठी पञ्चम्यर्थे १, तथा **मुखानन्तके** मुखपोतिकायां **स्फिटितायाम्** मुखपोतिकामन्तरेण भाषणे इत्यर्थः २, तथा **पानकस्यासंवरणे** पानाहारप्रत्याख्यानाकरणे निर्विकृतिकं प्रायश्चित्तम् ३ ॥ ४५१८॥

**एगिंदिऽणंतवज्जे, घट्टण[1] १ अणगाढ-गाढपरितावे** २/३ ।
**निव्विगतिगमादीयं, जा आयामं तु उद्दवणे** ४ **॥ ४५१९॥** [जी.भा.६८३]



१. घट्टणतावेण गाढ गाढे य-ला। घट्टण तावण गाढगाढे य-.मु. ॥

**एकेन्द्रियस्य अनन्तकायिकवर्ज्यस्य** पृथिव्यप्तेजो-वायु-प्रत्येकवनस्पतीनामित्यर्थः **घट्टने १ अनागाढे तापने २ आगाढे च ३ निर्विकृतिकादिकम्, यावदायामाम्लम् 'अपद्रावणे'** जीविताद् व्यपरोपणे ४। इयमत्र भावना—पृथिवीकायिकाऽप्कायिक-तेजस्कायिक-वायुकायिक-प्रत्येकवनस्पतीनां घट्टने निर्विकृतिकम् १, अनागाढपरितापने पूर्वार्द्धम् २, आगाढपरितापने एकाशनम्३, अपद्रावणे आयामाम्लमिति ४ ॥ ४५१९ ॥

**विगलिंदिय घट्टण १ तावणाऽणगाढ गाढे२। ३। तहेव उद्दवणे ४।**
**पुरिमड्ढादि कमेणं, नायव्वं जाव खमणं तु ॥ ४५२० ॥**

**पंचिंदिय घट्टण १ तावणाऽणगाढ गाढे २।३ तहेव उद्दवणे ४।**
**एक्कासण१ आयामं२, खवणं३ तह पंच कल्लाणं४ ॥४५२१ ॥**

[जी.भा.६८४-५]



**विकलेन्द्रियाणां** द्वीन्द्रियप्रभृतीनां **घट्टने१ तापने अनागाढे गाढे च २-३ तथा अपद्रावणे ४ पूर्वार्द्धादि क्रमेण ज्ञातव्यं यावत् क्षपणम्** । किमुक्तं भवति ?— घट्टने पूर्वार्द्धम्,

अनागाढपरितापने एकाशनम्, आगाढपरितापने आचाम्लम् ,अपद्रावणे क्षपणमिति ॥ ४५२० ॥ तथा—

**पञ्चेन्द्रियाणां घट्टने एकाशनकम्** १, **अनागाढपरितापने आचाम्लम्**२, **आगाढ-परितापने क्षपणम्** अभक्तार्थम् ३, **अपद्रावणे पञ्च कल्याणं** निर्विकृतिक-पूर्वार्द्ध-एकाशनकाऽऽचाम्लक्षपणरूपम् ॥ ४५२१ ॥

**एमाईओ एसो, नायव्वो होइ जीयववहारो ।**
**आयरियपरंपरएण आगतो जो वा जस्स भवे ॥ ४५२२ ॥** [तुला-जी.भा.६८६]

**एवमादिक एष जीतव्यवहारो भवति ज्ञातव्यः। यो वा यस्य आचार्यपरम्पर-केणाऽऽगतः** स तस्य जीतव्यवहारो ज्ञातव्यः ॥ ४५२२ ॥

**बहुसो बहुस्सुएहिं, जो वत्तो न य निवारितो होइ ।**
**वत्तऽणुवत्त पमाणं, जीएण कयं भवति एयं ॥ ४५२३ ॥**

**यो** व्यवहारो **बहुश्रुतैः बहुशः** अनेकवारं **वृत्तः** प्रवर्त्तितः, **न चान्यैर्बहुश्रुतैः भवति** विद्यते

**निवारितः**। एतेन (तद्) **वृत्तानुवृत्तं** [येन] जीतेन **प्रमाणं कृतं भवति**, स जीतव्यवहारः, प्रमाणीकर्त्तव्य इति भावः ॥ ४५२३ ॥

एतदेव सविस्तरं भावयति—

**जं जीयं सावज्जं, न तेण जीएण होइ ववहारो ।**
**जं जीयमसावज्जं, तेण उ जीएण ववहारो[1] ॥ ४५२४ ॥**

**यद् जीतं सावद्यं न तेन जीतेन भवति व्यवहारः। यद् जीतमसावद्यं तेन जीतेन व्यवहारः** ॥ ४५२४ ॥

अथ किं सावद्यम् ? किं वा असावद्यं जीतम् इत्यत आह—

**छार१· हडि२ हड्डमाला ३, पोट्टेण य रिंगणं४ तु सावज्जं।**
**दसविह पायच्छित्तं, होइ असावज्ज जीयं तु ॥ ४५२५ ॥** [जी.भा.६८९]

---

१. इतोऽग्रे जीतकल्पभाष्ये ६८८ अधिका गाथा इत्थम्- 'केरिस सावज्जं तू केरिसयं वा भावे असावज्जं ?। केरिसयस्स व दिज्जति सावज्जं वावि ? इयरं वा॥'

यत् कुप्रवचने लोके चापराधविशुद्धये समाचरितं **क्षारावगुण्डनं**१ **हडौ**-गुप्तिगृहे प्रवेशनं २ **हड्डुमालारोपणं** ३ **पोट्टेण** उदरेण **रिङ्गणं** ४ **तु**शब्दात् खरारूढं कृत्वा ग्रामे सर्वतः पर्यटनमिति, एवमादि **सावद्यं** जीतम्। यत् तु **दशविधम्** आलोचनादिकं **प्रायश्चित्तं तदसावद्यं जीतम्**। अपवादतः कदाचित् सावद्यमपि जीतं दद्यात् ॥ ४५२५॥

तथा चाह—

**उस्सण्ण बहूदोसे१, निद्धंधसे२ पवयणे य निरवेक्खे ३।**
**एयारिसम्मि पुरिसे, दिज्जइ सावज्ज जीयं पि ॥ ४५२६॥** [जी.भा.६९०]

**उत्सन्नेन** प्रायेण **बहुदोषे** १ **निद्धंधसे** सर्वथा निर्दये२ तथा **प्रवचने** प्रवचनविषये **निरपेक्षे** ३, **एतादृशे पुरुषे**ऽनवस्थाप्रसङ्गनिवारणाय **सावद्यमपि जीतं दीयते** ॥ ४५२६॥

**संविग्गे पियधम्मे, य अप्पमत्ते य वज्जभीरुम्मि।**
**कम्हिइ पमायखलिए, देयमसावज्जजीयं तु ॥ ४५२७॥**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



संविग्ने प्रियधर्मिणि अप्रमत्ते[1] वर्ज्यभीरौ कस्मिंश्चित् प्रमादवशतः स्खलिते देयमसावद्यं जीतम्॥ ४५२७॥

जं जीयमसोहिकरं, न तेण जीएण होइ ववहारो ।
जं जीयं सोहिकरं, तेण उ जीएण ववहारो ॥ ४५२८॥ [जी.भा ६९५]

यद् जीतमशोधिकरं न तेन जीतेन भवति व्यवहारः कर्त्तव्यः। यत् पुनर्जीतं शोधिकरं तेन जीतेन व्यवहारो विधेयः ॥ ४५२८॥

शोधिकराऽशोधिकरजीतप्रतिपादनार्थमाह—

जं जीयमसोहिकरं, पासत्थ-पमत्तसंजयाइण्णं ।
जइ वि महजणाचिण्णं, न तेण जीएण ववहारो ॥ ४५२९॥

जं जीयं सोहिकरं, संवेगपरायणेण दंतेण ।
एगेण वि आइण्णं, तेण उ जीएण ववहारो ॥ ४५३०॥ [जी.भा.६९३-४]



---

१. त्तेऽवद्यभीरौ -मु. ॥

For Private And Personal

**यद् जीतं पार्श्वस्थ-प्रमत्तसंयताचीर्णम्,** अत एवाशोधिकरम्। तद् **यद्यपि महाजनाचीर्णं** तथापि **न तेन जीतेन व्यवहारः,** तस्याशोधिकरत्वात्। **यत्** पुन**र्जीतं संवेगपरायणेन दान्तेन एकेनाप्याचीर्णं** तत् **शोधिकरम्,** अतस्तेन **जीतेन व्यवहारः** कर्त्तव्यः ॥ ४५२९ ॥ ४५३० ॥

**एवं जहोवइट्ठस्स धीर-विउ देसिय-प्पसत्थस्स ।**

**नीसंदो ववहारस्स कोइ कहिओ समासेण ॥ ४५३१ ॥** [जी.भा.६९६-७]

**एवम्** उक्तेन प्रकारेण पञ्चविधस्य **व्यवहारस्य धीरैः**- तीर्थकर-गणधरैर्यथाक्रममर्थतः सूत्रतश्च **देशितः। विदः**-चतुर्दशपूर्वधरास्तैः **प्रशस्तः**-प्रशंसितः तस्य **निष्यन्दः कोऽपि कथितः समासेन,** विस्तरेणाभिधातुमशक्यत्वात् ॥ ४५३१ ॥

तथा चाह—

**को वित्थरेण वोत्तूण समत्थो निरवसेसिए अत्थे ।**

**ववहारे जस्स मुहे, हवेज्ज जीहासयसहस्सं ? ॥ ४५३२ ॥**

**किं पुण गुणोवएसो, ववहारस्स उ[1] विदुप्पसत्थस्स ।**
**एसो भे परिकहिओ, दुंवालसंगस्स णवणीयं ॥४५३३॥** [जी.भा.६९६-७]

**यस्य मुखे जिह्वाशतसहस्रं** जिह्वालक्षं **भवेत्** सोऽपि **को** नाम **व्यवहारे** व्यवहारसूत्रस्य निरवशेषितान् समस्तान् **अर्थान् वक्तुं समर्थः** ?, नैव कश्चित् ॥ ४५३२ ॥

**किन्त्वेषः व्यवहारस्य** व्यवहारसूत्रस्य [2]**विद्वत्प्रशस्तस्य** चतुर्दशपूर्वधरभद्रबाहुस्वामिना दृब्धस्य **गुणोपदेशः** गुणोत्पादननिमित्तमुपदेशः **भे** भवतां **कथितः**। किंविशिष्टः ? इत्याह— **द्वादशाङ्गस्य नवनीतमिव**, सारमित्यर्थः ॥ ४५३३ ॥ व्यवहारप्रकृतं समाप्तम् ॥

**सूत्रम्— चत्तारि पुरिसज्जाया पन्नत्ता । तं जहा-अट्ठकरे नामं एगे नो माणकरे १ माणकरे नामं एगे नो अट्ठकरे २ एगे अट्ठकरे वि माणकरे वि ३ एगे नो अट्ठकरे नो माणकरे ४ ।**

एतत्प्रभृतीनां च पुरुषजातसूत्राणामयं सम्बन्धः—



---

१. तु विदुप्प° ला.। उ वियप्प° पु.प्रे.। उचिउ -मु.॥ २. उचितः -मु.। वित्प्रश० पु.प्रे.॥

**ववहारकोवियप्पा, उ तदट्ठे नो पमायए जोगा ।**
**मा य हु तदुज्जमंते, कुण माणं एस संबंधो ॥ ४५३४ ॥**

पञ्चविध**व्यवहारकोविदात्मा तदर्थे** व्यवहारार्थे न **योगाद्** मनो-वाक्-कायात् **प्रमादयति,** न व्यवहारविषये प्रमादमाचरतीति भावः। **मा च हुः** निश्चितं **तस्मिन्**-व्यवहारे **उद्यच्छति**-उद्यमं कुर्वति **मानम्** अहङ्कारं कार्षीदिति ज्ञापयतीत्येवमादीनि सूत्राणि। **एष** पुरुषजातसूत्राणां **सम्बन्धः** ॥ ४५३४ ॥

प्रकारान्तरेण सम्बन्धमाह—

**वुत्ता व पुरिसजाया, अत्थतो न वि गंथतो ।**
**तेसिं परूवणत्थाय[१], तदिदं सुत्तमागयं ॥ ४५३५ ॥**

**वाशब्दः**' प्रकारान्तरद्योतने। अथवाऽनेन व्यवहारसूत्रेण **अर्थतः पुरुषजाताः उक्ताः** सूचिताः, **न वै ग्रन्थत** उक्ताः। **तेषां प्ररूपणार्थं 'तदिदं सूत्रं'** पुरुषजातसूत्र**मागतम्**॥ ४५३५ ॥

१. °णट्ठाए -ला.। °णत्थं -मु.॥ °णत्थाए -पु.प्रे.॥

अस्याक्षरगमनिका सुप्रतीता । विस्तरार्थं **भाष्यकृ**दाह—

**पुरिसज्जाया चउरो, विभासियव्वा उ आणुपुव्वीए ।**

**अत्थकरे१ माणकरे२, उभयकरे३ नोभयकरे४ य ॥ ४५३६ ॥**

अधिकृतभङ्गसूचिता**श्चत्वारः पुरुषा** इमे **आनुपूर्व्या** परिपाट्या **विभाषितव्याः**। तद्यथा—प्रथमभङ्गे **अर्थकरः**१ द्वितीयभङ्गे **मानकरः**२ तृतीये **उभयकरः**३ चतुर्थे **नोभयकरः** ४ चतुष्टयम् ॥४५३६ ॥

**पढम-तइया य इत्थं, तु सप्फला निप्फला दुवे इयरे ।**

**दिट्ठंतो सगतेणा, सेवंता अन्नरायाणं ॥ ४५३७ ॥**

**अत्र** एषु चतुर्षु पुरुषेषु मध्ये **प्रथम-तृतीयौ सफलौ**। **इतरौ** द्वितीय-चतुर्थौ **निष्फलौ**। एषु चतुर्ष्वपि **दृष्टान्तो अन्यराजानं सेवमानाः शकस्तेनाः** ॥ ४५३७ ॥

तमेव दृष्टान्तमभिधित्सुराह—

**उज्जेणी सगरायं, नीया ( ? नियया ) गव्वा न सुट्ठु सेवंति ।**
**वित्तिअदाणं चोज्जं, निव्विसया अन्ननिवसेवा ॥ ४५३८ ॥**

**धावइ पुरतो तह मग्गतो य सेवइ य आसणं नीयं ।**
**भूमीयं पि निसीयइ, इंगियकारी य पढमो उ ॥ ४५३९ ॥**

**चिक्खल्ले अन्नया पुरओ, उ गतो से एगे नवरि सिच्चंतो ।**
**तुट्ठेण तस्स रण्णा, वित्ती उ सुपुक्खला दिण्णा १ ॥ ४५४० ॥**

यदा **कालिकाचार्येण** शका आनीतास्तदा **उज्जयिन्यां** नगर्यां **शको राजा** जातः। तस्य **निजकाः** आत्मीयाः 'एषोऽस्माकं जात्या सदृशः' इति **गर्वात् तं** राजानं **न सुष्ठु सेवन्ते**। ततो राजा तेषां **वृत्तिं नाऽदात्**। अवृत्तिकाश्च ते **चौर्यं** कर्तुं प्रवृत्ताः। ततो राज्ञा बहुभिर्जनैर्विज्ञप्तेन **निर्विषया** कृताः। ततस्तैर्देशान्तरं गत्वा **अन्यस्य नृपस्य सेवा** कर्तुमारब्धा ॥४५३८॥ तत्रैकः पुरुषो राज्ञ आगच्छतो गच्छतश्च **पुरतो धावति, तथा मार्गतश्च** कदाचिद् धावति। राज्ञश्चोद्ध्वस्थितस्योपविष्टस्य वा पुरतः स्थितः सेवते। यद्यपि चोपविष्टस्सन्

राजा तस्याऽऽसनमनुजानाति तथापि स **नीचमासनमाश्रयते**। कदाचिच्च राज्ञः पुरतो **भूमावपि निषीदति**। **राज्ञश्चेङ्गितं** ज्ञात्वा अनाज्ञप्तोऽपि विवक्षितप्रयोजनकारी ॥४५३९॥

**अन्यदा** च राजा पानीयस्य **कर्दमस्य** च मध्येन धावितः, शेषश्च भूयान् लोको निष्कर्दमेन प्रदेशेन गन्तुं प्रवृत्तः। स पुनः शकपुरुषोऽश्वस्याग्रतः पानीयेन कर्दमेन च **सिच्यमानः** एकः **से** तस्य पुरतो धावति। ततस्**तस्य राज्ञा तुष्टेन सुपुष्कला** अतिप्रभूता **वृत्तिर्दत्ता** १ ॥ ४५४०॥

**बितितो न करे अट्ठं, माणं च करेइ जाइ-कुलमाणी ।**
**न निवसति भूमीए, न य धावति तस्स पुरतो उ २॥ ४५४१॥**

**द्वितीयः** पुरुषः 'अहमपि राजवंशिकः' इति गर्वान्न कमपि **अर्थं** राज्ञः प्रयोजनं **करोति**। **जाति-कुलमानी** सन् मानं च भूयांसमात्मनि करोति । **न च भूमौ निवसति, न च तस्य** राज्ञः **पुरतो धावति** २ ॥ ४५४१॥

तृतीयमाह—

**सेवति ठितो विदिन्ने, वि आसणे पेसिओ कुणइ अट्ठं ।**

**इइ उभयकरो तइए, जुज्झइ य रणे समाभट्ठो ३ ॥ ४५४२॥**

**तृतीयः** पुरुषो राजानं प्रथमपुरुषवत् **सेवते**। नवरमश्वस्य पुरतो न धावति, किन्तु पृष्ठतः। तथा ऊद्ध्र्वस्थितः सेवते, **वितीर्णे आसने** स्थितोऽप्युपविष्टोऽपि आसने सेवते, न भूमौ निषीदति । तथा **प्रेषितस्सन्नर्थं करोति,** नाप्रेषितः, मानवशात् । **इति** एवमेष **उभयकरः**। **रणे च** सङ्ग्रामे राजपुत्र इति **समाभाषितो युध्यते** ३ ॥ ४५४२॥

**उभयनिसेहो चउत्थे ४, बिइय-चउत्थेहिं तत्थ उ न लद्धा ।**

**वित्ती इयरेहि लद्धा, दिट्ठंतस्सेसुवणतो उ ॥ ४५४३ ॥**

**चतुर्थे** पुरुषे **उभयस्य**-अर्थस्य मानस्य च **निषेधः । तत्र द्वितीय-चतुर्थाभ्यां** वृत्तिर्न **लब्धा** ४। **दृष्टान्तस्य एषः वक्ष्यमाण उपनयः** ॥ ४५४३॥

तमेवाह—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**एमेवाऽऽयरियस्स वि, कोई अट्ठं करेइ न य माणं १।**
**अट्ठो उ उच्चमाणो, वेयावच्चं दसविहं तु ॥ ४५४४॥**

अहवा—

**अब्भुट्ठाणं आसण, कितिकम्मं मत्तए य संथारे ।**
**उववाया य बहुविहा, इच्चादि हवंति अट्ठा उ ॥ ४५४५॥**

**एवमेव शकपुरुषदृष्टान्त**गतेन प्रकारेण **कोऽप्याचार्यस्यार्थं करोति, न मानम् । अर्थो** वक्ष्य**माणसूत्रेणोच्यमानः**। कः पुनः सः ? इत्याह- **दशविधं वैयावृत्यम्** ॥ ४५४४॥ अथवा-

समागच्छतः **अभ्युत्थानम् आसनप्रदानम्**। **कृतिकर्म** विश्रामणा। यथाकालमुच्चार-**मात्रकस्य** प्रश्रवणमात्रकस्य श्लेष्ममात्रकस्य चोपनयः, **संस्तारकस्य** करणम् । **उपपाताश्च** समीपभवनलक्षणाः **बहुविधाः** तत्तत्प्रयोजनभेदतोऽनेकप्रकारा **इत्यादयोऽर्था भवन्ति** ॥ ४५४४॥

**बितितो माणकरो ऊ, को पुण माणो हवेज्ज तस्स? इमो ।**
**अब्भुट्ठाणऽब्भत्थण, होइ पसंसा य एमादी २॥ ४५४६॥**

**द्वितीयो** भवति **मानकरः। कः पुनस्तस्य मानः?** उच्यते- **अयं** वक्ष्यमाणः। तमेवाह- **अब्भुट्ठाण**मित्यादि। समागच्छतोऽ**भ्युत्थानं** न कृतम्, यदि वा न मेऽ**भ्यर्थना** न वा कृता मम **प्रशंसा इत्यादि** २ ॥ ४५४६ ॥

**तइओभय ३ नोभयतो, चउत्थओ४ तत्थ दोण्णि निप्फलगा।**
**सुत्तऽत्थोभय-निज्जरलाभो दोण्हं भवे तत्थ ॥ ४५४७॥**

**तृतीयः उभय**करः अर्थकरो मानकरः। **चतुर्थो नोभयकरः। तत्र द्वौ** द्वितीय-चतुर्थौ **निष्फलौ** सूत्राऽर्थोभयनिर्जराऽलाभात्। तथाहि-न तयोराचार्याः सूत्रमर्थमुभयं वा प्रयच्छन्ति, नापि तौ निर्जरां प्राप्नुतः। **द्वयोः** प्रथम-तृतीययोः **सूत्राऽर्थोभय-निर्जरालाभः**, अर्थकारितया सर्वस्यापि सम्भवात्। तस्मात् प्रथम-तृतीयाभ्यामिव वर्त्तितव्यम्, न द्वितीय-चतुर्थाभ्यामिव ॥ ४५४७॥



**सूत्रम्— चतारि पुरिसज्जाया पन्नत्ता। तं जहा-गणट्ठकरे नामं एगे नो माणकरे १ माणकरे नामं एगे नो गणट्ठकरे २ एगे गणट्ठकरे वि माणकरे वि ३ एगे नो गणट्ठकरे नो माणकरे ४ ॥ ५॥**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir





अस्याक्षरगमनिका सुप्रतीता॥ प्रपञ्चं भाष्यकृदाह—

**एमेव होंति भंगा, चत्तारि गणट्ठकारिणो जइणो ।**
**रन्नो सारूविय देवचिंतगा तत्थ आहरणं ॥ ४५४८॥**

**एवमेव** अनन्तरसूत्रोक्तप्रकारेण **गणार्थकारिणोऽपि यतेश्चत्वारो भङ्गा भवन्ति**। ते च सूत्रतः स्पष्टाः एव। तेषु चतुर्ष्वपि पुरुषजातेषु ये **सारूपिकाः** यतेः समानरूपधारिणो मुण्डितशिरस्का भिक्षाटनशीला इत्यादिप्रागुक्तस्वरूपाः, **देवचिन्तका** नाम ये शुभाऽशुभं राज्ञः कथयन्ति ते **आहरणं** दृष्टान्तः ॥ ४५४८॥

तमेव भावयति—

**पुट्ठाऽपुट्ठो पढमो, उ साहई न उ करेइ माणं तु १।**
**बितिओ माण करेई, पुट्ठो वि न साहई किंचि २ ॥ ४५४९॥**

**तइओ पुट्ठो साहइ, नाऽपुट्ठ ३ चउत्थ नेव सेवइ उ ४ ।**
**दो सफला दो अफला, एवं गच्छे वि नायव्वा ॥ ४५५०॥**

For Private And Personal

**प्रथमो** राज्ञा **पृष्टः अपृष्टो** वा यात्रां शुभाशुभं वा **साधयति** कथयति, **न तु मानं करोति** १। **द्वितीयो मानं करोति,** न च मानादेव **पृष्टोऽपि किञ्चित् कथयति** २। **तृतीयः पृष्टः साधयति, नापृष्टः** ३। **चतुर्थः सेवते एव** राजानं **नेति** ४। अत्र **द्वौ** प्रथम-तृतीयौ **सफलौ, द्वौ** च द्वितीय-चतुर्था**वफलौ। एवम्** अमुना दृष्टान्तगतेन प्रकारेण **गच्छेऽपि** द्वौ प्रथम-तृतीयौ सफलौ 'द्वौ च' द्वितीय-चतुर्थावफलौ **ज्ञातव्यौ** ॥ ४५४९ ॥ ४५५० ॥

तेषां चतुर्णामपि स्वरूपमाह—

**आहार-उवहि-सयणाइएहिं गच्छस्सुवग्गहं कुणति १ ।**
**बितितो माणं २ उभयं, च तइय३ नोभय चउत्थो ४ उ ॥ ४५५१ ॥**

प्रथम **आहारोपधि-शयनादिभिर्गच्छस्योपग्रहं करोति** न च मानम् १। **द्वितीयो मानम्**२। **तृतीयः उभयं** गच्छस्योपग्रहं मानं च ३ । **चतुर्थः 'नोभयं'** न गच्छस्योपग्रहं नापि मानमिति ॥ ४५५१ ॥

**सूत्रम्—चत्तारि पुरिसज्जाया पन्नता । तं जहा-गणसंगहकरे नामं एगे नो माणकरे १, एगे माणकरे नो गणसंगहकरे २, एगे गणसंगहकरे वि माणकरे वि३, एगे नो**

**गणसंगहकरे नो माणकरे ॥ ६ ॥**

अत्र सम्बन्धमाह—

**सो पुण गणस्स अट्ठो, संगहो तत्थ संगहो दुविहो ।**
**दव्वे भावे तियगा, उ दोन्नि आहार-नाणादी ॥ ४५५२ ॥**

अनन्तरसूत्रे गणार्थ उक्तः **स पुनर्गणस्यार्थः सङ्ग्रहस्ततः** सङ्ग्रहकरप्रतिपादनार्थमिदं सूत्रम्। **तत्र सङ्ग्रहो द्विधा। द्रव्यतो भावतश्च** । तत्र द्रव्ये भावे च **द्वौ त्रिकौ** द्रष्टव्यौ । तद्यथा—**आहारादि**त्रिकं द्रव्ये, **ज्ञानादि**त्रिकं भावे ॥ ४५५२ ॥

तदेवं सङ्ग्रहं व्याख्याय सङ्ग्रहकरत्वयोजनामाह—

**आहारोवहि-सिज्जाइएहि दव्वम्मि संगहं कुणति ।**
**सीस पडिच्छे वाए, भावेण तरंति जाहे गुरू ॥ ४५५३ ॥**

**द्रव्यतः सङ्ग्रहं करोति आहारोपधि-शय्यादिभिः** अत्राऽऽदिशब्द आहारादीनां स्वगतानेकभेदसूचकः। **भावेन यदा गुरवः शक्नुवन्ति** तदा **शिष्यान् प्रतीच्छकान् वा**

**वाचयति,** एषः प्रथमः पुरुषः १। द्वितीयो मानं करोति, न तु द्रव्यतो भावतो वा गणस्य सङ्ग्रहम् २। तृतीयश्च उभयम् ३। चतुर्थो नोभयमिति ४ ॥ ४५५३॥

**सूत्रम्— चत्तारि पुरिसज्जाया पन्नत्ता । तं जहा- गणसोहकरे नामं एगे नो माणकरे १ एगे माणकरे नो गणसोहकरे २, एगे गणसोहकरे वि माणकरे वि ३, एगे नो गणसोहकरे नो माणकरे ४॥ ७॥**

अत्र **भाष्यम्**—

**एवं गणसोहम्मि वि, चउरो पुरिसा हवंति नायव्वा ।**
**सोभावेंति गणं खलु, इमेहिं ते कारणेहि तु ॥ ४५५४॥**

**एवम्** उक्तेन प्रकारेण **गणशोभायामपि** कर्त्तव्यायां **चत्वारः पुरुषा भवन्ति ज्ञातव्याः**। ते च सूत्रपाठसिद्धा एव। गणशोभाकरो नाम यो **गणं शोभयति**। ते च **गणं शोभापयन्ति खलु एभिः वक्ष्यमाणैः कारणैः** प्रयोजनैर्वादादिभिः ॥ ४५५४॥

तानेव वाद्यादीन् दर्शयति—

**गणसोभी खलु वादी, उद्देसे सो उ पढमए भणितो ।**
**धम्मकहि निमित्ती वा, विज्जातिसएण वा जुत्तो ॥ ४५५५ ॥**

गणं वादप्रदानतः शोभयतीत्येवंशीलो **गणशोभी खलु वादी** । स च वादेन यथा गणं शोभयति तथा **प्रथमे उद्देशके भणितः**। न केवलं वादी गणशोभी, किन्तु **धर्मकथी**, तथाहि— धर्मकथां यथोक्तस्वरूपामाक्षेपतः कथयन् जनयति गणस्य महतीं शोभाम्। तथा **निमित्ती** अतीतादिनिमित्तं कथयन् **विद्यातिशयेन वा युक्तो** गणशोभी, महतोऽपि सङ्घप्रयोजनस्य विद्याप्रभावतः साधनात् ॥ ४५५५ ॥

सूत्रम्— **चत्तारि पुरिसज्जाया पन्नत्ता । तं जहा-गणसोहीकरे नामं एगे नो माणकरे १ एगे माणकरे नो गणसोहीकरे २, एगे गणसोहीकरे वि माणकरे वि ३ एगे नो गणसोहिकरे नो माणकरे ४। ॥ ८ ॥**



अत्र **भाष्यम्**—

**एवं गणसोहिकरा, चउरो पुरिसा हवंति विन्नेया ।**
**किह पुण गणस्स सोहिं, करेज्ज सो? कारणेमेहिं ॥ ४५५६ ॥**

**एवम्** उक्तेन प्रकारेण **गणशोधिकराश्चत्वारः पुरुषा भवन्ति विज्ञेयाः। कथं पुनः सः** प्रथमस्तृतीयो वा **गणस्य शोधिं कुर्यात्**? सूरिराह— **एभिः** वक्ष्यमाणैः **कारणैः** ओजस्वित्वादिभिः ॥ ४५५६ ॥

तान्येवाह—

**एगदव्वेगघरए, णेगाणाऽऽलोयणाए संका उ।**
**ओयस्सि सम्मओ संथुओ य तं दुप्पवेसं च ॥ ४५५७॥**

एकस्मिन् गृहेऽनेकैः सङ्घाटकैरेकं द्रव्यं लब्धम् । तद्यथा—एकेन सङ्घाटकेन एकस्मिन् गृहे पूपलिका लब्धाः, अन्येनापि सङ्घाटकेन तस्मिन्नेव गृहे तादृश्य एव पूपलिका लब्धाः, एवं तृतीयेन चतुर्थेन पञ्चमेन वा लब्धाः । तैः सन्निवृत्त्य गुरुसमीपमागत्याऽऽलोचितम् दर्शिताश्च पूपलिकाः, ततो जाता सर्वेषां **शङ्का**—नूनमेता उद्गमाशुद्धा भवेयुः। एवं शङ्किते गत्वा तद्गृहं प्रष्टव्यम्— किं युष्माकं गृहेऽद्य सङ्खडिः? उत लाभनकं समागतम्? अथवा प्राघूर्णकाः समागताः? यदि वा साधूनामर्थाय कृताः, क्रीता वा? तत्र च गृहे भिक्षावेलां मुक्त्वा शेषकालं न कोऽपि प्रवेशं लभते, तत्र साधुरेक **ओजस्वी** गृहमानुषाणां **संस्तुतः** परिचितः, संस्तुततया च तस्मिन् गृहे **सम्मतः** अनिवारितप्रसरस्तद् **दुष्प्रवेशं** गृहं प्रविशति, प्रविश्य च निःशङ्कं

करोति। अत्र योऽप्रेषितो गत्वा निःशङ्कीकृत्य समागच्छति स प्रथमः पुरुषजातः १। यस्तु मानेन न गच्छति स द्वितीयः २। यस्तु मानमपि करोति गणस्य शोधिरपि कर्त्तव्येति व्रजति स तृतीयः ३। चतुर्थो न गच्छति न च मानं करोति ४। प्रथम-तृतीयौ सफलौ, तीर्थकराज्ञापरिपालनात् । द्वितीय-चतुर्थावफलौ, तीर्थकराज्ञाभङ्गादिति ॥ ४५५७॥

**सूत्रम्— चत्तारि पुरिसज्जाया पण्णत्ता । तं जहा— रूवं नामेगे जहइ नो धम्मं १ धम्मं नामेगे जहइ नो रूवं २, एगे रूवं पि जहइ धम्मं पि जहइ ३, एगे नो रूवं जहइ नो धम्मं जहइ ४ ॥ १॥**

अस्य सम्बन्धमाह—

**हेट्ठाऽणंतरसुत्ते, गणसोही एस सुत्तसंबंधो ।**
**सोहि त्ति व धम्मो त्ति व, एगट्ठं सो दुहा होइ ॥ ४५५८॥**

**अधस्तने अनन्तरसूत्रे गणस्य शोधिरुक्ता शोधिरिति वा धर्म इति वा एकार्थम् ।** स च धर्मो **द्विधा भवति—** रूपतो भावतश्च । ततस्तत्प्रतिपादनार्थमिदं सूत्रमित्येष सूत्रसम्बन्धः ॥ ४५५८॥

सम्प्रति रूप-धर्मव्याख्यानार्थमाह—

**रूवं होइ सलिंगं, धम्मो नाणादियं तियं होति ।**
**रूवेण य धम्मेण य, जढमजढे भंग चत्तारि ॥ ४५५९ ॥**

**रूपं** नाम **भवति स्वलिङ्गं** रजोहरणादि। **धर्मो ज्ञानादिकं त्रिकम्** । **रूपेण च [ धर्मेण च ]त्यक्तेऽत्यक्ते** च भङ्गाश्चत्वारः। ते च सूत्रपाठसिद्धा एव ॥ ४५५९ ॥

तेषां विषयविभागमाह—

**रूवजढमण्णलिंगे१, धम्मजढे खलु तहा सलिंगम्मि२ ।**
**उभयजढो गिहिलिंगे३, दुहतो सहिओ सलिंगेण४ ॥ ४५६० ॥**

रूपं त्यक्तं न धर्मः स **रूपत्यक्तः**, सुखादिदर्शनात् त्यक्तस्य परनिपातः, सोऽन्यलिङ्गे द्रष्टव्यः। इयमत्र भावना- भावतो ज्ञानादित्रिकसमन्वितः कारणवशेनान्यलिङ्गं गृहिलिङ्गं वा यः प्रतिपद्यते। अत्र निदर्शनं यथा—

कोऽपि राजा महामिथ्यादृष्टिः नास्तिकवादी वावदूकः पण्डिताभिमानी दर्शनिभिः सह वादं दत्त्वा तद्बुद्धिमुपजीव्य दर्शिनिनो हीलयति । अन्यदा साधूनुपद्रावयितुं प्रवृत्तः 'मया सह वादो दीयताम्।' तत्रैकः साधुः वादलब्धिसम्पन्नः खेचरलब्धिमान् । मा भूत् सङ्घस्यापभ्राजना इति गृहिलिङ्गमन्यलिङ्गं वा कृत्वा राज्ञः समीपे वादेनोपस्थितः। प्रवृत्तो द्वयोरपि वादः। तत्र राजा अल्पशक्तिकत्वात् स्वपक्षं निर्वाहयितुमशक्नुवन् हीलनां तस्य कृतवान् । ततः स वाददर्पस्फेटनाय तस्य राज्ञो मूर्द्धानं पादेनाऽऽक्रम्याऽऽकाशेन वायुरिव पलायित्वा स्वस्थानं गतः॥ ४५६०॥

एतदेवाह—

**तस्स पंडियमाणिस्स, बुद्धिलस्स दुरप्पणो ।**

**मुद्धं पाएण अकम्म, वादी वाउरिवाऽऽगतो ॥ ४५६१॥**

**तस्य** नास्तिकवादिनो राज्ञः **पण्डितमानिनो बुद्धिलस्य** बुद्धिं लाति-उपजीवति इति बुद्धिलः तस्य **दुरात्मनो मुर्द्धानं पादेनाऽऽक्रम्य वादी वायुरिव** पलायित्वा स्वस्थानमागतः। एष प्रथमः पुरुषः १ ॥ ४५६१॥

द्वितीयो **धर्मत्यक्तो** न रूपत्यक्त इत्येवंरूपः, स **खलु स्वलिङ्गे** सति प्रतिपत्तव्यः। स च पार्श्वस्थादीनामन्यतमो निष्कारणप्रतिसेवी अवधावितुकामो वा वेदितव्यः, तस्य भावतस्त्यक्तधर्मत्वात् स्वलिङ्गस्य च धारणादिति २। **उभयजढो गिहिलिंगे** इति उभयत्यक्तो मिथ्यादृष्टिर्गृहिलिङ्गे वर्त्तमानः ३। **उभयसहितः स्वलिङ्गेन** सहितो ज्ञानादित्रिकोपेतः ॥

**सूत्रम्— चत्तारि पुरिसज्जाया पन्नत्ता । तं जहा—१ गणसंठितिं नामेगे जहति नो धम्मं १ धम्मं नामेगे जहति नो गणसंठितिं २ एगे धम्मं पि जहति गणसंठितिं पि जहति ३ एगे नो धम्मं जहति नो गणसंठितिं ४ ॥ १० ॥**

अत्र **भाष्यम्—**

**गणसंठिति धम्मे या, चउरो भंगा हवंति नायव्वा ।**
**गणसंठिति अस्सिस्से, महकप्पसुयं न दायव्वं ॥ ४५६२ ॥**

पूर्वप्रकारेण **गणसंस्थितौ धर्मे** च **भङ्गाश्चत्वारो भवन्ति ज्ञातव्याः**। ते च सूत्रपाठसिद्धा एव। **गणसंस्थितिर्नाम** गणस्य मर्यादा । यथा—**अशिष्ये** अयोग्ये शिष्ये **महाकल्पश्रुतं न दातव्यम्** ॥ ४५६२ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



सम्प्रति चतुर्णामपि भङ्गानां विषयविभागमाह–

**सातिसयं इयरं वा, अन्नगणच्चे न देयमज्झयणं ।**
**इइ गण संठितियातो[1], करेंति सच्छंदतो केई ॥ ४५६३ ॥**

**पत्ते दिंतो पढमो १, बितितो भंगो न कस्सइ वि दिंते ।**
**जो पुण अपत्तदायी, तइओ भंगो उ तं पप्प ३ ॥ ४५६४ ॥**

**सयमेव दिसाबंधं, काऊण पडिच्छगस्स जो देति ।**
**उभयमवलंबमाणं, कामं तु तमं पि पुज्जामो ४ ॥ ४५६५ ॥**



**सातिशयं देवेन्द्रौप**पातिकादि **इतरद्वा महाकल्पश्रुतमन्यद्वाऽध्ययनमन्यगणसत्कस्य** न **दातव्य**मिति एवंप्रकारा **गणसंस्थितीः स्वच्छन्दं** तीर्थकरानुपदेशेन **कुर्वन्ति**। तत्रैवं गणसंस्थितौ कृतायां योऽन्यगणसत्केऽपि **पात्रे** महाकल्पश्रुतादिकमध्ययनं **ददाति** तेन गणसंस्थितिस्त्यक्ता,

१ °संठितीए उ क° ला. ॥

For Private And Personal

न धर्मः, तीर्थकरोपदेशेन वर्त्तमानत्वात् । एष हि भगवतां तीर्थकृतां उपदेशः— सर्वस्यापि पात्रस्याविशेषेण दातव्यम्: १। यस्तु गणसंस्थितौ कृतायां **न कस्यापि** परगणसत्कस्य **ददाति** स **द्वितीयः** २। परगणसत्कस्य **अपात्रस्य ददाति तं प्राप्य तृतीयो भङ्ग** तेन गणसंस्थिते-स्तीर्थकराज्ञाखण्डनतो धर्मस्य च त्यक्तत्वात् ३ ॥ ४५६२॥ ४५६४॥

**यस्त्वन्यथा** व्यवच्छेदं पश्यन् 'मेधावी प्रवचनोपग्रहकरो भविष्यति' इत्यादिगुणसमन्वितं **प्रातीच्छिक**मुपलभ्य तस्य **स्वयमेव** निजं **दिग्बन्धं कृत्वा** सातिशयमन्यद्वाऽध्ययनं **ददाति तमपि,** आस्तां प्रथमभङ्गवर्त्तिनमित्यपिशब्दार्थः, **उभयं** गणसंस्थितिं धर्मं चाऽ**वलम्बमानं पूजयामः**। एष चतुर्थः पुरुषः ४ ॥ ४५६५॥

सूत्रम्— **चत्तारि पुरिसज्जाया पन्नत्ता । तं जहा-पियधम्मे नामं एगे नो दढधम्मे१ दढधम्मे नामं एगे नो पियधम्मे २ एगे पियधम्मे वि दढधम्मे वि ३ एगे नो पियधम्मे नो दढधम्मे ४॥ ११॥**



अस्य सम्बन्धमाह—

**धम्मो य न जहियव्वो, गणसंठितिमित्थ नो पसंसामो ।**
**जस्स पियो सो धम्मो, सो न जहति तस्सिमो जोगो ॥ ४५६६॥**

अनन्तरसूत्रे इदमुक्तम्— 'गणसंठितिं नामेगे जहति नो धम्मं'। तत्र **यस्य प्रियो धर्म स** एवं चिन्तयति—'**धर्मो न त्यक्तव्यः, गणसंस्थितिमत्र न प्रशंसामः**' एवं चिन्तयित्वा धर्मं **स न जहाति। एषः 'तस्य'** प्रियधर्मसूत्रस्य '**योगः**' सम्बन्धः॥ ४५६६॥ सम्प्रति प्रियधर्मादिव्याख्यानार्थमाह—

**वेयावच्चेण मुणी, उवचिट्ठइ संगहेण पियधम्मो ।**
**उवचिट्ठइ दढधम्मो, सव्वेसिं निरइयारो य ॥ ४५६७॥**

**प्रियधर्मो मुनिर्यावद्** द्रव्यत आहारादिना, भावतो वाचनादिना येन **सङ्गृह्यते** तावद् **वैयावृत्येन** तस्यो**पतिष्ठते**, नान्यदा अन्यस्य वा । **दृढधर्मः सर्वेषाम**विशेषेण वैयावृत्येनो**पतिष्ठते** सर्वत्र च निरतिचारः ॥ ४५६७॥

सम्प्रति भङ्गयोजनामाह—

**दसविहवेयावच्चे, अन्नयरे खिप्पमुज्जमं कुणति ।**
**अच्चंतमणिव्वाही, धिइ-विरियकिसे पढमभंगो १ ॥ ४५६८॥**

यो **दशविधस्य वैयावृत्यस्य** वक्ष्यमाणस्यान्यतरस्मिन् वैयावृत्त्ये प्रियधर्मतया **क्षिप्रमुद्यमं करोति,** केवलमदृढधर्मतया **अत्यन्तमनिर्वाही** तस्मिन् **धृति-वीर्यकृशे प्रथमभङ्गः** १ ॥ ४५६८॥

**दुक्खेण व गाहिज्जइ, बितितो गहियं तु नेइ जा तीरं** २ ।

**उभयतो कल्लाणो, तइओ३ चरिमो अ पडिकुट्ठो** ४ ॥ ४५६९॥

**द्वितीयस्तु** नो प्रियधर्मत्वाद् **दुःखेन** महता कष्टेन प्रथमतो वैयावृत्त्यं **ग्राह्यते, गृहीतं तु यावत्** प्रतिज्ञायास्तीरं तावन्नयति २। **उभयतः कल्याणस्तृतीयः** ३। **चरमः** न प्रियधर्मा नापि दृढधर्म इत्येवंरूपो गच्छे **प्रतिक्रुष्टः** निराकृतः ॥ ४५६९॥

**सूत्रम्— चत्तारि आयरिया पन्नत्ता । तं जहा—पव्वावणायरिए नामं एगे नोवट्ठावणायरिए १ उवट्ठावणायरिए नामं एगे नो पव्वावणायरिए २ एगे पव्वावणायरिए वि उवट्ठावणायरिए वि३, एगे नो पव्वावणायरिए नो उवट्ठावणायरिए ॥ १२॥**

अस्य सम्बन्धमाह—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**अदढा-पियधम्माणं, तव्विवरीए करेंति आयरिए ।**
**तेसि विहाणम्मि इमं, कमेण सुत्तं समुदितं तु ॥ ४५७० ॥**

**अदृढाऽप्रियधर्माणाम्** अदृढधर्माणां चाप्रियधर्माणां चानुशासनाय स्थविराद्याचार्या [भवन्ति, ते च तान् **तद्विपरीतान्** दृढधर्माणः प्रियधर्माश्च **कुर्वन्ति, तेषाम्** आचार्याणां **विधाने** निरूपणे **क्रमणेदं सूत्रं समुदितमिति**] ॥ ४५७० ॥ [अमीषां]व्याख्यानार्थमाह—

**पव्वावण१ उट्ठावण२, उभये३ नोभयमिति चउत्थो उ ४ ।**
**अत्तट्ठ परट्ठा वा, पव्वावण केवला पढमे १ ॥ ४५७१ ॥**

**एमेव य बितितो वी, केवलमेत्तं उवट्ठवे सो उ २ ।**
**तइओ पुण उभयं पी, अत्तट्ठ परट्ठ वा कुणति ३ ॥ ४५७२ ॥**

**जो पुण नोभयकारी ४, सो कम्हा भवति आयरिओ उ १ ।**
**भण्णाति धम्मायरिओ, सो पुण गिहितो व समणो वा ॥ ४५७३ ॥**



For Private And Personal

प्रथमः **प्रव्राजना**चार्यः १। द्वितीयः द्वितीयभङ्गेन सूचित **उपस्थापना**चार्यः २। तृतीयभङ्गसूचितः **उभयः** प्रव्राजनोपस्थापनाचार्यः ३। **अनुभयश्चतुर्थः** ४ तत्र **प्रथमे** प्रथमस्याऽऽ**त्मार्थं परार्थं वा केवला प्रव्राजना** । किमुक्तं भवति? आत्मनिमित्तं परनिमित्तं वा यः केवलं प्रव्राजयति स प्रथमः प्रव्राजनाचार्यः १ **एवमेव** अनेनैव प्रकारेण **द्वितीयः, सः केवलमात्रमुपस्थापयति,**[1] यः प्रव्राजितस्य सत उपस्थापनामात्रं करोति **स** द्वितीय इत्यर्थः २ **तृतीयः पुनरपि[उभयमपि]** प्रव्राजनमुपस्थापनं चाऽऽ**त्मार्थं परार्थं वा करोति** ३॥ ४५७१॥ ४५७२॥ **यः पुनः नोभयकारी** स चतुर्थः ४। अथ **स कस्माद् भवत्याचार्यः**? उभयविकलत्वात्। सूरिराह— **भण्यते,** स **धर्माचार्यो** धर्मदेशकत्वात् । **स पुनर्गृही वा श्रमणो वा** वेदितव्यः। एवं च त्रय आचार्याः ॥ ४५७३॥

तथा चाह—

**धम्मायरि१ पव्वावण२, तह य उवट्ठावणागुरू तइओ ३ ।**
**कोई तिहि संपन्नो, दोहि व एक्केक्कएणं वा ॥ ४५७४॥**

---

१. केवलं -मु.॥

प्रथमो **धर्माचार्यो** यस्तत्प्रथमतया धर्मं ग्राहयति १। द्वितीयः **प्रव्राजना**चार्यो यः प्रव्राजयति २। **तृतीयो गुरुरुपस्थापना**चार्यो यो महाव्रतेषूपस्थापयति ३। तत्र **कश्चित् त्रिभिरपि सम्पन्नो** भवति, तथाहि— कदाचित् स एव धर्मं ग्राहयति, स एव प्रव्राजयति, स एवोपस्थापयति । **कश्चिद् द्वाभ्याम्,** तद्यथा- धर्मग्राहकत्वेन प्रव्राजनेन च; अथवा धर्मग्राहकत्वेनोपस्थापनेन, अथवा प्रव्राजनेनोपस्थापनेन । **कश्चिदेकैकेन** गुणेन । तद्यथा— कश्चिद् धर्ममेव ग्राहयति, कश्चित् प्रव्राजयत्येव, कश्चिदुपस्थापयत्येव ॥ ४५९८॥

**सूत्रम्— चत्तारि आयरिया पन्नत्ता । तं जहा— उद्देसणायरियए नामं एगे नो वायणायरिए १, वायणायरिए नामं एगे नो उद्देसणणायरिए २, एगे उद्देसणायरिए वि वायणायरिए वि ३, एगे नो उद्देसणायरिए नो वायणायरिए ४॥ १३॥**



अमीषां स्वरूपमाह—

**एगो उद्दिसइ सुयं१, एगो वाएइ तेण उद्दिट्ठं २।**
**उद्दिसई वाएइ य३, धम्मायरिओ चउत्थो य ४ ॥ ४५७५॥**

**एकः** प्रथमः **श्रुतमुद्दिशति** न वाचयति । यथा—मङ्गलबुद्ध्या प्रथमत आचार्य उद्दिशति तत उपाध्यायो वाचयति १। अत्राऽऽचार्यः प्रथमभङ्गवर्त्ती उपाध्यायो द्वितीयभङ्गे । तथा चाह— **एकः** द्वितीय उपाध्यायस्तेनाऽऽचार्येणो**द्दिष्टं वाचयति** २। य एवो**द्दिशति** स एव **वाचयति** एष **तृतीयः** ३। उभयविकल**श्चतुर्थो धर्माचार्यः** ४ ॥ ४५७५ ॥

**सूत्रम्— चत्तारि अंतेवासी पन्नत्ता । तं जहा— उद्देसणंतेवासी नामं एगे नो वायणंतेवासी १, वायणंतेवासी नामं एगे नो उद्देसणंतेवासी २ एगे उद्देसणंतेवासी वि वायणंतेवासी वि ३, एगे नो उद्देसणंतेवासी नो वायणंतेवासी ४॥१४॥** अस्य सूत्रस्य सम्बन्धप्रतिपादनार्थमाह—

**पडुच्चाऽऽयरियं होइ, अंतेवासी उ मेलणा ।**
**अंतिगमब्भासमासण्णं, समीवं चेव आहियं ॥ ४५७६ ॥**

अधस्तादनन्तरसूत्रे आचार्याः प्रोक्ताः। **आचार्यं प्रतीत्यान्तेवासी भवति,** ततोऽन्तेवासिसूत्रमित्येषा **मेलना** सम्बन्धः। तत्र अन्तेवासीत्यत्र योऽन्तशब्दस्तस्य व्याख्यानार्थमेकार्थिकान्याह— अन्तं नाम-**अन्तिकमभ्यास आसन्नं समीपं चैवाऽऽख्यातम्,**

तत्र वसतीत्येवंशीलो अन्तेवासी ॥ ४५७६ ॥

सम्प्रति भङ्गभावनार्थमाह—

**जह चेव उ आयरिया, अंतेवासी वि होंति एमेव ।**
**अंते य वसति जम्हा, अंतेवासी ततो होइ ॥ ४५७७ ॥**

**यथा चैव आचार्या** उद्देशनादिभेदतश्चतुर्द्धा **भवन्ति एवमेव अन्तेवासिनोऽपि ।** **यस्मादाचार्यस्यान्ते वसति तस्माद् भव**त्याचार्य[भेदवेत्]चतुर्द्धा**ऽन्तेवासी**। इयमत्र भावना— यो यस्यान्ते उद्देशनमेवाधिकृत्य **वसति** वर्त्तते स तं प्रति उद्देशनान्तेवासी १। यस्य त्वन्ते वाचनामेवाधिकृत्य वसति स तस्य वाचनान्तेवासी २। यस्तूद्देशनं वाचनां चाधिकृत्य यस्यान्ते वसति स तं प्रति उभयान्तेवासी ३। यस्य त्वन्ते नोद्देशनं नापि वाचनामधिकृत्याऽन्ते वसति किन्तु धर्मश्रवणमधिकृत्य स तं प्रत्युभयविकलो धर्मान्तेवासी ४। एवं च त्रयोऽन्तेवासिनः। तद्यथा— धर्मान्तेवासी १ उद्देशनान्तेवासी २ वाचनान्तेवासी च ३। तत्र कश्चित् त्रिभिरपि प्रकारैः समन्वितो भवति १ कश्चित् द्वाभ्याम् २ कश्चिदेकैकेन ३ ॥ ४५७७ ॥

**सूत्रम्— ततो थेरभूमीतो पन्नत्ताओ । तं जहा— जातिथेरे १ सुयथेरे २ परियायथेरे य ३ । सट्ठिवासजाए जातिथेरे १ ठाण-समवायधरे सुअथेरे २ वीसवासपरियाए परियायथेरे ३ ॥ १५ ॥**

अस्य सम्बन्धमाह—

**थेराणमंतिए वासो, सो य थेरो इमो तहा ।**
**भूमि त्ति य ठाणं ति य, एगट्ठा होइ कालो य ॥ ४५७८ ॥**

अनन्तरसूत्रे अन्तेवासिन उक्ताः। **अन्तिके च वासः स्थविराणाम् । स च स्थविरोऽयं** वक्ष्यमाणस्त्रिधेत्यनेन प्रक्रमेण सूत्रमिदं समापतितमित्येष सूत्रसम्बन्धः। सम्प्रत्यस्य व्याख्या- **तिस्रः** स्थविराणां **भूमयः** प्रज्ञप्ताः। **भूमिरिति स्थानमिति** अवस्थारूपः **काल** इति त्रयोऽपि शब्दा **एकार्थाः**। उक्तं च— "**थेरभूमि त्ति वा थेरठाणं ति वा थेरकालो त्ति वा एगट्ठमिति**" ॥ ४५७८ ॥

**तिविहम्मि य थेरम्मी परूवणा जा जहिं सए ठाणे ।**
**अणुकंप१ सुए पूआ२परियाए वंदणादीणि ३ ॥ ४५७९ ॥**

**त्रिविधे स्थविरे** त्रिविधस्थविरविषये **या यत्र स्वके स्थाने प्ररूपणा सा** सूत्रतः कर्त्तव्या। तद्यथा— षष्टिवर्षजातो जातिस्थविरः १। स्थान-समवायधरः श्रुतस्थविरः २। विंशतिवर्षपर्यायः पर्यायस्थविरः ३। तथा जातिस्थविरस्या**नुकम्पा** कर्त्तव्या १। **श्रुते** श्रुतस्थविरस्य **पूजा** २। **पर्याये** पर्यायस्थविरस्य **वन्दनादीनि** ३ ॥ ४५७९॥

साम्प्रतमेतान्येव त्रीणि कर्त्तव्यानि विस्तरेणाह—

**आहारोवहिसेज्जा, संथारो खित्तसंकमे ।**
**किति-छंदाणुवत्तीहिं, अणुवत्तंति थेरगं ॥ ४५८०॥**

**उट्ठाणाऽऽसणदाणादी, जोग्गाहार पसंसणा ।**
**नीयसिज्जाए निद्देसवत्तिते पूयए सुयं ॥ ४५८१॥**

**उट्ठाणं वंदणं चेव, गहणं दंडगस्स य ।**
**परियागथेरगस्सा, करेंति अगुरोरपि ॥ ४५८२॥**

जातिस्थविरस्य काल-स्वभावानुमत **आहारो** दातव्यः। **उपधिर्यावता** संस्तरति तावत्प्रमाणः। **शय्या** वसतिः, सा ऋतुक्षमा दातव्या। **संस्तारको** मृदुकः। **क्षेत्रसङ्क्रमे** क्षेत्रान्तरं सङ्क्रामयितव्ये तस्योपधिमन्ये वहन्ति। पानीयेन चानुकम्प्यते। उक्ता जातिस्थविरस्यानुकम्पा १। श्रुतस्थविरस्य पूजामाह—**किइ** इत्यादि। **कृतिच्छन्दोऽनुवृत्तिभ्यां स्थविरं** श्रुतस्थविर**मनुवर्त्तयन्ति**। किमुक्तं भवति? श्रुतस्थविरे कृतिकर्म वन्दनकं दातव्यम्, छन्दश्च तस्यानुवर्त्तनीयम् ॥ ४६८० ॥ तथा—

**उट्ठाण** त्ति आगतस्या**भ्युत्थानं** कर्त्तव्यम्, **आसनसम्प्रदानम्**। आदिशब्दात् पाद-मार्जनादिपरिग्रहः। तथा **योग्याहारो**पानयनम्। समक्षं परोक्षं वा **प्रशंसना** गुणकीर्त्तनम्। तथा तत्समक्षं **नीचशय्यायाम**वस्थातव्यम् **निर्देशवर्त्तित्वम्** आज्ञावर्त्तित्वमेव **श्रुतं** श्रुतस्थविरं पूजयेत्॥ ४५८१ ॥ तथा—

**पर्यायस्थविरस्य अगुरोरपि** अप्रव्राजकस्याप्यवाचनाचार्यस्यापि आगच्छत **उत्थानं कुर्वन्ति वन्दनं** च क्षमाश्रमणतः, **दण्डकस्य च ग्रहण**मिति ॥ ४५८२ ॥

**सूत्रम्— ततो सेहभूमीतो पन्नत्ताओ । तं जहा— सत्त राइंदिया चउमासिया छम्मासिया**

**य। छम्मासिया उक्कोसिया १ चाउमासिया मज्झिमिया २ सत्त राइंदिया जहन्ना ३ ॥ १६ ॥**

अस्य सम्बन्धमाह—

**तुल्ला उ भूमिसंखा, ठिया व ठावेंति ते इमे होंति ।**
**पडिवक्खतो व सुत्तं, परियाए दीह हस्से य ॥ ४६८३ ॥**

**तुल्या भूमिसङ्ख्या** शैक्षकाणामिति कृत्वा । अथवा पूर्वसूत्रे स्थविरा उक्ताः, **ते च** स्वयं **स्थिता** अन्यान् **स्थापयन्ति ते** **चाप्येवं** स्थाप्यमाना **इमे** वक्ष्यमाणा **भवन्तीति** तत्प्रतिपादनार्थमिदं सूत्रम्। अथवा **प्रतिपक्षत** इदं **सूत्रमापतितम्** । तद्यथा—पूर्वसूत्रे स्थविराः, तेषां च प्रतिपक्षाः शैक्षाः। यदि वा स्थविराणां **दीर्घः पर्यायः**, शैक्षकाणां शैक्षकत्वेन **ह्रस्व** इति स्थविरसूत्रानन्तरं शैक्षकसूत्रम् ॥ ४५८३ ॥

अस्याक्षरगमनिका प्राग्वत् सम्प्रति शैक्षकाणां यद् वक्तव्यं तत् सूचनाय द्वारगाथामाह—

**सेहस्स तिभूमीतो १, दुविहा परिणामगा दुवे जड्डा ३।**
**पत्त जहंते संभुंजणा य भूमित्तियविवेगो ॥ ४५८४ ॥**

**शैक्षकस्य तिस्रो भूमयो** वक्तव्याः, सूत्रोपात्तत्वात् १ । तथा शैक्षा **द्विविधाः परिणामका** वक्तव्याः२। **द्वौ च जड्डौ** । तत्र **पात्राणि** पात्रभूतान् **त्यजति** दोषा वक्त[अमीषां][अमीषां]व्याः, **सम्भोजना च**। तथा **भूमित्रिकस्य** जल-मूक-करणजड्डलक्षणस्य **विवेकः** परित्यागो वक्तव्यः। एष द्वारगाथासङ्क्षेपार्थः॥ ४५८४॥

व्यासार्थस्तु प्रतिद्वारमभिधातव्यः, तत्र प्रथमतो भूमिद्वारमाह—

**सेहस्स तिन्नि भूमी, जहन्न१ तह मज्झिमा २ य उक्कोसा ३ ।**
**राइंदि सत्त१चउमासिया२ य छम्मासिया ३ चेव ॥ ४५८५॥**

**शैक्षकस्य तिस्रो भूमयः**। तद्यथा— **जघन्या १ मध्यमा २ उत्कृष्टा ३** । तत्र जघन्या **सप्तरात्रिन्दिवा** १ मध्यमा **चातुर्मासिकी** २ उत्कृष्टा **षाण्मासिकी** ३। ॥ ४५८५॥



**पुव्वोवट्ठपुराणे, करणजयट्ठा जहन्निया भूमी ।**
**उक्कोसा दुम्मेहं, पडुच्च अस्सद्दहाणं च ॥ ४५८५॥**

पूर्वमुपस्थः-उपस्थितः पूर्वोपस्थः, स चासौ पुराणश्च **पूर्वोपस्थपुराण**स्तस्मिन् **करणजयाय जघन्या भूमि**र्भवति। इयमत्र भावना—यः पूर्वं प्रव्रज्योत्प्रव्रजितः, पश्चात् पुनरपि प्रव्रज्यां

प्रतिपन्नवान्, स सप्तमे दिवसे उपस्थापयितव्यः । तस्य हि तावद्भिर्दिवसैः पूर्वविस्मृतसामाचारी-करणमत्यन्तपटु भवति। एषा जघन्या भूमिः। **दुर्मेधसमश्रद्दधानं च प्रतीत्य उत्कृष्टा** षाण्मासिकी भूमिः ॥ ४५८६ ॥

**एमेव य मज्झिमिया, अणहिज्जंते असद्दहंते य ।**

**भावियमेहाविस्स वि, करणजयट्ठाए मज्झिमिया २ ॥ ४५८७॥** दारं १।

**एवमेव** उत्कृष्टे [च] **अनधीयाने अश्रद्दधाने च मध्यमिका** भूमिः प्रतिपत्तव्या । अथवा **भावितस्यापि** श्रद्दधानस्यापि **मेधाविनश्चापि** च **करणजयार्थं मध्यमिका** भूमिः ॥ ४५८७ ॥

गतं भूमिद्वारम् १ । अधुना द्विविधपरिणामकद्वारमाह—

**आणा१दिट्ठंतेण२ य, दुविहो परिणामगो समासेणं।**

**आणापरिणामो खलु, तत्थ इमो होति नायव्वो ॥ ४५८८॥**

**द्विविधः परिणामको** भवति । तद्यथा— **आज्ञया १ दृष्टान्तेन २ च** । तत्र **समासेन** सङ्क्षेपेण **आज्ञापरिणामः खलु अयं** वक्ष्यमाणो **भवति [ज्ञातव्यः]**॥ ४५८८ ॥

तमेवाह—

**तमेव सच्चं नीसंकं, जं जिणेहिं पवेइयं ।**

**आणाए एस अक्खातो, जिणेहिं परिणामगो१ ॥ ४५८९ ॥**

**तदेव सत्यं यद् जिनैः प्रवेदितम्** इत्येवं यो **निःशङ्कं** श्रद्दधाति, न च कारणं जानीते, एष **आज्ञया परिणामको जिनैराख्यातः** ॥ ४५८९ ॥

दृष्टान्तपरिणामकमाह—

**पारोक्खं हेउगं अत्थं, पच्चक्खेण उ साहियं ।**

**जिणेहि एस अक्खातो, दिट्ठंतपरिणामगो ॥ ४५९० ॥**

**परोक्षं हेतुकं** हेतुना-लिङ्गेन गम्यं तं **हेतुकमर्थं प्रत्यक्षेण** प्रत्यक्षप्रसिद्धेन **साधयन्** आत्मबुद्धावारोपयन् यो वर्त्तते **एष दृष्टान्तपरिणामको जिनैराख्यातः**, दृष्टान्तेन विवक्षितमर्थं परिणामयति आत्मबुद्धावारोपयतीति दृष्टान्तपरिणामक इति व्युत्पत्तेः तत्राऽऽज्ञापरिणामक आज्ञयैव कायान् श्रद्दधाति॥

दृष्टान्तपरिणामकस्तु दृष्टान्तेन श्रद्धापयितव्य इति तस्य कायश्रद्धानोत्पादनार्थमिदमाह— ॥ ४५९० ॥

**तस्सिंदियाणि पुव्वं, सीसंते जइ उ ताणि सद्दहति ।**
**तो से नाणावरणं, सीसइ ताहे दसविहं तु ॥ ४५९१ ॥**

तस्य दृष्टान्तपारिणामिकस्य **पूर्वम् इन्द्रियाणि** श्रोत्रादीनि **शिष्यन्ते**। तत्र **यदि** तानीन्द्रियाणि **श्रद्दधाति ततः से** तस्य **ज्ञानावरणं दशविधं शिष्यते** ॥ ४५९१ ॥

कथम्? इत्याह—

**इंदियावरणे१ चेव, नाणावरणे २ ति य ।**
**नाणावरणं चेवमाहियं तु दुपंचहा ॥ ४५९२ ॥**

**इन्द्रियावरणं १ ज्ञानावरणं च** । तत्र इन्द्रियावरणं नाम-इन्द्रियविषय- शब्दादि-सामान्योपयोगावरणम्। ज्ञानावरणमिन्द्रियविषयेष्वेव शब्दादिषु विशेषोपयोगावरणम्। इन्द्रियावरणं

ज्ञानावरणं च श्रोत्रेन्द्रियादिभेदतः प्रत्येकं पञ्च पञ्च प्रकारम् **एवं ज्ञानावरणं द्विपञ्चधा** दशप्रकार**माख्यातम्** ॥ ४५९२ ॥

तान्येव दशभेदान् वैविक्त्येनाह—

**सोयावरणे[१] चेव, णाणावरणे य होति तस्सेव ।**

**एवं दुयभेएणं, णेयव्वं जाव फासि त्ति ॥ ४५९३ ॥**

**श्रोत्रावरणं** १ तथा **तस्यैव** श्रोत्रस्य **ज्ञानावरणम्** २, **एवं द्विकभेदेन** तावद् **ज्ञातव्यं यावत् स्पर्शः**। तद्यथा—चक्षुरिन्द्रियावरणं ३ चक्षुरिन्द्रियज्ञानावरणं४ घ्राणेन्द्रियावरणं ५ घ्राणेन्द्रियज्ञानावरणं६ रसनेन्द्रियावरणं ७ रसनेन्द्रियज्ञानावरणं ८ स्पर्शनेन्द्रियावरणं ९ स्पर्शनेन्द्रियज्ञानावरणमिति १० ॥ ४५९३ ॥

साम्प्रतमिन्द्रियावरणस्य विज्ञानावरणस्य च विषयविभागार्थमिदमाह—

**बहिरस्स उ विन्नाणं, आवरियं न उण सोयमावरियं ।**

**अपडुप्पण्णो बालो, अतिवुड्ढो तह असन्नी वा ॥ ४५९४ ॥**



---

१. सोइंदियावरणे णाणावरणं - ला. ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**विन्नाणावरियं तेसिं, कम्हा? जम्हा उ ते सुणंता वि ।**
**न वि जाणंते किमयं, सद्दो संखस्स ? पडहस्स ? ॥ ४५९५ ॥**

**बधिरस्य विज्ञानं** श्रोत्रेन्द्रियविज्ञान**मावृतम्,** सामान्यतः शब्दमात्रश्रवणेऽपि तद्गतविशेषापरिज्ञानात् **न तु श्रोत्रमावृतम्,** सामान्यतः शब्दमात्रश्रवणात्। **तथा** यो**ऽपटुप्रज्ञो बालो** यश्चाति**वृद्धो** यो **वा असंज्ञी** अमनस्कः पञ्चेन्द्रियः, **एतेषां विज्ञानमावृतम्। कस्मात्?** यस्मात् **ते शृण्वन्तो**ऽपि **न वै जानन्ते—किमयं शब्दः शङ्खस्य** उत **पटहस्य ?** इति ॥४५९४-४५९५॥

**किं ते जीवमजीवा?, जीवत्ति य एव तेण उदियम्मि ।**
**भण्णति एव वियाणसु, जीवा चउरिंदिया वि[1] त्ति ॥ ४५९६ ॥**

**किं ते** बधिरादयो **जीवाः ?** उता**ऽजीवाः?** तत्र **जीवा एवेति तेनोदिते भण्यते—एवं** बधिरादिवत् **चतुरिन्द्रिया अपि जीवा इति विजानीहि,** श्रोत्रावरणमात्रेण जीवत्वाप्रच्युतेः ॥४५९६॥



---

१. बेंति-ला.॥

For Private And Personal

**एवं चक्खुंदिय-घाणेंदिय-जिब्भिंदिओवघाएहिं ।**

**एक्केक्कगहाणीए, जाव उ एगिंदिया नेया ॥ ४५९७॥**

**एवम् एकैकहान्या** एकैकेन्द्रियपरिहानितः **चक्षुरिन्द्रिय-घ्राणेन्द्रिय-जिह्वेन्द्रियोपघातैः** क्रमेण त्रीन्द्रियादयस्तावद् **ज्ञेया यावदेकेन्द्रियाः** । तद्यथा— चक्षुरिन्द्रियोपघाते त्रीन्द्रियाः, घ्राणेन्द्रियोपघाते द्वीन्द्रियाः, जिह्वेन्द्रियोपघाते एकेन्द्रियाः ॥ ४५९७॥

इह पूर्वं विज्ञानावरणेऽपीन्द्रियमनावृतमुक्तम्। इदानीमिन्द्रियावरणेऽपि विज्ञानमनावृतमुपदर्शयति—

**सन्निस्सिंदियघाए वि, तन्नाणं नाऽऽवरिज्जए ।**

**विन्नाणं नत्थऽसन्नीणं, विज्जमाणे वि इंदिए ॥ ४५९८॥**

**संज्ञिन इन्द्रियघातेऽपि तज्ज्ञानम्** उपहतेन्द्रियज्ञानं **नाऽऽव्रियते** । एतच्चाग्रे भावयिष्यते। **असंज्ञिनां** पुन**र्विद्यमानेऽपीन्द्रिये विज्ञानं नास्ति,** यथोक्तं प्राक् यथा चाग्रे वक्ष्यते ॥ ४५९८॥

एतदेव भावयति—

**जो जाणइ य जच्चंधो, वन्ने रूवे विअप्पसो ।**
**नेत्ते वाऽऽवरिते तस्स, विन्नाणं तं तु चिट्ठइ ॥ ४५९९ ॥**

**पासंता वि न याणंति, विसेसं वन्नमादिणं ।**
**बाला अस्सन्निणो चेव, विन्नाणावरियम्मि उ ॥ ४६०० ॥**

**यो** नाम **जात्यन्धः** [१]स्पष्टचतुष्टयो **वर्णान्** रूपाणि च **विकल्पशः** अनेकप्रकारं **जानाति तस्य नेत्रेऽप्यावृते तद् विज्ञानं तिष्ठति,** अन्धीकृतोऽपि वर्णविशेषान् रूपविशेषांश्च तथैव स्पर्शतो जानातीत्यर्थः। तथा **बाला असंज्ञिनश्च पश्यन्तोऽपि विज्ञाने आवृते वर्णादीनां विशेषं न जानन्ति**। तदेवमिन्द्रियोपघातेऽपि न विज्ञानोपघातः, विज्ञानोपघातेऽपि नेन्द्रियोपघातः— इति विज्ञानेन्द्रिययोर्भेदः, तद्भेदाच्च तदावरणयोरपि भेद इति ज्ञानावरणं दशधा ॥ ४५९९ ॥ ४६०० ॥ साम्प्रतमेकैकेन्द्रियहान्या यद् एकेन्द्रियत्वं पूर्वमुक्तं तद् भावयति—



१. स्पृष्टचक्षुर्वर्णान् -मु. । इदं तु ध्येयं- चक्षुरिन्द्रियं विहाय शेषेन्द्रियचतुष्टयं स्पष्टं यस्य स स्पष्टचतुष्टयः। यदि वा स्पृष्टचक्षुः स्पर्शचक्षुर्वा तथा च स्पृष्टचक्षुर्वर्णान् इत्यादि चिन्तनीयम्॥

**इंदियउवघाएणं, कमसो एगिंदियो व संवुत्तो ।**
**अणुवहए उवकरणे, विसुज्झती ओसहादीहिं ॥ ४६०१ ॥**

**अवचिज्जए य उवचिज्जए य जह इंदिएहिं सो पुरिसो ।**
**एस उवमा पसत्था, संसारीणिंदियविभागे ॥ ४६०२ ॥**

कोऽपि पुरुषः **क्रमशः** क्रमेण **इन्द्रियाणां**-श्रोत्रादीना**मुपघातेन एकेन्द्रिय इव संवृत्तः** तत्र **चानुपहते उपकरणे** उपकरणेन्द्रिये पुनरौषधादिभिः **विशुध्यति** सर्वस्पष्टेन्द्रियो भवति ॥ ४६०१ ॥

तत्र यथा यः पुरुष इन्द्रियै**रपचीयते उपचीयते च, एषा उपमा संसारिणामिन्द्रियविभागे प्रशस्ता**— तथैव संसारिणोऽपि पञ्चेन्द्रिया भूत्वा चतुरिन्द्रियास्त्रीन्द्रिया द्वीन्द्रिया एकेन्द्रियाश्च परिणमन्ति, एकेन्द्रियाश्च भूत्वा पुनर्द्वीन्द्रियास्त्रीन्द्रियाश्चतुरिन्द्रियाः पञ्चेन्द्रियाश्च भवन्तीत्यर्थः ॥ ४६०२ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**परिणामतो जं भणितं, जिणेहि अह कारणं न याणामि ।**

**दिट्ठंते परिणा[१]मण, परिवाडी उक्कम-कमाणं ॥ ४६०३ ॥**

**अथ यदुक्तं जिनैः परिणामतः** संसारिणामिन्द्रियविभागस्तत्र **कारणं न जानामि।** एवं तेनोक्ते **दृष्टान्तेन परिणामन**मधिकृत्य क्वचिदु**त्क्रमपरिपाटी** वक्तव्या ॥ ४६०३ ॥ एतदेव सविस्तरं भावयति—

**चरिएण कप्पिएण व, दिट्ठंतेणं तहा तयं अत्थं ।**

**उवणेइ जहा णु परो, पत्तियइ अजोग्गरूवं पि ॥ ४६०४ ॥**

**चरितेन कल्पितेन वा दृष्टान्तेन तथा तं** विवक्षित**मर्थमुपनयति यथा परो अयोग्यरूपमपि प्रत्येति** ॥ ४६०४ ॥

**दिट्ठंता परिणामे, कहिज्जते उक्कमेण वि कयाइ ।**

**जह ऊ एगिंदीणं, वणस्सई कत्थई पुव्वं ॥ ४६०५ ॥**



---

१. **णामेण-ला. ॥**

For Private And Personal

**दृष्टान्तात्** परिणामयतीति **परिणामस्तस्मिन्**, दृष्टान्तपरिणामके इत्यर्थः। **कदाचित्** बोधोत्पादानुगुण्येन **उत्क्रमेणापि कथ्यते, यथा शस्त्रपरिज्ञायामेकेन्द्रियाणां** जीवत्वप्रसाधनविधौ **पूर्वं** प्रथमोद्देशके(पञ्चमोद्देशके) **वनस्पतिः कथ्यते,** अन्तिमे चोद्देशके वायुकायिकः ॥ ४६०५ ॥

तत्र प्रथमत उत्क्रमेण वनस्पतीनां जीवत्वप्रख्यापनार्थमाह—

**पत्तंति पुप्फंति फलं ददंती कालं वियाणंति तहिंदियत्थे ।**
**जाती य वुड्ढी य जरा य जेसिं, कहं न जीवा उ भवंति ते ऊ ?॥ ४६०६ ॥**

ये **पत्रयन्ति पुष्पन्ति** पत्राणि मुञ्चन्ति, पुष्पभाजो भवन्ति; **फलं च ददति, कालं** च स्वपत्र-पुष्प-फलनिमित्तं **जानन्ति**। **इन्द्रियार्थांश्च** गीतादीन् **विजानन्ति,** बकुलादीनां तथादर्शनात्। तथा **येषां जातिर्वृद्धिर्जरा च ते कथं जीवा न भवन्ति ?** भवन्त्येवेति भावः, पुरुषादिधर्माणां सर्वेषामपि तत्रोपलभ्यमानत्वात्। प्रयोगश्च— 'वनस्पतयो जीवाः, जाति-जरा-वृद्ध्याद्युपेतत्वात्, मनुष्यवत्' ॥ ४६०६ ॥

**जाहे ते सद्दहिया ताहे, कहिज्जंति पुढविकाईया ।**

**जह उ पवालागर-लोण-उवलगिरीणं परिवुड्ढी ॥ ४६०७॥**

**यदा ते** वनस्पतयो जीवत्वेन **श्रद्धिता** भवन्ति **तदा [ कथ्यन्त यथा ] पृथिवीकायिका** जीवाः **प्रवालाऽऽकरलवणोपलगिरिषु** प्रवालादिषु **परिवृद्धिदर्शनात्**, वनस्पतिवत् ॥ ४६०७॥

**कललंडरसादीया, जह जीवा तहेव आउजीवा वि ।**

**जोइंगण जरिए वा, जहुम्ह तह तेउजीवा वि ॥ ४६०८॥**

**यथा कललं**-गर्भप्रथमावस्थारूपम्, **अण्डरस** इत्येव**मादयो जीवास्तथैवाप्कायजीवा अपि** प्रतिपत्तव्याः। प्रयोगः—'अप्कायिका जीवाः, अनुपहतत्वे सति द्रवत्वात्, कललाऽण्डरसादिवत्'। तथा 'यथा **ज्योतिरिङ्गणः** खद्योतको जीवस्तथा तेजस्कायिका जीवाः, स्वभावत आकाशे गमनात्, ज्योतिरिङ्गणवत्'। **यथा** वा '**ज्वरिते उष्मे**ति सजीवस्**तथा तेजोजीवा अपि**'। प्रयोगभावना त्वेवम्-'तेजस्कायिका जीवाः, असूर्यकिरणत्वे सत्युष्णधर्मोपेतत्वात्, ज्वरितवत्' ॥ ४६०८॥

गाथा ४६०१-४६०८ चरितकल्पित-दृष्टान्तादिः १७०५ (B)

**जाहे सद्दहिता तेऊ, वाऊ जीवा से ताहे सीसंति ।**
**सत्थपरिण्णाए वि य, उक्कमकरणं तु एयट्ठा ॥ ४६०९ ॥**

**यदा** तेजस्कायिकान् जीवत्वेन **श्रद्दधाति तदा से** तस्य **वायवो जीवाः शिष्यन्ते।** यथा—वायवो जीवाः, अपरप्रेरितत्वे सति तिर्यग्गतिगमनात्, गवादिवत् । **शस्त्रपरिज्ञायामपि उत्क्रमकरणं** पूर्वं **वनस्पत्युद्देशस्य** अन्ते **वायुकायिकोद्देशस्य** करणमित्यर्थः, **एतदर्थं** सुखेन जीवत्वप्रतिपत्त्यर्थम् ॥ ४६०९ ॥

उपसंहारमाह—

गाथा ४६०९-४६१७ जड्डुस्वरूपम्:

**एस परिणामगो ऊ, भणितो अहुणा ऊ जड्डुं वोच्छामि ।**
**सो दुविहो नायव्वो, भासाए १ सरीरजड्डो२ उ ॥ ४६१० ॥**

**एष** द्विविधो **परिणामक उक्तः। अधुना जड्डुं वक्ष्ये । स** जड्डो **द्विविधो ज्ञातव्यः।** तद्यथा—**भाषायां** भाषाजड्डुः १ **शरीरजड्डुश्च** २ ॥ ४६१० ॥



For Private And Personal

**जलमूग१ एलमूगो२, मम्मणमूको३ य भासजड्डो य ।**

**दुविहो सरीरजड्डो, थुल्लो १ करणे अनिपुणो २ य ॥ ४६११ ॥**

भाषाजड्डुस्त्रिविधः। तद्यथा— जडमूकः १ एलमूको २ मन्मनमूकश्च ३। शरीरजड्डो द्विविधः। तद्यथा— शरीरेण स्थूलः १ करणे क्रियायामनिपुणश्च २॥ ४६११ ॥

**पढमस्स नत्थि सद्दो, जलमज्झे व भासतो ।**

**बीयओ एलगो चेव, अच्चंतं बुब्बुयायइ ॥ ४६१२ ॥**

प्रथमस्य जलमूकस्य जलमध्ये इव भाषमाणस्य नास्ति शब्दः १ । द्वितीयः एडकमूकः एडक इव [अत्यन्तं] बुब्बुयायते २॥ ४६१२ ॥

**मम्मणो पुण भासंतो, खलए अंतरंतरा।**

**चिरेण नीति से वाया, अविसुद्धा व भासतो ॥ ४६१३ ॥** दारं ३।

मन्मनः पुनर्भाषमाणो अन्तरान्तरा स्खलति। यदि वा तस्य भाषमाणस्य वाक् चिरेण निर्गच्छति, अविशुद्धा वा ॥ ४६१३ ॥

सम्प्रति ['पत्त जहंते संभुंणजा य' गा. ४५८४] ति द्वारमाह—

**दुविहेहि जड्डुदोसेहिं, विसुद्धं जो उ उज्झती ।**

**काया चत्ता भवे तेणं, मासा चत्तारि भारिया ॥ ४६१४॥**

**द्विविधेन जड्डुदोषेण विशुद्धं य उज्झति तेन कायाः** षट् कायाः **त्यक्ता भवेयुः** न संरक्षिताः। तथा तस्य प्रायश्चित्तं **चत्वारो गुरुकाः मासाः** । एतेन सम्भोजनद्वारं व्याख्यातम् ॥ ४६१४॥

**कहिए सद्दहिए चेव, ओयवेंति पडिग्गहे ।**

**मंडलीए उवट्ठं तु, इमे दोसा य अंतरा ॥ ४६१५॥**

षड्जीवनिकाये **कथिते श्रद्धिते च पतद्ग्रहे ओयवेंति** अवतारयन्ति, पतद्ग्रहे तत्र समुद्देशाप्यत इत्यर्थः। एतद् अनुपस्थापितस्य भवति [यदा उपस्थापितः] तदा तं **मण्डल्यां** समुद्देशयेत्। **अन्तरा** पुनर्भेद्यमाने **इमे** वक्ष्यमाणा **दोषाः** ॥ ४५१५॥

तानेवाह—

**पायस्स वा विराहण, अतिही दट्ठूण उड्डवमणं वा ।**

**सेहस्स वा दुगंछा, सव्वे दुद्दिट्ठधम्मत्ति ॥ ४६१६ ॥**

उत्पाटयतो नयत आनयतो वा **पात्रस्य विराधना** स्यात्। यदि वा **अतिथीन् दृष्ट्वा** तस्य **उड्डं ति वमनं** प्रवर्त्तेत, गमनं वा तत एव प्रदेशात् कुर्यात्। **शैक्षस्य वा जुगुप्सा** जनेन क्रियते, यथा—'केनापि दोषेण दुष्ट एष ततः पृथग् भुङ्क्ते'। **सर्वान्** वा कश्चिद् जुगुप्सीत, यथा—'पात्रमप्येवम्भूतं भोजनाद् बहिः कुर्वन्ति, अहो! **दुर्दृष्टधर्माण**' इति ॥ ४६१६ ॥ सम्प्रति 'भूमि-त्ति-य-विवेगो' [गा.४५८४]इत्यस्य व्याख्यानार्थमाह—

**जलमूग एलमूगो, सरीरजड्डो य जो अईथुल्लो ।**

**जं वुत्तं ति विवेगो, भूमित्तिय ते न दिक्खिज्जा ॥ ४६१७॥**

**यदुक्तं 'भूमित्रिकस्य विवेकः'** इति तस्यायमर्थः— **जलमूकः** १ **एलमूकः**२ **शरीरजड्डश्च योऽतिस्थूलः** ३, **तान्** एतान् त्रीन् **न दीक्षयेत्** ॥ ४६१७॥

**दुम्मेहमणातिसेसी, न जाणती जो य करणतो जड्डो ।**
**ते दुन्नि वि तेण उ सो, दिक्खेइ सिया उ अतिसेसी ॥ ४६१८ ॥**

**दुर्मेधसं यश्च करणतो जड्डस्तम् अनतिशेषी** अनतिशायी **न जानाति** तेन कारणेन **तौ द्वावपि स दीक्षयेत्**। अथ **स्यात्** सोऽ**तिशेषी** ततो न दीक्षयति ॥ ४६१८ ॥

**अहव न भासाजड्डुं, जहाति तिपरंपरागयं छउमो ।**
**इयरं पि देसहिंडग, असतीए वा विगिंचेज्जा ॥ ४६१९ ॥**

**अथवा भाषाजड्डुं** दुर्मेधसं **त्रिपरम्परागतं** मातृपक्षपरम्परागतं [पितृपक्षपरम्परागतं] गुरुपक्षपरम्परागतं च **छद्मस्थो न त्यजति । इतरमपि** करणजड्डुं **देशहिण्डकस्य** देशदर्शनाय **असति** चान्यस्मिन् साधौ दीक्षयेत्। अन्यथा **विवेचयेत्** न दीक्षयेत्, दीक्षितं **वा** परिष्ठापयेत् ॥ ४६१९ ॥

अत्रैव मतान्तरं दूषयति—

**मासतुसानाएणं, दुम्मेहतमं पि केइ इच्छंति ।**
**तं न भवति पलिमंथो, ण या वि चरणं विणा नाणं ॥ ४६२० ॥**

**केचिद् माषतुषज्ञातेन दुर्मेधसमपि** दीक्षितु**मिच्छन्ति, तन्न भवति,** यतो दुर्मेधसः पाठने स्वयं सूत्रार्थयोः **पलिमन्थः न चापि** तस्य **ज्ञानं विना चरणम्,** ततः आत्मनः परस्य च केवलक्लेशान्न तद्दीक्षणमिति ॥ ४६२० ॥

**नातिथुल्लं न उज्झंति, मेहावी जो अ बोब्बडो ।**
**जलमूगमेलमूगं च, परिट्ठावेज्ज दोन्नि वि ॥ ४६२१ ॥**

**नातिस्थूलं नोज्झन्ति,** दीक्षयन्तीत्यर्थः । **यश्च मेधावी बोब्बडो** भाषाजडुमपि नोज्झन्ति। **जलमूकमेलकमूकं द्वावप्येतौ परिष्ठापयेत्** न दीक्षयेत् ॥ ४६२१ ॥

**मोत्तूण करणजड्डुं, परियट्टंति जाव सेस छम्मासा ।**
**एक्केक्कं छम्मासा, जस्स व दट्ठुं विविंचणया ॥ ४६२२ ॥**

**मुक्त्वा करणजड्डुं शेषं** दुर्मेधसं भाषाजड्डुं **यावत् षणमासास्तावत् परिवर्त्तयन्ति**

अनुवर्त्तयन्ति। ततः परमन्यस्याऽऽचार्यस्य समर्प्यते, सोऽपि षण्मासान् परिवर्त्तयति । तदनन्तरमन्यस्य, सोऽपि षण्मासान् । एव**मेकैकं** तस्य **षण्मासाः**। तत्र त्रयाणामाचार्याणां मध्ये **यस्य** समीपे शिक्षां गृहीतवान्, यो वा तं **दृष्ट्वा** याचते 'ममैनं शैक्षं देहि' इति तस्य दानमित्यर्थः ॥ ४६२२॥

अमुमेवार्थं स्पष्टतरमाह—

**तिण्हं आयरियाणं, जो णं गाहेइ सीसो तस्सेव ।**
**जइ एत्तिएण गाहितो, ता न परिट्ठावए ताहे ॥ ४६२३॥**

**त्रयाणामाचार्याणां** मध्ये **यो ग्राहयति तस्यैव शिष्यः** स दीयते। **यदि एतावता** आचार्यत्रिकेण परिपाट्या मिलित्वा **ग्राहितो** भवति ततस्तदा **न परिष्ठाप्यते** ॥ ४६२३॥

**देंति अजंगमथेराण वा वि, अहवा वि दट्ठुणं जो उ ।**
**भणती मज्झं कज्जं, दिज्जइ तस्सेव सो ताहे ॥ ४६२४॥**

**अथवा अजङ्गमस्थविराणां** स वैयावृत्त्यकरणाय **दीयते** । यदि वा **यस्तं दृष्ट्वा भणति**— '**मम कार्य**मेतेन तस्माद् दीयतामिति,' **ततः स तस्यैव दीयते** ॥ ४६२४॥

**जो पुण करणे जड्डो, उक्कोसं तस्स होइ छम्मासा ।**
**कुल गण-संघनिवेयण, एयं तु विहिं तहिं कुज्जा ॥ ४६२५ ॥**

**यः पुनः करणजड्डः तस्योत्कृष्टं** परिपालनं **भवति** यावत् **षण्मासाः**। ततः परं **कुलस्य गणस्य सङ्घस्य** वा **निवेदनं** क्रियते । स यत् करोति तत् प्रमाणम्, **एतं विधिं तत्र कुर्यात्** ॥ ४६२५ ॥

**सूत्रम्—नो कप्पति निग्गंथाण वा निग्गंथीण वा खुड्डुगं वा खुड्डियं वा ऊणट्ठवासजायं उवट्ठावेत्तए वा संभुजित्तए वा ॥ १८ ॥**

**कप्पइ निग्गंथाण वा निग्गंथीण वा खुड्डुगं वा खुड्डियं वा साइरेगअट्ठवासजायं उवट्ठावेत्तए वा संभुजित्तए वा ॥ १९ ॥**

इत्यादि । अस्य सम्बन्धप्रतिपादनार्थमाह—

**पव्वज्जापरियातो, वुत्तो सेहो ठविज्जए जत्थ ।**
**जम्मणपरियागस्स उ, विजाणणट्ठा इमं सुत्तं ॥ ४६२६ ॥**

**प्रव्रज्यापर्यायो**ऽनन्तरसूत्रेणोक्तो **यत्र शैक्षः स्थाप्यते**। सम्प्रति तस्यैव **जन्मपर्यायस्य विज्ञानार्थमिदं सूत्र**मित्येष सम्बन्धः ॥ ४६२६ ॥

सूत्रास्याक्षरगमनिका— **न कल्पते निर्ग्रन्थानां वा निर्ग्रन्थीनां वा क्षुल्लकं वा क्षुल्लिकां वा ऊनाष्टवर्षजातामुपस्थापयितुं वा सम्भोक्तुं वा** मण्डल्याम् । तथा— **कल्पते निर्ग्रन्थानां वा निर्ग्रन्थीनां वा क्षुल्लकं वा क्षुल्लिकां वा सातिरेकाष्टवर्षजाता**मुपस्थापयितुं वा, **उपस्थाप्य** मण्डल्यां **सम्भोक्तुं वा** ॥ ॥ अथ कस्मादूनाष्टवर्षजातस्योपस्थापनादि न कल्पते ? तत आह—

**ऊणऽट्ठाए चरित्तं, न चिट्ठए चालणीए उदगं वा ।**
**बालस्स य जे दोसा, भणिया आरोवणा जा य ॥ ४६२७॥**

**ऊनाष्टके** ऊनाष्टवर्षजाते बाले **चालन्यामुदकमिव चारित्रं न तिष्ठति । तथा ये बालस्य दोषा भणिताः, या च** बालस्योपस्थापने **आरोपणा** सा प्रसजति ॥ ४६२७॥

बालस्य दोषानाह—

**काय-वइ-मणोजोगा, हवंति तस्स अणवट्ठिया जम्हा ।**
**संबंधि अणाभोगे, ओमे सहसाऽववादेणं ॥ ४६२८॥**

**तस्य** बालस्य **काय-वाङ्-मनोयोगा यस्मादनवस्थिता भवन्ति** तस्मान्नोपस्थापयेत् । अत्रैवापवादमाह— **सम्बन्धिनमनाभोगे अवमे** दुर्भिक्षे **सहसा**कारेण वा सम्भोजने**ऽपवादेनोप**-स्थापयेदूनाष्टवर्षजातमपि ॥ ४६२८॥

तत्र सम्बन्धिद्वारव्याख्यानार्थमाह—

**भुंजिस्सेस मया सद्धिं, नीयो नेच्छइ संपयं ।**
**सो य नेहेण संबद्धो, कहं चिट्ठेज्ज तं विणा ? ॥ ४६२९॥**

**एषः** बालको **मया सह भोक्ष्यते** इत्येवं भणित्वा **नीतो** मण्डल्याम् । स च **सम्प्रति** तमाचार्यं विना भोक्तुं **नेच्छति । स वाऽऽ**चार्यस्य **स्नेहेन सम्बद्ध**स्ततः **कथं** प्रव्रज्यां गृहीतायां [**तं**] सहभोजनं **विना तिष्ठेत्**? नैव तिष्ठेदिति भावः ॥ ४६२९॥

**अणुवट्ठविओ एसो, संभुंजइ, मा [१]बुवेज्ज अपरिणया ।**
**ताहे उवठाविज्जइ, तो णं संभुंजणं ताहे ॥ ४६३०॥**

१. **बेज्व** - ला.। पु.प्रे.॥

तत्र हु निश्चितमपरिणता मा ब्रूयुरेवम्—यथैषोऽनुपस्थापितो मण्डल्यां सम्भुङ्क्ते, ततः स तदा उपस्थाप्यते। तदनन्तरं सम्भोजनं मण्डल्यामिति ॥ ४६३० ॥

**अहव अणाभोगेणं, सहसक्कारेण वा वि होज्ज संभुत्तो ।**
**ओमम्मि वि मा हु तओ, विप्परिणामं तु गच्छेज्जा ॥ ४६३१ ॥**

**अथवा अनाभोगेन सहसाकारेण वा** मण्डल्यां **सम्भुक्तो भूयात्**, ततो 'मा प्रापदनवस्थाप्रसङ्गः' इति तमूनाष्टवर्षजातमप्युपस्थाप्य मण्डल्यां सम्भोजयेत् । **अवमे** दुर्भिक्षे जाते **मा विपरिणामं गच्छे**दिति उपस्थाप्य मण्डल्यां सम्भोज्यते ॥ ४६३१ ॥ एतदेव भावयति—

**अदिक्खायंति ओमे मं, इमे पच्छन्नभोजिणो ।**
**परोऽहमिति भावेज्जा, तेणावि सह भुंजते ॥ ४६३२ ॥**

इमे **प्रच्छन्नभोजिनो मा अवमे** दुर्भिक्षे **अदीक्षयन्ति** अदीक्षां कर्तुमिच्छन्ति, तेन कारणेनाहं **परः** कृत इति स **भावयेत्**, ततः **तेनापि सह** झटित्येवोपस्थापितेन **सम्भुङ्क्ते** ॥ ४६३२ ॥ सूत्रम्—

**सूत्रम्— नो कप्पइ निग्गंथाण वा निग्गंथीण वा खुड्डगस्स वा खुड्डियाए वा अव्वंजणजायस्स आयरकप्पे णामं अज्झयणे उद्दिसित्तए ॥ २० ॥**

**कप्पइ निग्गंथाण वा निग्गंथीण वा खुड्डगस्स वा खुड्डियाए वा वंजणजायस्स आयरकप्पे णामं अज्झयणे उद्दिसित्तए ॥ २१ ॥**

"कप्पइ निग्गंथाण वा" इत्यादि । अस्य सम्बन्धमाह—

**लेहट्ठऽट्ठमवरिसे, उवट्ठा, मा पसंगतो ।**
**उद्देसे सेससुत्तं पि, सुत्तस्सेस उवक्कमो ॥ ४६३३ ॥**

रेखास्थं परिपूर्णमष्टमं वर्षं यस्य स **रेखास्थाष्टमवर्षः** तस्मिन्। अनन्तरसूत्रेणो**पस्थाप-ना**ऽनुज्ञाता, ततो **मा तत्प्रसङ्गतः शेषसूत्रमप्युद्दिशेदिति सूत्रस्या**धिकृतस्य **एषः उपक्रमः** सम्बन्धः ॥ ४६३३ ॥

सूत्रस्य व्याख्या— **न कल्पते निर्ग्रन्थानां वा निर्ग्रन्थीनां वा क्षुल्लकस्य वा क्षुल्लिकाया वा अव्यञ्जनजातस्य** न व्यञ्जनानि- उपस्थरोमाणि जातानि यस्य स तथा तस्य **आचारप्रकल्पो नामाध्ययनं निशीथापरपर्यायमुद्देष्टुम्** ॥ ४६३३ ॥

अत्र कारणं **भाष्यकृदाह—**

**अहियऽट्ठमवरिसस्स वि, आयारे वि पठिते न उ पकप्पं ।**
**देंति अवंजणजातस्स, वंजणाणं परूवणा ॥ ४६३४ ॥**

**जहा चरित्तं धारेउं, ऊणऽट्ठो उ अपच्चलो ।**
**तहाविऽपक्कबुद्धीओ, अववायस्स नो सहू ॥ ४६३५ ॥**

**अधिकाष्टमवर्षस्यास्य पठितेऽपि आचारे** अव्यञ्जनजातस्य अत्र व्यञ्जनानां प्ररूपणा कर्त्तव्या, सा च सूत्रव्याख्यायां कृता **न तु** नैव सूरयः **प्रकल्पम् आ**चारप्रकल्पं नामाध्ययनं ददति ॥ ४६३४ ॥ कुतः ? इत्याह—

**जहे**त्यादि, यथा **ऊनाष्टः** ऊनाष्टवर्ष**श्चारित्रं धारयितुम् अप्रत्यलः** असमर्थः, **तथा** अजातव्यञ्जनतया **अविपक्वबुद्धिः** अपरिपाका **यस्य** बुद्धि**रपवादस्य** धारणे **न समर्थ**स्ततो न ददति ॥ ४६३५ ॥ तथा [ २१ तम=सूत्रस्य व्याख्या]—

**कल्पते निर्ग्रन्थानां वा निर्ग्रन्थीनां वा क्षुल्लकस्य वा क्षुल्लिकाया वा व्यञ्जनजातस्य**

**आचारप्रकल्पो नामाध्ययनमुद्देष्टुम् ॥**

अथ स्तोककालदीक्षितस्यापि जातव्यञ्जनस्य दीयते ? किं वा न? इत्यत आह—

**सूत्रम्— तिवासपरियागस्स समणस्स णिग्गंथस्स कप्पइ आयारपकप्पे नामं अज्झयणे उद्दिसित्तए ॥ २२ ॥**

'तिवासपरियागस्से'त्यादि । जातव्यञ्जनस्यापि **त्रिवर्षपर्यायस्य श्रमणस्य निर्ग्रन्थस्य कल्पते आचारप्रकल्पो नामाध्ययनमुद्देष्टुम्।** यदि पुनस्त्रयाणां वर्षाणामारत उद्दिशति ततस्तस्य प्रायश्चित्तं चत्वारो गुरुकाः। त्रिवर्षपर्यायस्याप्यपरिणामकस्यातिपरिणामकस्य वोद्दिशतश्चतुर्गुरुकम् ॥

**सूत्रम्—चउवासपरियागस्स समणस्स निग्गंथस्स कप्पति सूयगडे नामं अंगे उद्दिसित्तए॥ २३ ॥**

**पंचवासपरियागस्स समणस्स निग्गंथस्स कप्पति दसा-कप्प-ववहारा उद्दिसित्तए ॥२४॥**

**विअट्ठवासपरियागस्स समणस्स निग्गंथस्स कप्पति ठाण-समवाये उद्दिसित्तए ॥ २५ ॥**

**दसवासपरियागस्स समणस्स निग्गंथस्स कप्पति विवाहे नामं अंगे उद्दिसित्तए ॥ २६ ॥**

[अस्य व्यख्या] **चतुर्वर्षपर्यायस्य श्रमणस्य निर्ग्रन्थस्य कल्पते सूत्रकृतं नामाङ्गमुद्देष्टुम्॥**

**पञ्चवर्षपर्यायस्य दशा-कल्प-व्यवहाराः ॥**

**विकृष्टो** नाम-षड्भ्य आरभ्य नव वर्षाणि यावत्, तत्पर्यायस्य **स्थानं समवायश्च** ॥

**दशवर्षपर्यायस्य व्याख्याप्रज्ञप्तिः'** पञ्चममङ्गम् ॥ एतदेव सहेतुकं वक्तुकामो **भाष्य**कृदाह—

**चउवासे सूयगडं, कप्प-व्ववहार पंचवासस्स ।**
**विगट्ठ ठाण समवातो दसवरिस वियाहपन्नत्ती ॥ ४६३६ ॥**

**चतुर्वर्षे** चतुर्वर्षपर्यायस्य **सूत्रकृतम्** । **पञ्चवर्षस्य कल्प-व्यवहारौ** उपलक्षणमेतत्, दशाश्रुतस्कन्धश्च। **विकृष्टस्य** विकृष्टपर्यायस्य **स्थानं समवायश्च** । **दशवर्ष**पर्यायस्य **व्याख्याप्रज्ञप्तिरुद्दिश्यते** ॥ ४६३६ ॥

किं कारणमेतावत्कालातिक्रमणे? तत आह—

**चउवासोगाढमती, न कुसमएहिं तु हीरए सो उ ।**
**पंचवरिसो उ जोग्गो, अववायस्स त्ति तो देंति ॥ ४६३६ ॥**

**पंचण्हुवरि विगिट्ठो, सुयथेरो जेण तेण उ विगिट्ठो ।**
**ठाणं महिड्ढियं ति य, तेणं दसवासपरियाए ॥ ४६३८ ॥**

**सूत्रकृताङ्गे** त्रयाणां त्रिषट्याधिकानां पाषण्डिकशतानां दृष्टयः प्ररूप्यन्ते, ततो हीनपर्यायो मतिभेदेन मिथ्यात्वं यायात् , **चतुर्वर्ष**पर्यायस्तु धर्मे **अवगाढमति**र्भवति, ततः **कुसमयैर्नापह्रियते,** तेन चतुर्वर्षपर्यायस्य तदुद्देष्टुमनुज्ञातम् । तथा **पञ्चवर्षोऽपवादस्य योग्य इति** कृत्वा पञ्चवर्षस्य दशा-कल्प-व्यवहारान् **ददति** ॥ ३६३८ ॥ तथा—

**पञ्चानां** च **वर्षाणामुपरि** पर्यायो **विकृष्ट** उच्यते, **येन** कारणेन **स्थानेन समवायेन** चाऽधीतेन **श्रुतस्थविरा** भवन्ति, **तेन** कारणेन तदुद्देशनं प्रति **विकृष्ट**पर्यायो गृहीतः । तथा **स्थानं** समवायश्च **महर्द्धिकं,** प्रायेण द्वादशानामप्यङ्गानां **तेन** सूचनादिति तेन तत्परिकर्मितमतौ **दशवर्षपर्याये व्याख्या-प्रज्ञप्तिरुद्दिश्यते** ॥ ४६३८ ॥

**सूत्रम्—एक्कारसवासपरियागस्स समणस्स निग्गंथस्स कप्पति खुड्डियाविमाणपविभत्ती, महल्लियाविमाणपविभत्ती, अंगचूलिया, वग्गचूलिया, विवाहचूलिया नामं अज्झयणमुद्दिसित्तए ॥ २७॥**

अस्य व्याख्या—

**एक्कारसवासस्सा, खुड्डि महल्ली विमाणपविभत्ती ।**
**कप्पइ य अंग-वग्गे, विवाहे चेव चूलियाए ॥ ४६३९ ॥**

**अंगाणमंगचूली, महकप्पसुयस्स वग्गचूली उ ।**
**वीवाहचूलिया पुण, पण्णत्तीए मुणेयव्वा ॥ ४६४० ॥**

**एकादशवर्षस्य क्षुल्लिका** विमानप्रविभक्तिः, यत्र कल्पेषु विमानानि अनुत्तरविमानानि च वर्ण्यन्ते, **महती विमानप्रविभक्तिः**, यत्र तान्येव विमानानि विस्तरेणाभिधीयन्ते।

**अङ्गानाम्** उपासकदशाप्रभृतीनां पञ्चानां **चूलिका** निरावलिका **अङ्गचूलिका**।

**महाकल्पश्रुतस्य** चूलिका **वर्गचूलिका । व्याख्याचूलिका पुनः प्रज्ञप्तेः** व्याख्याप्रज्ञप्तेश्चूलिका **मन्तव्या** ॥ ४६३९ ॥ ४६४० ॥

**सूत्रम्— बारसवासपरियागस्स समणस्स निग्गंथस्स कप्पति अरुणोववाए[1], गरुलोववाए, वरुणोववाए, वेसमणोववाए, वेलंधरोववाए नामं अज्झयणे उद्दिसित्तए ॥ २८ ॥**

अत्र **भाष्येण** व्याख्या—

**बारसवासे अरुणोववाय वरुणे य गरुल वेलधरे ।**
**वेसमणुववाए य तहा, एते कप्पंति उद्दिसिउं ॥ ४६४१ ॥**

**द्वादशवर्षे** द्वादशवर्षपर्यायस्य **अरुणोपपातः वरुणे य** त्ति वरुणोपपात-**गरुडोपपातौ वेलन्धरोपपातो वैश्रमणोपपातश्च, एतानि** पञ्चाध्ययनान्युद्देष्टुं **कल्पन्ते** ॥ ४६४१ ॥

---

१. अरुणोववाए, वरुणोववाए, गरुलोववाए, धरणोववाए,वेसमणोववाए इति-आगमप्रकाशन समिति व्यवहार संस्करणे पाठः ॥

**तेसिं सरिनामा खलु, परियट्टिज्जंति एंति देवा उ।**
**अंजलिमउलियहत्था, उज्जोवेंता दस दिसातो ॥ ४६४२॥**

**नामा वरुणा वासं, अरुणा गरुला य बीयगं देंति ।**
**आगंतूण य बेंती, संदिसहा किं करोमि? त्ति ॥ ४६४३॥**

**तेषाम्** अरुणोपपातादीनाम् अध्ययनानां ये **सदृशनामानः खलु** अरुणादयो देवास्ते यदि तान् प्रणिधायाध्ययनानि **परावर्त्त्यन्ते** तदा **ते अञ्जलिमुकुलितहस्ता दशापि दिश उद्योतयन्तः समागच्छन्ति**, समागत्य च किङ्करभूताः पर्युपासते । [१]तथानामानो **वरुणाश्च** [**वासं**] गन्धोदकादिवर्षं वर्षन्ति। **अरुणा गरुडाश्च बीजकं** सुवर्णं ददति प्रत्यासन्नमागत्य **च ब्रुवते सन्दिशत, किं कुर्मो** वयम्? **इति** ॥ ४६४२॥ ४६४३॥

**सूत्रम्— तेरसवासपरियागस्स समणस्स निग्गंथस्स कप्पति उट्ठाणसुए, समुट्ठाणसुए, [२]देविंदपरियावणिए, नागपरियावणियाए ॥ २९॥**



---

१. मु.। तथा नागावरणनामानो अरुणाश्च गन्धोदकादि पु.प्रे ॥ २ देवेंदोववाए नाग पु. प्रे. ॥

अस्य व्याख्या—

**तेरसवासे कप्पति, उट्ठाणसुते तहा समुट्ठाणे ।**

**देवेंदपारियाणिय[1], नागाण तहेव परियाणी ॥ ४६४४ ॥**

**त्रयोदशवर्षस्य कल्पते उत्थानश्रुतं तथा समुत्थानं** समुत्थानश्रुतं **देवेन्द्रपरियापनिका नागानां तथैव परियापनिका** नागपरियापनिका इत्यर्थः ॥ ४६४४ ॥

साम्प्रतममीषामध्ययनानामतिशयमाह—

**परियट्टिज्जइ जहियं, उट्ठाणसुयं तु तत्थ उट्ठेइ ।**

**कुल-गाम-देसमादी, समुट्ठाणसुए निविस्संति ॥ ४६४५ ॥**

**देवेंदा नागा वि य, परियाणीएसु एंति ते दोवी ।**

**चोद्दसवासुद्दिसती, महासुमिणभावणज्झयणं ॥ ४६४६ ॥**



---

१. परियावणिय -ला.। परियावण -मु.॥

यत्र प्रणिधाने **उत्थानश्रुतं परावर्त्त्यते तत्र कुल-ग्राम-देशादि उत्तिष्ठति** उद्वसीभवतीत्यर्थः। ततः कार्ये निष्पन्ने '**समुत्थानश्रुते**' परावर्त्यमाने ते कुल-ग्राम-देशादय स्वस्थीभूय पुन**र्निविशन्ति** ॥ ४६४५ ॥

देवेन्द्र**परियापनिकायां** परावर्त्यमानायां **देवेन्द्रा** नागपरियापनिकायां **नागाः समागच्छन्ति** ॥

**चोद्दशवासुद्दिसए** इत्यादिभाष्यगाथोत्तरार्द्धं सुप्रतीतम् ॥ ४६४६ ॥

**सूत्रम्—चउदसवासपरियागस्स समणस्स निग्गंथस्स कप्पति सुमिणभावणानामं अज्झयणमुद्दिसित्तए॥ ३० ॥**

[अस्य व्याख्या] **चतुर्दशवर्षपर्यायस्य श्रमणस्य निर्ग्रन्थस्य कल्पते महास्वप्नभावना नामाध्ययनमुद्देष्टुम्** ॥ अधुनाऽध्ययनार्थमाह—

**इत्थं तीसं सुमिणा, बायाला चेव होंति महसुमिणा ।**
**बावत्तरि सव्वसुमिणा, वण्णिज्जंते फलं तेसिं ॥ ४६४७॥**

**अत्र महास्वप्नभावनाध्ययने त्रिंशत्** सामान्यस्वप्नाः, **द्वाचित्वारिंशद् महास्वप्नाः, द्वासप्ततिः सर्वस्वप्ना वर्ण्यन्ते, फलं चैषां** स्वप्नानां वर्ण्यते ॥ ४६४७ ॥

**सूत्रम्—पन्नरसवासपरियागस्स समणस्स निग्गंथस्स कप्पइ चारणभावणा नामं अज्झयणमुद्दिसित्तए** ॥ ३१ ॥

अत्र **भाष्यम्**—

**पन्नरसे चारणभावण त्ति उद्दिस्सए उ अज्झयणं ।**

**चारणलद्धी तहियं, उप्पजंती तु अहियम्मि ॥ ४६४८ ॥**

**पञ्चदशे** पञ्चदशवर्षपर्यायस्य चारणभावना **इत्यध्ययनमुद्दिश्यते** । तस्य कोऽतिशयः ? इत्याह—**चारणलब्धिस्तस्मिन्नधीते उत्पद्यते**, येन वा तपसा कृतेन चारणलब्धिरुपजायते तदुपवर्ण्यते ॥४६४८॥



**सूत्रम्—सोलसवासपरियागस्स समणस्स निग्गंथस्स कप्पति तेयनिसग्गं नामं अज्झयणं उद्दिसित्तए** ॥ ३२ ॥

**सत्तरसवासपरियागस्स समणस्स निग्गंथस्स आसीविसभावणा नामं**

**अज्झयणमुद्दिसित्तए ॥ ३३ ॥**

**अट्ठारसवासपरियागस्स समणस्स निग्गंथस्स कप्पति दिट्ठीविसभावणानामं अज्झयणं मुद्दिसित्तए ॥ ३४ ॥**

**एगूणवीसवासपरियागस्स समणस्स निग्गंथस्स कप्पति दिट्ठिवायनामं अंगे उद्दिसित्तए ॥ ३५ ॥**

**वीसतिवासपरियाए समणे निग्गंथे सव्वसुयाणुवाती भवति ॥ ३६ ॥**

अस्य व्याख्या—

**[१]तेयनिसग्गा सोलसे, आसीविसभावणं च सत्तरसे ।**
**दिट्ठीविस अट्ठारस, उगुण वीसे दिट्ठिवाओ य ॥ ४६४९ ॥**

**षोडशे वर्षे तेजोनिसर्गो** नामाध्ययनमुद्दिश्यते। **सप्तदशे** वर्षे **आशीविषभावना**मुद्दिशन्ति। **दृष्टिविषभावनामष्टादशे** वर्षे। **एकोनविंशे** एकोनविंशतितमे वर्षे **दृष्टिवादो** नाम

१. तेअग्गिसग्गा - पु.प्रे.॥

द्वादशमङ्गमुद्दिश्यते ॥ ४६४९ ॥

साम्प्रतमेतेषामध्ययनानामतिशयानाह—

**तेयस्स निसरणं खलु, आसीविसत्तं तहेव दिट्ठिविसं ।**

**लद्धीतो समुप्पज्जे, समहीएसुं तु एएसु ॥ ४६५० ॥**

एतेषु तेजोनिसर्गप्रभृतिष्वध्ययनेषु **समधीतेषु** यथाक्रमं **तेजसो निस्सरणम्** १ **आशीविषत्वं** २ **दृष्टौ विषम्** ३ इत्येता **लब्धयस्समुत्पद्यन्ते** इयमत्र भावना-**तेजोनिसर्गे**ऽध्यनेऽधीते तेजो निस्सरणलब्धिरुत्पद्यते, येन वा तपसा कृता तेजोलब्धिर्भवति, तच्च तत्रोपवर्ण्यते । **आशीविषभावनायां** पठितायां आशीविषत्वलब्धिः, यैर्वा समाचरणैराशीविषतया कर्म बध्यते तान्युपवर्ण्यन्ते । एवं दृष्टिविषभावनायामपि भावनीयम् ॥ ४६५५० ॥

**दिट्ठीवाए पुण होइ सव्वभावाण रूवणं नियमा ।**

**[1]सव्वस्सुयाणुवाई, वीसतिवासे उ बोधव्वो ॥ ४६५१ ॥**

दृष्टिवादे पुनर्भवति सर्वभावानां प्ररूपणं नियमात् । विंशतिवर्षः पुनः

१. सव्वसुत्ताणुवादी -ला.। सव्वसुयाणुवाइ -मु. ॥

**सर्वश्रुतानुपाती** भवति, सर्वमपि श्रुतं यथाभणितेन योगेन तस्य पठनीयं भवति ॥ ४६५१ ॥

अथ कस्य तीर्थकरस्य काले कियन्ति प्रकीर्णकान्यभवन्? इत्यत आह—

**चउदस य सहस्साइं, पइन्नगाणं तु वद्धमाणस्स ।**
**सेसाण जत्तिया खलु, सीसा पत्तेयबुद्धा उ ॥ ४६५२ ॥**

भगवतो **वर्द्धमानस्वामिनस्तीर्थे चतुर्द्दश प्रकीर्णकसहस्राण्य**भवन् ॥ ४६५२ ॥ **शेषाणां** च तीर्थकृतां यस्य यावन्तः **शिष्यास्तस्य** तावन्ति प्रकीर्णकानि । प्रत्येकबुद्धा अपि तस्य तावन्तो भवन्ति ॥ ४६५२ ॥

**पत्तस्स पत्तकाले, एयाणिं जो उ उद्दिसे तस्स ।**
**निज्जरलाभो विउलो, किह पुण ? तं मे निसामेह ॥ ४६५३ ॥**

**पात्रस्य** योग्यस्य परिणामकस्येत्यर्थः । एतेनापात्रेऽपरिणामकेऽतिपरिणामिके वा ददतो महती श्रुताशातनेति प्रतिपादितम् । **प्राप्ते काले** यथोदिते **एतानि** प्रकीर्णकानि य **उद्दिशति**

**तस्य सुविपुलो निर्जरालाभः** । **कथं पुनः** विपुलो लाभः ? सूरिराह— **तं** विपुलं निर्जरालाभं कथ्यमानं **निशमयत मे** कथयतः ॥ ४६५३ ॥

**कम्ममसंखिज्जभवं, खवेइ अणुसमयमेव आउत्तो ।**
**अन्नयरगम्मि जोगे, सज्झायम्मी विसेसेण ॥ ४६५४॥**

**कर्म** ज्ञानावरणीयादिक**मसङ्ख्येयभवो**पार्जितम् **अन्यतरकेऽपि योगे** प्रतिलेखनादा**वायुक्तः अनुसमयमेव** प्रतिसमयमेव **क्षपयति, विशेषतः स्वाध्याये** आयुक्तः ॥ ४६५४ ॥

**आयारमादिआणं, अंगाणं जाव दिट्ठिवातो उ ।**
**एस विही विन्नेयो, सव्वेसिं आणुपुव्वीए ॥ ४६५५॥**

**आचारादिकानामङ्गानां यावद् दृष्टिवादः** दृष्टिवादपर्यन्तानां **सर्वेषामानुपूर्व्या एषः** अनन्तरोदितो **विधिर्विज्ञेयः**, पात्रस्योचिते काले यदुचितमङ्गं तद् दातव्यम्, न शेषमित्यर्थः ॥४६५५॥



For Private And Personal

**सूत्रम्— दसविहे वेयावच्चे पन्नते । तं जहा—आयरियवेयावच्चे १, उवज्झायवेयावच्चे २, थेरवेयावच्चे ३, तवस्सिवेयावच्चे ४, सेहवेयावच्चे ५, गिलाणवेयावच्चे ६, साहम्मियवेयावच्चे ७, कुलवेयावच्चे ८, गणवेयावच्चे ९, संघवेयावच्चे १०। आयरियवेयावच्चे करेमाणे निग्गंथे महानिज्जरे महापज्जवसाणे भवति ॥ ३७॥**

अस्याक्षरगमनिका— नवरम् वैयावृत्त्यं त्रयोदशभिः पदैः। तान्यग्रे वक्ष्यन्ते । तथा **महानिर्जरः** प्रतिसमयमनन्ताऽनन्तकर्मपरिमाणुनिर्जरणात् । **महापर्यवसानः** सिद्धिगमनात् ॥ अत्र **भाष्यप्रपञ्चः**—



**दसविह वेयावच्चं, इमं समासेण होइ विन्नेयं ।**
**आयरिय१ उवज्झाए२, थेरे३ य तवस्सि४ सेहे५ य ॥ ४६५६॥**

**अतरंत६ कुल७ गणे८या, संघे९ साहम्मि वेज्जवच्चे १० य ।**
**एतेसिं तु दसण्हं, कायव्वं तेरसपएहिं । ४६५७॥**

**दशविधमिदं** वक्ष्यमाणं **समासेन विज्ञेयम्** । तद्यथा-**आचार्यस्य १ उपाध्यायस्य २**

**स्थविरस्य** ३ **तपस्विनः** ४ **शैक्षकस्य** ५ **अतरन्**-ग्लानस्तस्य ६ **कुलस्य, गणस्य** ८ **सङ्घस्य** ९ **साधर्मिकवैयावृत्त्यम्** १०। गाथायां सप्तमी सर्वत्र प्रतिपत्तव्या । **एतेषां तु** आचार्यादीनां दशानामपि यथायोगं **त्रयोदशभिः पदैर्**वैयावृत्त्यं **कर्त्तव्यम्** ॥ ४५५६ ॥ ४६५७ ॥

तान्येव त्रयोदश पदान्याह—

**भत्ते१पाणे२सयणा३ऽऽसणे४ य पडिलेह५ पाय६ मच्छि७मद्धाणे ८ ।**
**राया९ तेणे१० दंडग्गहे११ य गेलन्न१२ मत्ते१३ य ॥ ४६५८ ॥**

**भक्ते** भक्तानयनेन वैयावृत्त्यं कर्त्तव्यम् १, **पाने** पानीयाऽऽनयनेन २, **शयने** वसत्या संस्तारकेण वा ३ । **आसने** आसनप्रदानेन ४। **प्रतिलेखने** क्षेत्रस्योपधेर्वा प्रत्युपेक्षणेन ५। **पाए** त्ति पादप्रमार्जनेन यदि वा औषधपानेन ६। **अक्ष्णि** अक्षिरोगिणो भेषजप्रदानेन ७। **अध्वनि** अध्वानं प्रपन्नानामुपग्रहेण ८। **राजद्विष्टे** निस्तारणेन ९। **तेण** त्ति [उपधिस्तेनेभ्यः] शरीरस्तेनेभ्यश्च संरक्षणेन १०। तथा विचारादिभ्य आगतानां **दण्डग्रहणेन** ११। **ग्लानत्वे** जाते यद् योग्यं तत्सम्पादनेन १२। **मत्ते य** त्ति मात्रकत्रिकढौकनेन १३। एतानि त्रयोदश पदानि ॥ ४६५८ ॥

**जा जस्स होइ लद्धी, तं तु न हावेइ संतविरियम्मि ।**
**एयाणुत्तत्थाणि उ, पायं किंचित्थ वोच्छामि ॥ ४६५९ ॥**

**या यस्य भवति लब्धिः स तां सति वीर्ये** पराक्रमे **न हापयेदिति** ख्यापनार्थं त्रयोदश पदान्युपात्तानि। **एतानि च 'उक्तार्थानि'** सुप्रतीतानि [**प्रायः**] तथापि **किञ्चिदत्र** विनेयजनानुग्रहाय **वक्ष्यामि** ॥ ४६५९ ॥

**पायपरिकम्म पाए, ओसहभेसज्ज देइ अच्छीणं ।**
**अद्धाणे उवगेण्हइ, रायदुट्ठे य नित्थारे ॥ ४६६० ॥**

**पाए** त्ति [पादयोः] **पादपरिकर्म** प्रमार्जनादि करोति, यदि वा औषधं पाययन्ति। **अच्छि** त्ति अक्ष्णो रोगे समुत्पन्ने **भैषजं ददाति । अध्वनि** प्रतिपन्नान् **उपगृह्णाति** उपधिग्रहणतो विश्रामणाकरणेन वा उपष्टभ्नाति । **राजद्विष्टे** समुत्पन्ने ततो **निस्तारयति** ॥ ४६६० ॥

**सरीरोवहितेणेहिं, सारक्खइ सति बलम्मि संतम्मि ।**
**दंडग्गहं व कुणती, गेलन्ने यावि जं जोग्गं ॥ ४६६१ ॥**

**शरीरस्तेनेभ्य उपधिस्तेनेभ्यश्च सति** विद्यमाने **बले** सति **संरक्षति**। विचारभूम्यादिभ्य आगतानां पर्यायादिवृद्धानां साधूनां **दण्डग्रहं**[1] **करोति । ग्लानत्वे च** जाते **यद् योग्यं** तत् सम्पादयति ।।४६६१ ।।

**उच्चारे१ पासवणे२ खेले३ मत्तयतियं तिविहमेयं ।**
**सव्वेसिं कायव्वं, साहम्मिए तत्थिमो विसेसो ।। ४६६२ ।।**

**उच्चारे १ प्रश्रवणे २ खेले** श्लेष्मणि३ **मात्रकत्रिकम् । एतत्** त्रयोदशपदात्मकं वैयावृत्त्यं **त्रिविधं** मनसा वाचा कायेन **सर्वेषाम्** आचार्यादीनां दशानामपि **कर्त्तव्यम् । तत्रायं साधर्मिके विशेषः** ।। ४६६२ ।।

तमेवाह—

**होज्जा गिलाणो निण्हवो उ, न य तत्थ विसेस जाणइ जणो उ ।**
**तुब्भेत्थं पव्वतितो, न तरइ किं न कुणह**[2] **तस्स ।। ४६६३ ।।**



१. दण्डग्रहणं -मु. ।। २. मु.। कुणह लेसाणं -पु.प्रे. ।।

**ताहे मा उड्डाहे, होउ त्ती तस्स फासुएणं तु ।**
**पडोयारेण करेति, चोएती एत्थ अह सीसो ॥ ४६६४॥**

को॒ऽपि **निह्नवः** क्वापि **ग्लानो भवेत्, न च तत्र जनो विशेषं जानाति** 'एष निह्नवः, एते च सुसाधवः' इति, ततो ब्रूयात्-**युष्माकमत्र प्रव्रजितः न तरति** न शक्नोति **तस्य किं न कुरुत** प्रतिजागरणम्? ॥४६६३॥ **ततो 'मा भूत् प्रवचनस्योड्डाहः' इति तस्यापि प्रासुकेन प्रत्यवतारेण** भक्तपानादिना वैयावृत्त्यं **करोति । अथ** अनन्तरमत्र **शिष्यः चोदयति** प्रश्नयति ॥ ४६६४॥

किं तत्? इत्याह—

**तित्थगरवेयवच्चं, न भणियमित्थं तु किं न कायव्वं? ।**
**किं वा न होति निज्जर, तहियं? अह बेति आयरितो ॥ ४६६५॥**

**अत्र तीर्थकरवैयावृत्त्यं कस्मान्न भणितम्? किं तन्न कर्त्तव्यम्? किं वा तत्र निर्जरा न भवति? ।** एवं शिष्येणोदितेऽ**थानन्तरमाचार्यो ब्रवीति**॥ ४६६५॥

**आयरियग्गहणेणं, तित्थयरो तत्थ होइ गहितो तु ।**
**किं व न होयाऽऽयरिओ, आयारं उवदिसंतो उ ? ॥ ४६६५॥**

**निद्दरिसणेत्थ जह खंदएण पुट्ठो य गोयमो भयवं ।**
**केण तुहं सिट्ठं ? ति य, धम्मायरिएण पच्चाह ॥ ४६६७॥**

**आचार्यग्रहणेन तत्र** दशानां मध्ये **तीर्थकरो गृहीतो** द्रष्टव्यः। अथ तीर्थकरस्त्रिलोकाधिपतिराचार्यस्तु सामान्य इति कथमाचार्यग्रहणेन स गृहीतः? । तत आह—**आचारं** ज्ञानादि पञ्च प्रकारमुपदिशन् **किंवा** केन वा कारणेन **न भवत्याचार्यः**? भवत्येवेति भावः। स्वयमाचारकरणं परेषामाचारोपदेशनमित्याचार्यशब्दप्रवृत्तिनिमित्तं तत् तीर्थकरेऽपि समस्तीति भवति तीर्थकरः आचार्यः। **अत्र निदर्शनं यथा— स्कन्दकेन भगवान् गौतमः पृष्टः— केनेदं तव शिष्टं** कथितम्? इति। स **प्रत्याह— 'धर्माचार्येणेति'** ॥ ४६६६ ॥ ४६६७ ॥

**तम्हा सिद्धं एयं, आयरियगहणेण गहिय तित्थयरो ।**
**आयरियादी दसवी, तेरगुणा होंति कायव्वा ॥ ४६६८॥**

**तीसुत्तरसयमेगं, ठाणाणं वन्नियं तु सुत्तम्मि ।**
**वेयावच्चे सुविहियनिम्मं निव्वाणमग्गस्स ॥ ४६६९ ॥**

यस्माद् युक्तिर्निदर्शनं अस्ति **तस्मात् सिद्धमेतत् - आचार्यग्रहणेन तीर्थंकरो गृहीतः। आचार्यादीनि** च **दशापि** पदानि **त्रयोदशगुणानि भवन्ति कर्त्तव्यानि,** एकैकस्मिन् पदे त्रयोदशभिः पदैः वैयावृत्त्यकरणात् ॥ ४६६८ ॥

एवं च सति **वैयावृत्त्ये** वैयावृत्त्यविषये **सूत्रे त्रिंशदुत्तरं स्थानानां [एकम्] शतं वर्णितम्।** किंविशिष्टम्? इत्याह- **सुविहितानां प्रापकं निर्वाणमार्गस्य** ॥ ४६६९ ॥

**ववहारे दसमए दसविहम्मि साहुस्स जुत्तजोगस्स ।**
**एगंतनिज्जरा से, न हु नवरि कयम्मि सज्झाए ॥ ४६७० ॥**

**व्यवहारे दशमे** उद्देशके यद् **दशविधं** वैयावृत्त्यमुक्तं तस्मिन् **साधोर्युक्तयोगस्यैकान्त-निर्जरा** भवति। **नवरि न** केवलं **स्वाध्याये** केवलं स्वाध्याये **कृते से** तस्यैकान्तनिर्जरेति ॥ ४६७० ॥

**एसोऽणुगमो भणितो, अहुणा नओ सो य होइ दुविहो उ ।**
**नाणनओ १ चरणनओ२, २ तेसिं समासं तु वोच्छामि ॥ ४६७१ ॥**

तदेव**मेषोऽनुगमो भणितः । अधुना नयो** वक्तव्यः, तत्र यद्यपि नयाः शतसङ्ख्यास्तथापि ते सर्वे नयद्वये अन्तर्भवति । तत आह— **स** नयो **द्विविधो भवति-ज्ञाननयः**, १ **चरणनयो** नाम क्रियानयः२, **तयोः समासं** सङ्क्षेपं **वक्ष्यामि** ॥ ४६७१ ॥

तमेवाह—

**नायम्मि गेण्हियव्वे, अगिण्हियव्वम्मि चेव अत्थम्मि ।**
**जइयव्वमेव इइ जो, सो उवदेसो नओ नाम ॥ ४६७२ ॥**



**ज्ञाते** सम्यक् परिच्छिन्ने **ग्रहीतव्ये** उपादेये **अग्रहीतव्ये** अनुपादेये हेये इत्यर्थः । **चशब्दः** खलूभयोर्ग्रहीतव्याऽगृहीतव्ययोरनुकर्षणार्थः उपेक्षणीयवस्तुसमुच्चयार्थो वा, **एव**कारस्त्ववधारणे, तस्य चैवं व्यवहितः प्रयोगः—ज्ञाते एव ग्रहीतव्ये अग्रहीतव्ये उपेक्षणीये च नाज्ञाते **अर्थे** ऐहिकाऽऽमुष्मिकरूपे। तत्र ऐहिको ग्रहीतव्यः स्रक्-चन्दनादिः, अग्रहीतव्यो विष-शस्त्र-कण्टकादिः, उपेक्षणीयस्तृणादिः। आमुष्मिको ग्रहीतव्यः सम्यग्दर्शनादिः, अग्रहीतव्यो

मिथ्यात्वादिः, उपेक्षणीयो विवक्षया अभ्युदयादिः । तस्मिन्नर्थे यतितव्यमेवेति अनुस्वारलोपाद् **एवम्** अमुना क्रमेण ज्ञानपुरस्सरणरूपेण ऐहिकाऽऽमुष्मिकफलप्राप्त्यर्थिना सत्त्वेन **यतितव्यं,** प्रवृत्त्यादिलक्षणो यत्नः कार्यः। इत्थं चैतदङ्गीकर्त्तव्यम्, सम्यगज्ञाते प्रवर्त्तमानस्य फलविसंवाददर्शनात् । तथा चोक्तमन्यैरपि—

*"विज्ञप्तिः फलदा पुंसा, न क्रिया फलदा मता ।*
*मिथ्याज्ञानात् प्रवृत्तस्य, फलाऽसंवाददर्शनात् "॥ १ ॥*

तथाऽऽमुष्मिकफलार्थिनाऽपि ज्ञान एव यतितव्यम्, आगमेऽपि तथा प्रतिपादनात् । उक्तं च—

*पढमं नाणं ततो दया, एवं चिट्ठइ सव्वसंजए ।*
*अन्नाणी किं काही?, किं वा नाही छेय पावगं? ॥ [दसवै.अ.४]*

इतश्चैतदेवमङ्गीकर्त्तव्यम्, यस्मात् तीर्थकर-गणधरैरगीतार्थानां विहारक्रियाऽपि निषिद्धा । तथा चाह—

*गीयत्थो विहारो, बीयो गीतत्थमीसितो भणितो ।*
*एत्तो तइयविहारो नाणुन्नातो जिणवरेहिं ॥*

न खल्वन्धेनाऽन्धः समाकृष्यमाणः सम्यक् पन्थानं प्रतिपद्यते इत्यभिप्रायः। एवं तावत् क्षायोपशमिकं ज्ञानमधिकृत्योक्तम्। क्षायिकमप्यङ्गीकृत्य विशिष्टफलसाधकत्वं तस्यैव प्रतिपत्तव्यम्, यस्मादर्हतोऽपि भवाम्भोधितटस्थस्य दीक्षाप्रतिपन्नस्य तपश्चरणवतोऽपि न तावदपवर्गप्राप्तिरुपजायते-यावज्जीवाऽजीवाद्यखिलवस्तुपरिच्छेदरूपं केवलज्ञानं नोत्पन्नमिति। तस्माद् ज्ञानमेव प्रधानमैहिकाऽऽमुष्मिकफलप्राप्तिकारणमिति स्थितम्। **इति जो उवएसो सो नयो नाम इति** एवमुक्तेन प्रकारेण **यः उपदेशः** ज्ञानप्राधान्यख्यापनपरः **सः नयो नाम** ज्ञाननय इत्यर्थः।



उक्तो ज्ञाननयः। सम्प्रति क्रियानयावसरः, तद्दर्शनं चेदम्— क्रियैव ऐहिकाऽऽमुष्मिकफलप्राप्तिकारणं प्रधानम्, युक्तियुक्तत्वात्। तथा चायमप्युक्तस्वरूपामेव स्वपक्षसिद्धये गाथामाह—

**नायम्मि गिण्हियव्वे** इत्यादि। अस्या क्रियानयदर्शनानुसारेण व्याख्या— **ज्ञाते ग्रहीतव्ये अग्रहीतव्ये चार्थे** ऐहिकाऽऽमुष्मिकफलप्राप्त्यर्थिना **यतितव्यमेव,** न यस्मात् प्रवृत्त्यादिलक्षणा प्रयत्नव्यतिरेकेण ज्ञानवतोऽपि अभिलषितार्थावाप्तिरुपजायते। तथा चोक्तमन्यैरपि—

*क्रियैव फलदा पुंसां, न ज्ञानं फलदं मतम् ।*
*यतः स्त्री-भक्ष्यभोगज्ञो, न ज्ञानात् सुखितो भवेत् ॥*

तथाऽऽमुष्मिकफलार्थिनाऽपि क्रियैव कर्त्तव्या । तथा च भगवद्वचनमप्येवमेव व्यवस्थितम्। यत उक्तम्—

*चेइय कुल गण संघे, आयरियाणं च पवयण सुए य ।*
*सव्वेसु वि तेण कयं, तव-संजममुज्जमंतेण ॥*

इतश्चैतदङ्गीकर्त्तव्यम्, यस्मात् तीर्थकर-गणधरैः क्रियाविकलानां ज्ञानमपि विफलमेवोक्तम्। तथा चाऽऽगमः—

*सुबहुं पि सुयमहीयं, किं काही चरणविप्पहीणस्स ।*
*अंधस्स जह पलित्ता, दीवसयसहस्सकोडी वि ॥*

दृशिक्रियाविकलत्वात् तस्येत्यभिप्रायः । एवं तावत् क्षायोपशमिकं चारित्रमङ्गीकृत्योक्तम्, चारित्रं क्रियेत्यनर्थान्तरत्वात् । क्षायिकमप्यङ्गीकृत्य विशिष्टफलसाधकत्वं तस्यैव, यस्मादर्हतो भगवतः समुत्पन्नकेवलज्ञानस्यापि न तावद् मुक्त्यवाप्तिः सम्भवति यावदखिलकर्मेन्धनानलभूता

ह्रस्वपञ्चाक्षरोद्गिरणकालमात्रा सर्वसंवररूपा चारित्रक्रिया नावाप्यते ततः क्रियैव प्रधानमैहिकाऽऽमुष्मिकफलप्राप्तिकारणमिति । **इति जो उवदेसो सो नयो नाम** इति एवमुक्तेन प्रकारेण यः 'उपदेशः' क्रियाप्राधान्यख्यापनपरः सः 'नयो नाम' क्रियानय इत्यर्थः ॥ ४६७२ ॥

उक्तः क्रियानयः । इत्थं ज्ञाननय-क्रियानयस्वरूपं श्रुत्वाऽविदिततदभिप्रायो विनेयः संशयापन्नः सन्नाह—किमत्र तत्त्वम्? पक्षद्वयेऽपि युक्तिसम्भवात् । आचार्य आह—

**सव्वेसिं पि नयाणं, बहुविहवत्तव्वयं निसामित्ता ।**
**तं सव्वनयविसुद्धं, जं चरण-गुणट्ठितो साहू ॥ ४६७३ ॥**

**सर्वेषामपि [नयानां]** मूलनयानाम्, अपिशब्दात् तद्भेदानामपि नयानां द्रव्यास्तिकायादीनां **बहुविधवक्तव्यतां** सामान्यमेव विशेष एव उभयमेव परस्परनिरपेक्षमित्यादिरूपाम्, अथवा नामादिनयानां मध्ये को नयः कं साधुमिच्छति? इत्यादिरूपां **निशम्य** श्रुत्वा **तत् सर्वनयविशुद्धं** सर्वनयसम्मतं वचनं **यत् चरण-गुणस्थितः** चारित्र-ज्ञानस्थितः **साधुः**, यस्मात् सर्वे नया भावतो भावनिक्षेपमिच्छन्ति ॥ ४६७३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



तदेवं नयवक्तव्यताऽपि कृता । भाष्यस्तुतिपरायणमिद**मन्यकर्तृकं** गाथाद्वयम्—

**कप्प-व्ववहाराणं, भासं मोत्तूण वित्थरं सव्वं ।**
**पुव्वायरिएहि कयं, सीसाण हिओवएसत्थं ॥ ४६७४ ॥**

**भवसयसहस्समहणं, एवं नाहिंति जे उ काहिंति ।**
**कम्मरयविप्पमुक्का, मोक्खमविग्घेण गच्छंति ॥ ४६७५ ॥**

उत्तानार्थम् ॥

*देशक इव निर्देष्टा विषमस्थानेषु तत्त्वमार्गस्य ।*
*विदुषामतिप्रशस्यो जयति श्री**चूर्णिकारोऽ**सौ ॥*
*विषमोऽपि व्यवहारो व्यधायि सुगमो गुरूपदेशेन ।*
*यदवापि तत्र पुण्यं तेन जनः स्यात् सुगतिभागी ॥*
*दुर्बोधातपकष्टव्यपगमलब्धैकविमलकीर्त्तिभरः ।*
*टीकामिमामकार्षीत् **मलयगिरिः** पेशलवचोभिः ॥*



For Private And Personal

[1]व्यवहारस्य भगवतो यथास्थितार्थप्रदर्शने दक्षम् ।
विवरणमिदं समाप्तं श्रमणगणानाममृतभूतम् ॥

## ॥ इति श्रीमलयगिरिविरचिता व्यवहाराध्ययनटीका समाप्ता ॥

### दशमोद्देशके ग्रन्थाग्रम् ४१३३।

### सर्वसङ्ख्यया व्यवहारटीकायां ग्रन्थाग्रम् ३४६२५ ॥

संवत् १३०९ वर्षे श्रावण शुदि १ सोमे वरहुडिया सा० सहदेवसुत खेढा गोसल सा० वाहड सुतजिणचंद्र धनेश्वर दोहड लिखापितम् ॥



१. तुला - "व्यवहारस्य भगवतः अर्थविवक्षाप्रवर्तने दक्षम्। विवरणमिदं समाप्तं श्रमणगणानाममृतभूतम्॥" इति व्यवहारचिर्णौ अन्तः॥

# નોંધ



પ.પૂ આચાર્યદેવશ્રી ૐકારસૂરીશ્વરજી મહારાજાના
કર કમળમાં સમર્પિત



પ.પૂ આચાર્યદેવશ્રી ભદ્રસૂરીશ્વરજી મહારાજાના
કર કમળમાં સમર્પિત



આરાધનારત પ.પૂ. મુનિરાજશ્રી જિનચન્દ્રવિજયજી મ.સા.ના
કર કરમળમાં સમર્પિત



KIRIT GRAPHICS
09898490091